शास्त्रसंदेश-३२

# स्तोत्रसंदेशमाला

## चतुर्विंशतिजिनस्तोत्राणि

६



मुनि विनयरक्षितविजयजी म.सा.

शास्त्रसंदेश-३२

# स्तोत्र संदेशमाला-६

## चतुर्विंशतिजिनस्तोत्राणि

: સંપાદક - સંકલન :

પ.પૂ.આચાર્ય ભ.શ્રીમદ્

વિજય રામચન્દ્રસૂરીશ્વરજીના સામ્રાજ્યવર્તી

પૂ.આ.શ્રી બોધિરત્નસૂરીશ્વરજી મ.સા.ના

શિષ્યરત્ન

પૂ.મુ.શ્રી વિનયરક્ષિતવિજયજી મ.સા.

પ્રકાશક-પ્રાપ્તિ સ્થાન

શાસ્ત્રસંદેશ

C/o અસલ, ૩, મણિભદ્ર એપાર્ટમેન્ટ,

આરાધના ભવન માર્ગ, સુભાષચોક, ગોપીપુરા-સુરત-૧

# સ્તોત્ર સંદેશમાલા-૬

## चतुर्विंशतिजिनस्तोत्राणि

આવૃત્તિ : પ્રથમ, વિ.સં. ૨૦૭૮, મૌન એકાદશી,
તા. ૧૪-૧૨-૨૦૨૧

પેજ : ૧૪ + ૨૯૦

સ્તોત્ર : ૮૫ શ્લોક : ૨૦૦૫

: પ્રમાર્જના :

પૂ.આ.શ્રી **દીવ્યકીર્તિસૂરિશ્વરજી** મ.સા.

પૂ.પં.શ્રી **શ્રુતતિલકવિજયજીગણી**

પૂ.મુ.શ્રી **હિતરક્ષિતવિજયજી** મ.સા.

: છંદ-સંયોજના :

પૂ.સા.શ્રી **ભવ્યરત્નાશ્રીજી** મ.સા.ના શિષ્યા

પૂ.સા. શ્રી **પુણ્યરત્નાશ્રીજી** મ.સા.

ટાઈપ સેટીંગ : શ્રી સાંઈ કોમ્પ્યુટર્સ-નિતિનભાઈ, અમદાવાદ.

મુદ્રક : બાલારામ ઓફસેટ-અમદાવાદ.

વિશેષ નોંધ : સ્તોત્ર સંદેશમાલાના ૨૦ ભાગનું સંપૂર્ણ પ્રકાશન જ્ઞાનદ્રવ્યના વ્યયથી કરવામાં આવેલ છે. ગૃહસ્થવર્ગે મૂલ્ય આપી ઉપયોગ કરવો.

આભાર...!　　અનુમોદનીય...!　　અનુકરણીય...!

## સ્તોત્ર સંદેશમાલાના
## ભાગ ૬ ના
## દ્રવ્ય લાભાર્થી

**શ્રી સુબાજી રવચંદ વિદ્યાશાળા (અમદાવાદ) મધ્યે**

*પૂ.પં.શ્રી દીવ્યકીર્તિવિજયજી ગણિવર મ.સા.ની*
*નિશ્રામાં પૂ.સા. શ્રી દક્ષાશ્રીજી મ.સા.ના*
*પરિવારમાં દીક્ષિત બનેલ*

**મુમુક્ષુ બિજલકુમારી નરેશભાઈ શાહની**

*(સા.શ્રી વિધિપ્રજ્ઞાશ્રી મ.સા.) દીક્ષાની*
*જ્ઞાનખાતાની ઉપજમાંથી લાભ લેવામાં આવેલ છે.*
*વિદ્યાશાળા ટ્રસ્ટીગણે કરેલી શ્રુતભક્તિની*
*અમો અનુમોદના કરીએ છીએ.*
*તેઓના અમો*
*આભારી છીએ.*

***શાસ્ત્રસંદેશ, સુરત***

**સ્તોત્ર સંદેશમાલાના ૨૦ ભાગમાં નીચે જણાવેલ પુસ્તકોનો સંપૂર્ણ સમાવેશ કરવામાં આવેલ છે. તેના પૂર્વ પ્રકાશકોના અમો આભારી છીએ.**

(૧) જૈન સ્તોત્ર સંચય-૧, ૨, ૩ - આ. માણિક્યસાગરસૂરિ
(૨) જૈન સ્તોત્ર સંચય-૪, ૫ - મુનિ લાભસાગરગણિ
(૩) જૈન સ્તોત્રાવલી - મુનિ લાભસાગરગણિ
(૪) જૈન સ્તોત્ર સંગ્રહ ભાગ-૧,૨ - મુનિ ચતુરવિજયજી
(૫) સ્તોત્ર સમુચ્ચય-મુનિ ચતુરવિજયજી
(૬) શ્રી જૈન સ્તોત્ર સંગ્રહ ભાગ-૧,૨ - યશોવિજય જૈન ગ્રંથમાળા, બનારસ
(૭) શ્રી સ્તોત્ર રત્નાકર ભાગ ૧,૨ - યશોવિજય જૈન સંસ્કૃત પાઠશાળા, મહેસાણા
(૮) સ્વાધ્યાય દોહન - આ. કનકચન્દ્રસૂરિ
(૯) શ્રી નેમિનાથ સ્તોત્ર સંગ્રહ-મુનિ તીર્થભદ્ર વિ.ગણિ
(૧૦) સ્તોત્ર સંગ્રહ - મુનિ વૈરાગ્યરતિ વિ.ગણિ.
(૧૧) બૃહદ્-નિર્ગ્રન્થ-સ્તુતિ મણિમંજુષા-મધુસૂદન ઢાંકી - જિતેન્દ્ર શાહ
(૧૨) સંસ્કૃત પ્રાચીન સ્તવન સંદોહ-મુનિ વિશાલવિજયજી
(૧૩) વિવિધ તીર્થકલ્પ - મુનિ જિનવિજયજી
(૧૪) શ્રી જૈનસ્તોત્રકોશ - મુનિ ચંદ્રોદયવિજયજી સૂર્યોદયવિજયજી
(૧૪) શાસન પ્રભાવક આ. જિનપ્રભસૂરિ ઔર ઉનકા સાહિત્ય
(૧૫) અનુસંધાન ભાગ ૧ થી ૮૫ - આ. શીલચન્દ્રસૂરિ

*(દરેક ભાગમાં આવતા પ્રાચીન અપ્રકાશિત સ્તોત્રો)*

*સ્તોત્ર સંદેશમાલાના આ ૨૦ ભાગમાં નીચે જણાવેલ પુસ્તકોમાંથી અમુક સ્તોત્રો લીધેલા છે. તેના પૂર્વ પ્રકાશકોના અમો આભારી છીએ.*

(૧) વિવિધ કલ્પ સંગ્રહ

(૨) નમસ્કાર સ્વાધ્યાય ભાગ ૧,૨, ૩

(૩) સરસ્વતી પ્રાસાદ

(૪) કાવ્ય સંગ્રહ ભાગ ૧,૨

(૫) વર્ધમાન વિદ્યાકલ્પ

(૬) વિધિ માર્ગપ્રપા

(૭) શ્રી વલ્લભીય લઘુકૃતિ સમુચ્ચય

(૮) સમયસુન્દર કૃતિ કુસુમાંજલી

(૯) ચતુર્વિંશતિ જિનેન્દ્ર સ્તવનાવલિ

(૧૦) શ્રી જિનવલ્લભસૂરિ ગ્રંથાવલિ

(૧૧) યુગાદિવંદના

(૧૨) શ્રી અજીતનાથ વંદનાવલી

(૧૩) શ્રી સંભવનાથ વંદનાવલી

(૧૪) શ્રી પ્રકરણ રત્નાકર ભાગ-૨

(૧૫) મહાકવિ શ્રી જયશોખરસૂરિ ભાગ-૨

(૧૬) શ્રી પાર્શ્વનાથ ઉપાસના

(૧૭) મહાપ્રભાવિક નવસ્મરણ

(૧૮) ભૈરવ પદ્માવતી કલ્પ

(૧૯) તુલસીપ્રજ્ઞા (પાર્શ્વ સ્તુતિ સંગ્રહ)

(૨૦) ધર્મવર્દ્ધન ગ્રન્થાવલી

(૨૧) બૃહત્ હ્રીંકારકલ્પ વિવરણ તથા વર્ધમાન વિદ્યા કલ્પ

(૨૨) શ્રી ઋષભ-વીરેશાદિ ચતુર્વિંશતિ જિન સ્તવનાવલી

(૨૩) મન્ત્ર કલ્પ સંગ્રહ

(૨૪) શ્રી જિનેન્દ્ર નમસ્કારાદિ સંગ્રહ

(૨૫) ગિરનાર ગ્રંથોની ગોદમાં

(૨૬) સૂરિમન્ત્ર સમુચ્ચય ભાગ-૧/૨

(૨૭) શ્રી જીરાવલા સ્તોત્રાદિ સંગ્રહ

(૨૮) સમ્બોધિ (ઈ.સ. ૨૦૧૪ સુધીના)

(૨૯) નિશ્રેયસમ્ ભાગ ૧ થી ૧૧

(૩૦) શ્રુતસાગર - કોબા

---

*આ સિવાયના પણ અનેક પુસ્તકોમાંથી સ્તોત્રો એકત્રિત કરવામાં આવેલ છે તે સર્વેના પૂર્વ પ્રકાશકોના અમો આભારી છીએ.*

---

**સ્તોત્ર સંદેશમાલાના આ ૨૦ ભાગમાં એકત્રિત કરેલ સ્તોત્રોના પુસ્તકો માટે નીચે જણાવેલ જ્ઞાનભંડારોનો વિશેષ સહકાર મળેલ છે. તેના ટ્રસ્ટીગણ અને કાર્યકરોના અમો આભારી છીએ.**

(૧) વિજયરામચન્દ્રસૂરીશ્વરજી આરાધના ભવન
ગોપીપુરા-સુરત

(૨) વિજય દાનસૂરીશ્વરજી જૈન જ્ઞાનભંડાર
ચંદનબાળા- મુંબઈ-૭

(૩) શ્રી રત્નત્રયી આરાધના ભવન - પાલડી - અમદાવાદ

(૪) શ્રી કૈલાસસાગરસૂરિ જ્ઞાનમંદિર - કોબા - અમદાવાદ

(૫) શ્રી ગીતાર્થ ગંગા- પાલડી - અમદાવાદ

(૬) શ્રી નેમિ-નંદન શતાબ્દિ ટ્રસ્ટ - પાલડી-અમદાવાદ

(૭) શ્રી શ્રુતઆનંદ ટ્રસ્ટ -પાલડી - અમદાવાદ

(૮) આ.શ્રી ૐકારસૂરિ જ્ઞાનમંદિર - સુરત

(૯) શ્રી હરિભદ્રસૂરિ શાસ્ત્રસંગ્રહ - સુરત

# પ્રકાશકીય...!

પૂર્વના પુણ્યવંતા મહાપુરુષોએ પ્રરૂપેલા પ્રકરણોની એક ગ્રંથમાળા એટલે શાસ્ત્રસંદેશમાલા, આજથી ૧૬ વર્ષ પૂર્વે ૪૦૬ પ્રકરણો ગ્રંથો ૨૦ ભાગમાં પ્રકાશિત કરેલ તે પછી ૧૧ વર્ષે પૂર્વે ૧૩૭ પ્રકરણ ગ્રંથો ચાર ભાગમાં તથા ૬૨૬ ગ્રંથોના ૧,૭૭,૦૦૦ શ્લોકો સમાવતા અકારાદિના ચાર ભાગ અને સંવેગરંગશાળા નામનો મહાનગ્રંથ પ્રકાશિત કરેલ અને આજે ૮૦ પ્રકરણ ગ્રંથો બે ભાગમાં પ્રકાશિત થઈ રહ્યા છે. એટલે આજ સુધીમાં ૬૨૩ પ્રકરણ ગ્રંથોના ટોટલ ૨૬ ભાગ અને અકારાદિ ચાર ભાગમાં સમાવિષ્ટ કરી પ્રકાશન કરવાનો લાભ અમોને મળેલ છે.

પ્રકરણોની સાથે સાથે પૂજ્યશ્રી સ્તોત્રો-સ્તુતિઓ પણ સંગ્રહિત કરી રહ્યા હતા તે પણ આજે ૨૨૦૦ થી અધિક સ્તોત્રો અને ૨૦૦૦ થી અધિક સ્તુતિઓના ૨૦ ભાગ અમો પ્રકાશિત કરી રહ્યા છીએ.

જૈનશાસનમાં આજ સુધીમાં પ્રકાશિત થઈ બહાર પડેલ પ્રકરણ ગ્રંથો અને સ્તોત્રો-સ્તુતિઓ જે અલગ અલગ હતા તે બધા જ આજે હવે એક સાથે મળી રહેશે. આ

દ્વારા શ્રી ચતુર્વિધ સંઘની સેવાનો લાભ અમોને મળેલ છે તે માટે અમો ધન્યતા અનુભવીએ છીએ.

સંખ્યાની દષ્ટિએ અધધ... થઈ જાય તેવા ૬૨૩ પ્રકરણ ગ્રંથો ૬૨૬ + ૮૦ ગ્રંથોની અકારાદિ, ૨૨૦૦ થી અધિક સ્તોત્રો અને ૨૦૦૦ થી અધિક સ્તુતિઓ પૂજ્યશ્રીએ સંકલન-સંપાદન કરી આપ્યા તે માટે અમો તેઓશ્રીના આભારી છીએ.

પૂર્વની જેમ આ ૨૦ + ૨ પુસ્તકો માટે પણ અલગ-અલગ સંઘોએ પોતાના જ્ઞાનદ્રવ્યમાંથી લાભ લીધેલ છે તે માટે પણ અમો તે તે સંઘ + ટ્રસ્ટીઓ + કાર્યકરોના પણ આભારી છીએ.

ટાઈપ સેટીંગ શ્રી સાંઈ કોમ્પ્યુટર્સવાળા નિતિનભાઈ તથા પ્રીન્ટીંગ બાઈન્ડીંગનું કાર્ય બાલારામ ઓફસેટવાળા રીતેશભાઈએ વિશેષ ખંત-કાળજીપૂર્વક કરી આપેલ છે.

**-શાસ્ત્રસંદેશ**

# अनुक्रमणिका


| क्र.नं. | आद्यचरण | कर्ता | पेज नं. |
|---|---|---|---|
| १ | जयश्रीदायिनः श्रीमद्-वृषभा- | पू.आ.श्री मुनिसुन्दरसूरि | १ |
| २ | जयश्रिये भवशत्रोर्नौमि चतु- | पू.आ.श्री मुनिसुन्दरसूरि | १ |
| ३ | जयश्रीसङ्गिनो नौमि, चतु- | पू.आ.श्री मुनिसुंदरसूरि | २ |
| ४ | जयादिनाथ ! प्रथितार्थसार्थः, | पू.आ.श्री देवेन्द्रसूरि | ३ |
| ५ | केवलिज्ञानिनं निर्वाणिनं | पू.आ.श्री देवेन्द्रसूरि | ५ |
| ६ | नत्वा सिद्धसमूहं च, ज्ञानमूर्ति- | मु. हंसविजय | १९ |
| ७ | श्रीमज्जिनपदाऽभ्याशं प्रति- | पू.आ. श्री समन्तभद्रसूरि | ३५ |
| ८ | नाभिराज-कुलकमलमरालम्, | पू.आ. श्री ऋषिवर्द्धनसूरि | ५१ |
| ९ | आनम्रनाकिपतिरत्न-किरीट- | पू. आ. श्री जिनप्रभसूरि | ५३ |
| १० | जिनर्षभ प्रीणितभव्यसार्थ | पू.आ.श्री जिनप्रभसूरि | ५७ |
| ११ | देवेन्द्रवन्दितान् भाविचतु- | पू.आ.श्री धर्मघोषसूरि | ५९ |
| १२ | नम्राखण्डलमौलिमण्डल- | पू.आ. श्री धर्मघोषसूरि | ६० |
| १३ | प्रीतिप्रसन्नमुखकौशिकनन्द्य- | पू.आ.श्री जिनवल्लभसूरि | ६२ |
| १४ | जगति जडिमभाजि व्यञ्जिता- | पू.आ. श्री सागरचन्द्रसूरि | ६६ |
| १५ | कल्याणैः पञ्चभिर्दत्तसुखाय | पू.आ.श्री हेमचन्द्रसूरि | ७० |
| १६ | सकलार्हत्प्रतिष्ठान-मधिष्ठानं | पू.आ.श्री हेमचन्द्रसूरि | ७३ |
| १७ | नतसुरेन्द्र जिनेन्द्र युगादि- | पू.आ. श्री रविप्रभसूरि | ७७ |
| १८ | जिन ! श्रीनाभिजात ! त्वां | पू.आ.श्री सोमतिलकसूरि | ७८ |
| १९ | सिद्धं ध्रौव्यव्ययोत्पादलक्षण- | पू.आ. श्री जिनसेनसूरि | ७९ |

| क्र.नं. | आद्यचरण | कर्ता | पेज नं. |
|---|---|---|---|
| २० | सिद्धं संपूर्णभव्यार्थं सिद्धेः | पू.आ.श्री विषेणाचार्य | ८२ |
| २१ | श्रियः श्रीमान् विश्राणयतु | पू.आ. श्री सोमसुन्दरसूरिशिष्य | ८४ |
| २२ | श्रीनाभिसूनो जिनसार्वभौम | पू.आ. श्री जयतिलकसूरि | ८९ |
| २३ | आदौ नेमिजिनं नौमि, सम्भवं | पू.आ. श्री जयतिलकसूरिशिष्य | १०० |
| २४ | श्रीमच्चतुर्विंशति तीर्थराज- | पू.आ.श्री कमलप्रभसूरि | १०१ |
| २५ | विजयते वृषभः स शमास्पदं | पू.आ.श्री भुवनसुन्दरसुरि | १०३ |
| २६ | युगादौ जगदुद्धर्तुं, यो युग्म- | पू. भुवनहिनाचार्य | १०७ |
| २७ | श्रीमद्वृषभ ! सर्वज्ञ ! वृषभा- | पू.उपा.श्री क्षमाकल्याणगणि | ११२ |
| २८ | श्रीमन्तं परमानन्द-स्वरूपं | पू.उपा.श्री क्षमाकल्याणगणि | ११८ |
| २९ | अमरगिरिगरीयो मारुदेवीय- | महोपाध्यायश्री रत्नशेखरगणि | १२४ |
| ३० | जयति लसदनन्तज्ञाननिर्भास- | पू.उपा. उदयसागरगणि | १२८ |
| ३१ | आदिनाथं जगन्नाथं अरनाथं | पू.उपा.श्री मेघराजगणि | १३५ |
| ३२ | देवाधिदेवाधिकभाग्यलक्ष्मी | पू.मु.श्री मेघविजयगणि | १३६ |
| ३३ | श्रीनाभेयोपमानोन रहित | पण्डितवरश्री विनयशेखरगणि | १३९ |
| ३४ | मेरोः किं शिखरस्थकल्प- | मुनिप्रवर श्री विनयहंसगणि | १४४ |
| ३५ | नत्वाऽऽदौ विधिवद्गुरोः | पू.मु.श्री गुणविजयगणि | १४९ |
| ३६ | श्रीशान्तिं प्रणिपत्य नित्यमनघं | पू. वाचकश्री वल्लभगणि | १५४ |
| ३७ | स मङ्गलान्यातनुतां सुमङ्गला- | पू.पं. श्री शान्तिसुन्दरगणि | १६३ |
| ३८ | स्वस्तिश्रिये श्री ऋषभादि देवं, | पू.मु.श्री धर्मवर्द्धनगणि | १६७ |
| ३९ | श्रीनाभिजात ! सुमते ! जिन- | पं.श्री हर्षवर्द्धनगणि | १७१ |
| ४० | सुदर्शननराधीश-वंशमाणि- | पू.पण्डितश्री हर्षकल्लोलगणि | १७२ |
| ४१ | वसुविरोकमनोरमसंवरं, | पू.मु. श्री वाचकवरवच्छराजवि. | १७७ |

| क्र.नं. | आद्यचरण | कर्ता | पेज नं. |
|---|---|---|---|
| ४२ | श्रीशारदां सद्वरदां प्रणम्य, | पू.मु.श्री दीप्तिविजयजी | १८० |
| ४३ | स नाभेयोजिनोजीया, दूरुस्थ- | पू.मु. श्री हंसविजयजी | १८४ |
| ४४ | सकलविमलमङ्गलदातारः, | पू.मु.श्री आनन्दचन्द्रवि. | १८७ |
| ४५ | शुभशुभसागरशारदचन्द्राः, | पू.मु.श्री आनंदचन्द्र वि. | १८८ |
| ४६ | ये तीर्थरथनेतारः सन्त्यत्र- | पू.मु. श्री गुणभद्रवि. | १८९ |
| ४७ | श्रीशङ्खेश्वरपार्श्वनाथमनघं | पू.मु. श्री संघविजय | १९३ |
| ४८ | श्रीवसुभूतितनूजं, वन्दे- | श्री ब्रह्मर्षि | १९८ |
| ४९ | स्वस्तिश्रीसुखदान् सदा | श्री ज्ञानचन्द्र | १९९ |
| ५० | यन्नामाभिसमापिताखिल- | कविकुलप्रभ | २०५ |
| ५१ | श्रीलीलायतनं महीकुलगृहं | श्री भूपालकवि | २१० |
| ५२ | वन्दे धर्मजिनं सदा सुखकरं | श्री सिंहकवि | २१५ |
| ५३ | प्रणौमि परया भक्त्या, | | २१६ |
| ५४ | श्रीनाभिमरुदेवाङ्गप्रभवं | | २१८ |
| ५५ | ऋषभजिनमजितनाथं | | २२१ |
| ५६ | यत्र बहुकोटिसङ्ख्याः सिद्धि- | | २२१ |
| ५७ | नन्द्यान्नाभिसुतः सुरेश्वरनतः | | २२२ |
| ५८ | शान्तिधर्मजिन ततश्च | | २२४ |
| ५९ | श्रीआदिनाथा-ऽजितनाथदेवौ, | | २२६ |
| ६० | श्रीआदिनाथमजितं प्रभुसंभवं | | २२७ |
| ६१ | सुरकिन्नरनागनरेन्द्रनतं, | | २२७ |
| ६२ | यः प्राक् सार्थपतिर्धन (१) | | २२८ |
| ६३ | श्रीनाभिभूपालविशालवंश- | | २३४ |

| क्र.नं. | आद्यचरण | कर्ता | पेज नं. |
|---|---|---|---|
| ६४ | प्रथमजिनवर प्रथमजिनवर ! | | २३७ |
| ६५ | श्रीदेवार्चितं देवं, सेव्यं | | २४३ |
| ६६ | श्रीनाभिभूप मरुदेवि भवो | | २४८ |
| ६७ | श्रीगौतमगणधारं शुभतरुराजी- | | २५२ |
| ६८ | सकलगुणपूरपूरित-गात्रं प्रण- | | २५४ |
| ६९ | श्रियेऽस्तु शीतलः श्रेयान् | | २५५ |
| ७० | सुविधिं धर्मशान्ती च, श्रीनेमिं | | २५६ |
| ७१ | आदिनाथं जगन्नाथ-मजितं | | २५६ |
| ७२ | आद्यः श्रीऋषभस्ततोऽजित- | | २५८ |
| ७३ | नमिऊण जिणे सुयदेवयं च | पू.आ.श्री.जयसिंहसूरि | २५९ |
| ७४ | सिद्ध-सुर-किन्नरोरग-दणुवइ | पू.आ.श्री विमलसूरि | २६३ |
| ७५ | नमिऊण वद्धमाणं सुरनर- | पू.आ. श्री चन्द्रसूरि | २६४ |
| ७६ | उज्जलकेवलनाणधर रिसहेसर | पू.मु. श्री राजकीर्तिविजयजी | २६६ |
| ७७ | सुहगुत्ते सुहगुत्ते सुहगुत्ते | | २६८ |
| ७८ | अमरनररायमहिए सिद्धे | | २७१ |
| ७९ | वंदित्तु सिरि उसहाइ जिण | | २७२ |
| ८० | पढम जिणवर पढम जिणवर | | २७३ |
| ८१ | मोहमहाभडमयमहण रिसह- | | २७९ |
| ८२ | मोहन्धयारतिमिरं, जेणेयं | पू.आ.श्री विमलसूरि | २८२ |
| ८३ | जं जग-णाहु दिट्ठु वल-सीय- | महाकवि स्वयम्भू | २८३ |
| ८४ | देव तिहुयणपणय-पय-कमल | पू.आ. श्री वर्द्धमानसूरि | २८४ |
| ८५ | पणवेप्पिणु आइ-भडाराहो। | महाकवि स्वयम्भू | २८९ |

# શાસ્ત્રસંદેશનું નવલું નજરાણું
# “પદ્યાનુક્રમણિકા સંપુટ”

- આ સંપુટમાં ચાર ભાગ છે.
- પ્રથમ ભાગમાં આગમના ૪૪ ગ્રંથો અને સંવેગરંગશાલાની પદ્યાનુક્રમણિકા છે.
- દ્વિતીય ભાગમાં પ્રાકૃતના ૩૭૩ ગ્રંથોની પદ્યાનુક્રમણિકા છે.
- તૃતીય ભાગમાં સંસ્કૃતના ૨૦૫ ગ્રંથો અને લોકપ્રકાશની પદ્યાનુક્રમણિકા છે.
- ચતુર્થભાગમાં ત્રિષષ્ટિશલાકાપુરુષચરિત્ર અને વૈરાગ્યકલ્પલતા-રતિની પદ્યાનુક્રમણિકા છે.
- આ સંપુટમાં ૭ પરિશિષ્ટો છે.
- આ સંપુટમાં ટોટલ ૬૨૬ ગ્રંથોનો સમાવેશ કરેલ છે.
- આ સંપુટમાં ટોટલ ૧,૭૭,૦૦૦ શ્લોકનો સમાવેશ કરેલ છે.
- આ સંપુટના ટોટલ ૧૫૭૦ પેજ છે.
- આ સંપુટની કિંમત ૧૮૦૦/-રૂપિયા છે.

पू.आ.सहस्रावधानिश्री मुनिसुन्दरसूरिविरचितः

## १. ॥ श्रीचतुर्विंशतिजिनस्तवः ॥

जयश्रीदायिनः श्रीमद्-वृषभाजितशम्भवान् ।
अभिनन्दनमानौमि, सुमतिं च जिनाधिपान् ॥ (अनुष्टुप्) १

पद्मप्रभः सुपार्श्वश्चन्द्रप्रभसुविधिशीतलाः श्रेयान् ।
श्रीवासुपूज्यविमलाऽनन्ता धर्मश्च मां पान्तु ॥ (आर्या) २

शान्तिः कुन्थुररः श्रीमल्लिर्मुनिसुव्रतो नमिर्नेमी ।
पार्श्वो वीरश्च जिना भवभीरोः सन्तु मे शरणम् ॥ ३

इतिभुवनकल्पतरवो नतसुरराजा नुता मयापि जिनाः ।
शिवपदसम्पदमतुलां, ददतां मम शुद्धबोधिकृते ॥ ४

(मघवमहामुनिसुन्दरनुतिततिविश्रामभूमिगुणविभवाः ।
इति संस्तुता जिनेन्द्रा ददतां मे शर्म निजमेव ॥ ५

पू.आ.सहस्रावधानिश्री मुनिसुन्दरसूरिविरचितम्

## २. ॥ श्रीचतुर्विंशतिजिनविहरमाणजिन-शाश्वतजिनस्तवनम् ॥

(आर्या)

जयश्रिये भवशत्रोर्नौमि चतुर्विंशतिं जिनाधीशान् ।
ऋषभमजितं च शम्भवमभिनन्दनसुमतिपद्माभान् ॥ १

वन्दे सुपार्श्वचन्द्रप्रभसुविधीन् शीतलं जगन्नाथम् ।
श्रेयांसवासुपूज्यौ विमलानन्तौ तथा धर्मम् ॥ २

शान्तिं कुन्थुं चारं मल्लिमुनिसुव्रतौ नमिं नेमिम् ।
पार्श्वं वीरं च विभुं नौमि श्रेयःश्रिये सततम् ॥ ३

सीमन्धरं युगन्धरबाहुसुबाहुजिनानिह सुजातम् ।
स्तौमि स्वयम्प्रभेशं जिनवरवृषभाननं च सदा ॥ ४

जिनपतिमनन्तवीर्यं सुरप्रभजिनविशालवज्रधरान् ।
चन्द्राननं च सर्वानित्यष्टौ धातकीखण्डे ॥ ५

श्रीचन्द्रबाहुनाथं भुजङ्गजिनमीश्वरं त्रिजगदर्च्यम् ।
नेमिप्रभुतीर्थपतिं श्रीमन्तं वीरसेनं च ॥ ६

तीर्थेशमहाभद्रं देवयशोनाथमजितवीर्यविभुम् ।
प्रणमामि पुष्करार्द्धे विंशतिमिति विहरतः सार्वान् ॥ ७

अथ ऋषभवर्द्धमानौ चन्द्राननाथवारिषेणौ च ।
शाश्वतजिनांश्च वन्दे ददतु शिवं ते च मे सर्वे ॥ ८

मघवमहामुनिसुन्दरनुतितितिविश्रामभूमिगुणविभवाः ।
इति संस्तुता जिनेन्द्रा ददतां मम शर्म निजमेव ॥ ९

पू.आ. सहस्रावधानिश्री मुनिसुन्दरसूरिविरचितः

## ३. ॥ श्रीचतुर्विंशतिजिनस्तवः ॥

(अनुष्टुप्)

जयश्रीसङ्गिनो नौमि,चतुर्विंशतिमर्हतः ।
श्रीयुगादीशमजितं, शम्भवं चाभिनन्दनम् ॥ १

सुमतिं सुमतिप्राप्त्यै, नौमि पद्मप्रभं प्रभुम् ।
सुपार्श्वं विश्वकल्पद्रुप्रभं चन्द्रप्रभुं तथा ॥ २

सुविधिं शीतलं सार्वं,श्रेयांसं श्रेयसे भजे ।
वासुपूज्यं च विमलानन्तौ धर्मं च बोधिदान् ॥ ३

श्रीशान्तिं कुन्थुसर्वज्ञं, वन्देऽरं मल्लिसुव्रतौ ।
नमिं नेमिं जिनं पार्श्वं, वर्द्धमानं च बोधये ॥ ४

एवं जिनवरा भक्त्या, कीर्त्तिता वन्दिता मया ।
सम्यग्ज्ञानक्रियाशुद्ध्या, सन्तु मे शिवसम्पदे ॥ ५

पू.आ.श्री देवेन्द्रसूरिप्रणीतम्

## ४. ॥ श्रीचतुर्विंशतिजिनस्तोत्रम् ॥

जयादिनाथ ! प्रथितार्थसार्थः,
जयाजित ! स्वैरजितारिवर्गः ।
जयापुनः सम्भवः सम्भव ! त्वं,
जयाभिनन्दिन्नभिनन्दनेश ॥ (इन्द्रवज्रा) १

(उपजाति)

निधेहि धर्मे सुमते ! मतिं मे,
त्वं सद्म पद्मप्रभ ! देहि मुक्तौ ।
सुपार्श्व ! पार्श्वे कुरु मे विवेकं,
चन्द्रप्रभ ! छिन्द्धि तमो विमोहम् ॥ २

पुण्ये विधौ मां सुविधे ! विधेहि,
कर्मानलः शीतल ! शीतलोऽस्तु ।
श्रेयांस ! मे श्रेयसि धेहि चित्तं,
त्रिधास्तु पूजा त्वयि वासुपूज्य ! ॥ ३

कुरुष्व जीवं विमलामलं मे,
कर्माण्यनन्तानि लुनीह्यनन्त ! ।
श्रीधर्म ! धर्मस्तव मां पुनातु,
शान्ते ! भव त्वं दुरितोपशान्त्यै ॥ ४

दुष्कर्मकन्थामथनोस्तु कुन्थु-
ररो हरत्वैनर्सि मे प्रवृत्तिम् ।
कल्याणवल्लीं वितनोतु मल्लिः,
सत्यव्रतं यच्छतु सुव्रतो मे ॥ ५

नमिर्भ्रमिं रक्षतु मे भवोत्थां,
लुनातु नेमिस्तु कषायवृक्षान् ।
मथ्नातु पार्श्वो दुरिताधिवार्धिं,
श्रीवीरनाथं शरणं प्रपद्ये ॥ ६

संसारमार्गभ्रमणेन तप्तं,
सम्भूय भूयस्तरपुण्यवृष्ट्या ।
पुष्णन्तु तेऽष्टापदपर्वतस्था,
जिनाम्बुदाः श्रीभरतार्चिता माम् ॥ ७

पू.आ.श्री देवेन्द्रसूरिविनिर्मितानि

# ५. ॥ श्रीत्रिंशच्चतुर्विंशतिकास्तवनानि ॥

## प्रथमभरतस्तवः ॥ १ ॥

(अनुष्टुप्)

### अतीतजिनाः

केवलज्ञानिनं निर्वाणिनं सागरमेव च ।
महायशोऽभिधं वन्दे भक्त्या विमलनामकम् ॥ १

सर्वानुभूतिं प्रणुमः श्रीधरं दत्तसञ्ज्ञकम् ।
दामोदरं सुतेजस्कं स्वामिनं मुनिसुव्रतम् ॥ २

सुमतिं शिवगत्याख्यमस्ताघं च नमीश्वरम् ।
अनिलं यशोधराह्वं कृतार्थं च नमाम्यहम् ॥ ३

जिनेश्वरं शुद्धमतिं सेवे शिवकरं तथा ।
स्यन्दनं(भं?) सम्प्रतिं चेत्यतीताः सन्तु श्रिये जिनाः ॥ ४

### वर्तमानजिनाः

ऋषभं चाऽजितं चैव सम्भवं चाभिनन्दनम् ।
सुमतिं पद्मप्रभाख्यं सुपार्श्वं नौम्यहं जिनम् ॥ ५

चन्द्रप्रभं च सुविधिं कलये हृदि शीतलम् ।
श्रेयांसं वासुपूज्यं च विमलानन्तजिज्जिनौ ॥ ६

धर्मनाथं तथा शान्तिनाथं कुन्थुं तदन्तरम् ।
मल्लिं मुनिसुव्रताह्वं पूजयामितमां नमिम् ॥ ७

नेमिनं पार्श्वनाथं च वर्द्धमानमभिष्टुमः ।
इत्यमी वर्त्तमानास्ते भूयासुर्भूतये जिनाः ॥ ८

भाविजिनाः

पद्मनाभं सूरदेवं सुपार्श्वं च स्वयंप्रभम् ।
सर्वानुभूतिमभितो वन्दे देवश्रुताह्वयम् ॥ ९

उदयाख्यं च पेढालं पोट्टिलं सितकीर्त्तिकम् ।
सुव्रतं चाममं निष्कषायं हृदि निवेशय ॥ १०

निष्पलासं निर्ममाख्यं चित्रगुप्तं तथा श्रये ।
समाधि-संवर-यशोधरान् विजय-मल्लकौ ॥ ११

देवं चानन्तवीर्यं च स्तुवे भद्रङ्करं तथा ।
इत्येते भाविनोऽर्हन्तो विघ्नं निघ्नन्तु मेऽन्वहम् ॥ १२

इत्याद्यभरतक्षेत्रेऽतीताद्या जिनपुङ्गवाः ।
संस्तुता अद्भुतां दद्युः श्रीसङ्घतिलकश्रियम् ॥ १३

## द्वितीयभरतस्तवः ॥ २ ॥

### अतीतजिनाः

रत्नप्रभाभिधं सेवेऽमित-सम्भवसञ्ज्ञकौ ।
अकलङ्कं तथा चन्द्रस्वामिनं च शुभङ्करम् ॥ १

सत्त्वनाथमहं स्तौमि सुन्दरं च पुरन्दरम् ।
स्वामिनं देवदत्तं च तथा वासवदक्षकम् ॥ २

श्रेयांसं विश्वरूपं च तपस्तेजसमञ्जसा ।
प्रतिबोधं च सिद्धार्थं भजेऽहं संयमाऽमलौ ॥ ३

देवेन्द्रं प्रवरं विश्वसेनाख्यं मेघनन्दनम् ।
सर्वज्ञं नौमि चेत्येतेऽतीतास्सन्तु मुदे जिनाः ॥ ४

## वर्तमानजिनाः

युगादिं स्तौमि सिद्धान्तं महेश-परमार्थकौ ।
समुद्धरं भूधरं चोद्द्योतमार्जवनामकम् ॥ ५

अभयनाथाऽप्रकम्पौ पद्मं सेवामि भावतः ।
पद्मानन्दं प्रियकरं तथा सुकृतनाथकम् ॥ ६

भद्रेश्वरं मुनिचन्द्रं पञ्चमुष्टिं त्रिमुष्टिकम् ।
गाङ्गिकं प्रणवनाथं सर्वाङ्गं प्रणिदध्महे ॥ ७

ब्रह्मेन्द्रमिन्द्रदत्ताख्यं तथा जिनपतिं स्तुवे ।
इत्येवं वर्त्तमानार्हद्वृन्दं भद्रं ददातु नः ॥ ८

## भाविजिनाः

सिद्धनाथं सम्यगाख्यं जिनेन्द्राभिधमाश्रये ।
साम्प्रतं च तथा सर्वस्वामिनं मुनिनाथकम् ॥ ९

विशिष्टापरनाथाख्यौ ब्रह्मशान्तिं च पर्वतम् ।
कामुकं धामनामानं कल्पं संवरमाश्रये ॥ १०

स्वस्थाऽऽनन्दौ रविचन्द्रं प्रभवं भावये हृदि ।
सन्निधिं च सुवर्णं च सुकर्माणं तथैव च ॥ ११

अममं पार्श्वनाथं च वरिवस्यामि शाश्वतम् ।
इति भाविजिना मङ्क्षु मोक्षसौख्याय सन्तु मे ॥ १२

इत्थं द्वितीयभरतेऽतीताद्या जिनपुङ्गवाः ।
संस्तुता अद्भुतां दद्युः श्रीसङ्घतिलकश्रियम् ॥ १३

## तृतीयभरतस्तवः ॥ ३ ॥

## अतीतजिनाः

वृषभं प्रियमित्राख्यं शान्तनुं सुमृदुं तथा ।
अतीतमव्यक्त-कलाशत-सर्वजितः स्तुवे ॥ १

प्रवृद्धं प्रव्रजिताख्यमीडे सौधर्मनामकम् ।
तमोऽन्धद्वीपवज्रेशौ बुधनाथं प्रबन्धकम् ॥ २

अतीतस्वामिप्रमुखैः पल्योपममकोपनम् ।
निष्ठितं मृगनाभिं च हृदयान्तरहं वहे ॥ ३

देवेन्द्रं च प्रयच्छं च शिवनाथं तथाऽऽश्रये ।
इत्यतीता जिनाः सन्तु सतां पातकघातकाः ॥ ४

## वर्तमानजिनाः

ब्रह्मेन्द्रं कर्पटं चापि वृषभं प्रियतेजसम् ।
प्रशमं विषमाङ्गाख्यं श्रये चारित्रनामकम् ॥ ५

प्रभादित्यं मुञ्जकेशं पीतवाससमाश्रये ।
सुररिपुं दयानाथं सहस्रध्वजसञ्ज्ञकम् ॥ ६

जिनसिंहं रेपकं च बाहु-श्रीवाक्य-योगकान् ।
योगनाथं कामरिपुं नमामोऽरण्यवासकम् ॥ ७

नमिकं च तथा ज्ञानगर्भमेकार्जितं भजे ।
भवत्वमी वर्त्तमाना जिनेन्द्राः सर्वशर्मदाः ॥ ८

## भाविजिनाः

रत्नकेशं चक्रहस्तं कृतज्ञं परमेश्वरम् ।
सुमूर्त्तिं शुद्धार्तिमपि निष्केशमभिनौम्यहम् ॥ ९

प्रशस्तकं निराहारं मुहूर्त्तस्वामिनं श्रये ।
द्विजनाथं तथा श्वेताङ्गदं चारुकनाथकम् ॥ १०

देवनाथमहं वन्दे दयाधिकं च पुष्पकम् ।
नरनाथं प्रतिकृतिं नागेन्द्रं च तपोनिधिम् ॥ ११

अञ्चामोऽञ्चलनाथं चाऽऽरण्यकं च दशाननम् ।
सात्त्विकं चेति भाव्यर्हन्मालिका मङ्गलाय मे ॥ १२

एवं तृतीयभरतेऽतीताद्या जिनपुङ्गवाः ।
संस्तुता अद्भुतां दद्युः श्रीसङ्घतिलकश्रियम् ॥ १३

## चतुर्थभरतस्तवः ॥ ४ ॥

### अतीतजिनाः

मदमत्तं तथा मूर्त्तिस्वामिनं च निरागमम् ।
प्रलम्बकं नमस्कुर्वे पृथ्वीपत्यभिधानकम् ॥ १

चारित्रनिधिमञ्चामोऽपराजितसुबोधकौ ।
बुद्धेशं वैतालिकाख्यं त्रिमुष्टिं मुनिबोधकम् ॥ २

तीर्थस्वामिक-धर्मार्थं ग्रामेशं च समाधिकम् ।
प्रभ्वनादिप्रभुं सर्वतीर्थं नौमि नरोपमम् ॥ ३

कुमारकं विहाराग्रस्वामिनं धरणेश्वरम् ।
विकासं च चतुर्विंशत्यतीताः पान्तु वो जिनाः ॥ ४

### वर्तमानजिनाः

जगन्नाथं प्रभासं च संवरस्वामिनं श्रये ।
भरतेशं तथा दीर्घाननं विख्यातमेव च ॥ ५

अवसानं प्रबोधं च तपोनाथं च पापकम् ।
त्रिगरं सागरं वन्दे श्रीवासाख्यमहम्मतम् ॥ ६

सुकर्मेशं नमस्कुर्वे क्रमान्तिकाऽमलेन्द्रकौ ।
ध्वजासिकं प्रसादाख्यं विपरीताह्वयं तथा ॥ ७

मृगाङ्कं स्वामिनं वन्दे कपाटक-गजेन्द्रकौ ।
ध्यानजं चेत्यमी वर्त्तमानास्तीर्थङ्कराः श्रिये ॥ ८

**भाविजिनाः**

वसन्तध्वजमीडेऽहं तथा रेवतिमातुलम् ।
त्रिखम्भाघटितौ चैवावसं चापदादिकम् ॥ ९

भ्रमानन्दं त्रिनयनं विद्वांसं पृथुगं तथा ।
भगेन्द्रं गोस्वामिनं च नमस्यामि प्रवासिनम् ॥ १०

मण्डलोकं महावस्तू-दयार्य-स्वामिनौ श्रये ।
दुर्दरिक-प्रबोधेशाऽभयागान् नौम्यहं तथा ॥ ११

दफारिकं व्रतस्वामि-निधानकौ श्रये तथा ।
त्रिकर्मकं चेति भावि-जिनेशाः सन्तु शान्तये ॥ १२

इत्थं चतुर्थे भरतेऽतीताद्या जिनपुङ्गवाः ।
संस्तुता अद्भुतां दद्युः श्रीसङ्घतिलकश्रियम् ॥ १३

**पञ्चमभरतस्तवः ॥ ५ ॥**

**अतीतजिनाः**

पद्मचन्द्रं च रक्ताङ्गं पूजयेऽहमयोगकम् ।
सर्वार्थं मृगनाथं च हरिभद्रं गणाधिपम् ॥ १

पारित्रिकं ब्रह्मनाथं मुनीन्द्रं दीपकं तथा ।
राजर्षिं च विशाखं चाऽचिन्तितं चिन्तयाम्यहम् ॥ २

रविस्वामि-सोमदत्तौ जयस्वामिनमाश्रये ।
मोक्षनाथं तथा अग्निभानुं च धनुषाङ्गकम् ॥ ३

रोमाञ्चकं मुक्तिनाथं प्रसिद्धं च नमाम्यहम् ।
तथा जिनेशमित्येतेऽतीतास्तीर्थकृतः श्रिये ॥ ४

## वर्तमानजिनाः

पद्मप्रभं प्रभावं (कं) च बलनाथं युगेश्वरम् ।
सुषमाङ्गं बलातीतं मृगाङ्कं समुपास्महे ॥ ५

कलम्बकं पवित्राङ्गमथ नौमि निषेधकम् ।
पापाग्रहर-सुस्वामि-मुक्तिचन्द्रांस्तथा श्रये ॥ ६

अप्राप्तिक-नदीतट-मलधारि-सुसंयमान् ।
ईडे मलयसिंहं च क्षोभं देवधरं तथा ॥ ७

प्रयच्छन्तागमिकौ च विनीतस्वामिनं स्तुमः ।
रतानन्दं चेति वर्तमाना भवतुदो जिनाः ॥ ८

## भाविजिनाः

प्रभावकं विजयेन्द्रं सुभावं हृदि भावये ।
दिवाकर-भागधेयौ धनदं चापि पौषधम् ॥ ९

जिनदत्तं श्रये पार्श्वस्वामिनं मुनिसिंहकम् ।
आस्तिकं च भवानन्दं नृपनाथं नरायणम् ॥ १०

प्रथमाङ्कं भूपतिं च दृष्टांशुं भवभीरुकम् ।
नान्दनं भार्गवं चापि चेतोऽन्तः स्थापयेऽन्वहम् ॥ ११

परावसुं किल्बिषादं नवनासिकमर्चये ।
भरतेशं चेति भाविजिनास्सन्तु भयापहाः ॥ १२

इत्थं पञ्चमभरतेऽतीताद्या जिनपुङ्गवाः ।
संस्तुता अद्भुतां दद्युः श्रीसङ्घतिलकश्रियम् ॥ १३

## प्रथमैरवतस्तवः ॥ १ ॥

### अतीतजिनाः

पञ्चरूपं जिनहरं तथा सम्पुटिकं स्तुवे ।
उज्जयन्तं तथाऽधिष्ठायिकाख्यमभिनन्दनम् ॥ १

रत्नेशं रामेश्वराङ्गुष्ठिकविन्यासकाह्वयान् ।
अरोषं सुविधानं च प्रदत्तं नौमि निश्चितम् ॥ २

कुमारस्वामिनं सर्वशैलाख्यं च प्रभञ्जनम् ।
सौभाग्यं दिनकराह्वं संस्मरामि व्रताभिधम् ॥ ३

स्तौमि सिद्धिकरं शारीरिकं कल्पद्रुमाभिधम् ।
तीर्थादिं च मालेशं चेत्यतीताः पान्तु वो जिनाः ॥ ४

### वर्तमानजिनाः

बालचन्द्रं सुचन्द्रासिसेनाख्यौ नन्दिषेणकम् ।
ऋषिदत्तं व्रतधरं सोमचन्द्रं स्मराम्यहम् ॥ ५

दीर्घाननं शतायुष्कं सेवे शिवशताह्वयम् ।
श्रेयांसं स्वयंजलं च सिंहसेनोपशान्तकौ ॥ ६

गुप्तिसेनं सदावीर्यं पार्श्व-स्वाम्यभिधानकौ ।
मरुदेवं श्रीधराह्वं श्यामकोष्ठं समाश्रये ॥ ७

अग्निसेनाऽसिदत्तौ च वीरसेनं श्रयेतराम् ।
इत्येवं वर्तमाना वो हरन्तु दुरितं जिनाः ॥ ८

### भाविजिनाः

सिद्धार्थं च विमलाख्यं यशोघोषमभिष्टुमः ।
नन्दिषेणं तथा स्वर्गमङ्गलं वज्रधारिणम् ॥ ९

निर्वाणं धर्मध्वजं च सिद्धसेनं स्तवीम्यहम् ।
महासेनं रविमित्रं सत्यसेनाभिधानकम् ॥ १०

श्रीसेनं मोहसेनं च समञ्चामि स्वयं जिनम् ।
देवदत्तं सुव्रताह्वं जिनेन्द्रं च सुपार्श्वकम् ॥ ११

सुकोशलमनन्ताख्यं विमलामृतसेनकौ ।
वन्देऽग्निदत्तमित्येते भाव्यर्हन्तः शुभाय मे ॥ १२

इत्याद्यैरवतक्षेत्रेऽतीताद्या जिनपुङ्गवाः ।
संस्तुता अद्भुतां दद्युः श्रीसङ्घतिलकश्रियम् ॥ १३

## द्वितीयैरवतस्तवः ॥ २ ॥

### अतीतजिनाः

वज्रस्वामी-न्द्रदत्ताख्यौ सूर्यकाह्वं पुरूरवम् ।
स्वामिकमवबोधाख्यं विक्रमेशं नमाम्यहम् ॥ १

निर्घण्टक-हरीन्द्राख्यौ प्रणमामि प्रतेरितौ ।
निर्वाणं सूरिनामानं धर्महेतुं चतुर्मुखम् ॥ २

जनकेन्दुं स्वयंनाकं विमलादित्यनामकम् ।
देवप्रभ-धरणेन्द्रौ सतीर्थं समुपास्महे ॥ ३

उदयानन्द-शिवाख्यौ वरिवस्यामि धार्मिकम् ।
क्षेत्रस्वामि-हरिश्चन्द्रावित्यतीता जिना मुदे ॥ ४

### वर्तमानजिनाः

अपश्चिमं पुष्पदन्तमर्हन्तं सुचरित्रकम् ।
सिद्धानन्दं नन्दकं च पद्मरूपं तथा स्तुवे ॥ ५

....... भं च रुक्मीन्द्रं चित्तपालकम् ।
पेढाल-सिद्धस्वराख्याऽ-मृतेन्दु-स्वामिनामकान् ॥ ६

भोगलिङ्गं च सर्वार्थं मेघानन्दं तथा श्रये ।
नन्दिकेशं हरमधिष्ठायकं च स्वशान्तिकम् ॥ ७

नन्दिस्वामिनमानौमि कुण्डपार्श्वं विरोचनम् ।
इत्यमी वर्त्तमानाः स्युः सर्वज्ञाः सर्वसिद्धिदाः ॥ ८

### भाविजिनाः

वीरार्यं स्तौमि विजयप्रभं सत्यप्रभं तथा ।
महामृगेन्द्रं चिन्ताग्रमणिसञ्ज्ञमशोचितम् ॥ ९

श्रीधर्मेन्द्रमहं वन्दे तथा चैवोपवासितम् ।
पद्मचन्द्रं बाधकेन्द्रं चिन्ताहिकोत्तराहिकौ ॥ १०

अप्रासिकं देवजलं तारकं नौम्यमोघकम् ।
नागेन्द्रं नीलोत्पलं च प्रकम्पं च पुरोहितम् ॥ ११

उन्नतेन्द्रं पार्श्वसञ्ज्ञं निर्वर्चसमथाश्रये ।
वियोषितं चेति भाविजिनाः सन्तु शिवाय मे ॥ १२

इति द्वितीयैरवतेऽतीताद्या जिनपुङ्गवाः ।
संस्तुता अद्भुतां दद्युः श्रीसङ्घतिलकश्रियम् ॥ १३

## तृतीयैरवतस्तवः ॥ ३ ॥

### अतीतजिनाः

सुमेरुकं जिनकृतं ऋषिकल्प-स्ववृन्दकौ ।
निर्ममस्वामिनं वन्दे कुटिलकमनारतम् ॥ १

ऋद्धिमन्तममृतेन्द्रं शाखानन्दाह्वयं नुमः ।
कल्याणक-हरिभादौ बाहुस्वामिनमादरात् ॥ २

भार्गवं च सुभद्रेशं पञ्चपादं विशेषितम् ।
ब्रह्मचार्यऽ-सङ्ख्यगति-चारित्रेशानुपास्महे ॥ ३

परिणामित-काम्बोजौ निधिनाथं च कौशिकम् ।
सेवे धर्मेशमित्येतेऽतीताः स्युः शर्मणे जिनाः ॥ ४

## वर्तमानजिनाः

उपाहित-जयस्वामि-श्रीरामेन्द्राभिधानकान् ।
पुष्पकं मण्डिकं चैव प्रभानन्दमथाश्रये ॥ ५

स्तुवे मदनसिंहाख्यं हस्तीन्द्रं चन्द्रपालकम् ।
अश्वबोधं जनकार्दि विभूतिकमनारतम् ॥ ६

कुमारचन्द्रं सौवर्णं हरिप्रभमथाश्रये ।
प्रियमित्रं धर्मदेवं धर्मचन्द्रं प्रवाहितम् ॥ ७

नन्दिकमश्वातीतं चाऽपूर्वनाथमथ स्तुवे ।
चित्रकं चेत्यमी वर्तमानाः सिद्ध्यै जिनाधिपाः ॥ ८

## भाविजिनाः

रवीन्दुमभिवन्देऽहं तथा च कुसुमालिकम् ।
पृथ्वीमन्तं कुलपुरोधिकं धर्माभिधानकम् ॥ ९

विसोमं वरुणाभिख्याभिनन्दौ सर्वभावुकम् ।
सुदृष्टं मौष्टिकं भक्त्या सौपर्णिकमथाश्रये ॥ १०

सोमचन्द्रं क्षेत्राधिपं जिनेन्द्रं चक्रमेधिनम् ।
तमोरिपुं स्तुवे देवं निर्मितं कृपपार्श्वकम् ॥ ११

बहुनन्दाऽघोरिकाख्यौ दृष्टस्वामिविकुञ्चिकौ ।
श्रये वत्सेशमित्येते जिनाः सौख्याय भाविनः ॥ १२

इत्थं तृतीयैरवतेऽतीताद्या जिनपुङ्गवाः ।
संस्तुता अद्भुतां दद्युः श्रीसङ्घतिलकश्रियम् ॥ १३

## चतुर्थैरवतस्तवः ॥ ४ ॥

### अतीतजिनाः

कृतान्ताऽम्बरिकौ देवादित्यमष्टाहिकाभिधम् ।
चन्द्रनाथं वणिगाख्यं त्रिभानुमभिनौम्यहम् ॥ १

भजे ब्रह्मादि-वज्राङ्गौ तिरोहितमपापकम् ।
लोकोत्तरं लिङ्गधरं विद्योतिकं सुमेरुकम् ॥ २

सुभाषितं वत्सलाख्यं जिनेन्द्रं च तुषारकम् ।
भुवनस्वामिनं सेवेतरां चैव सुकालकम् ॥ ३

सुविधानं च वन्देऽहं हिमाकाशमसङ्क(का)यम् ।
त्र्यम्बकं चेतीमेऽतीता जिनाः स्युर्भवभेदिनः ॥ ४

### वर्तमानजिनाः

निशामिता-ग्राहिताख्या-वचिन्तिकमुपाश्रये ।
छद्मादि-तपोधनाह्वौ स्वर्नाथं च तपोनिधिम् ॥ ५

पुष्पकेतुं धार्मिकं च चन्द्रकेतुं प्रहारिणम् ।
वीतरागं तथोद्द्योतं पूजयामि तपोधिकम् ॥ ६

अतीतं मेरुदेवं च दामिकाख्यमभिष्टुमः ।
क्षमितं च शिलादित्यं विश्वनाथं नमाम्यहम् ॥ ७

तमोऽकन्दं सहस्रादिं तमोऽन्तिकं च ब्रह्मजम् ।
नौमीति वर्त्तमाना मे जिनाः स्युर्वाञ्छितार्थदाः ॥ ८

## भाविजिनाः

यशोधरं कृतार्हन्तमभयघोषमर्चये ।
निर्वाणकं व्रतवसुं रविराजाभिधानकम् ॥ ९

अश्वजितमृजुनशं तपश्चन्द्रं स्तुमस्तमाम् ।
शारीरिकं महासेनं सुग्रीवस्वामिनं तथा ॥ १०

दृढप्रहार्यम्बरिकौ वृषातीतं च तुम्बरुम् ।
सर्वशालं प्रतिजातं पूजयामि जितेन्द्रियम् ॥ ११

तपादि-रत्नाकराख्यौ देवेशं नौमि लाञ्छितम् ।
प्रवेशमित्यमी भाविदेवाः पुष्णन्तु वः शिवम् ॥ १२

इत्थं चतुर्थैरवतेऽतीताद्या जिनपुङ्गवाः ।
संस्तुता अद्‌भुतां दद्युः श्रीसङ्घतिलकश्रियम् ॥ १३

## पञ्चमैरवतस्तवः ॥ ५ ॥

## अतीतजिनाः

सुसम्भवं श्रियः फल्गुं श्रीश्रीपूर्वकनामकम् ।
सौन्दर्यगैरिकाभिख्यं तथा चैव त्रिविक्रमम् ॥ १

नारसिंहं मृगवसुं सोमेश्वर-सुभातकौ ।
विमल-विबोधनामानौ तथा सङ्गमकं स्तुवे ॥ २

मान्धातक-सुतेजस्कौ विद्याधर-सुलोचनौ ।
मानाधिक-पुण्डरीकौ नौमि चित्राङ्गनामकम् ॥ ३

माणिभद्रं सर्वकालं भूरिश्रवसमाश्रये ।
पुण्याङ्गमिति चातीतास्तीर्थनाथाः पुनन्तु नः ॥ ४

## वर्तमानजिनाः

गाङ्गेयं बलभद्रं च भीमकं च ध्वजासिकम् ।
सुभद्रं स्वामिनं चान्ते धारये हतिकाह्वयम् ॥ ५

नन्दिघोषं जगन्नाथं वज्राख्यं वज्रनाभिकम् ।
सन्तोषस्वामिनं सेवे सुधर्माणं तथैव च ॥ ६

फणादिं वीरचन्द्रं चाऽमोघनाथं स्तवीम्यहम् ।
स्वच्छं चाकोपकाऽकामौ तथा सन्तोषकाह्वयम् ॥ ७

शत्रुसेनं चक्षुष्मन्तं दयानाथं च कीर्त्तये ।
शुभं नौमीत्यमी वर्त्तमानाश्छिन्दन्त्वघं जिनाः ॥ ८

## भाविजिनाः

अदोषितं वृषस्वामि-विनयानन्दसञ्ज्ञकौ ।
मुनिनाथेन्द्रकौ चन्द्रबाहुं ध्यायामि सादरम् ॥ ९

ध्वजादित्यं वसुबोधं मूर्त्तिकं धर्मबोधकम् ।
देवाङ्ग-मरीचिकाह्वावभिनौमि सुजीवनम् ॥ १०

यशोधरं गौतमं च मुनिशुद्धं प्रबोधकम् ।
शतानीकं च चरितनाथं स्मृतिपथं नये ॥ ११

कृतार्थं वेदार्थनायं - सुधामानं स्मराम्यहम् ।
ज्योतिर्मुखं सूर्यकं चेत्यमी भाविजिना मुदे ॥ १२

इतीषुसङ्ख्यैरवतेऽतीताद्या जिनपुङ्गवाः ।
संस्तुता अद्भुतां दद्युः श्रीसङ्घतिलकश्रियम् ॥ १३

हेमचन्द्राभ्यर्थनया श्रीमद्देवेन्द्रसूरिणा ।
त्रिंशच्चतुर्विंशतिकास्तवाः दश विनिर्मिताः ॥ १

मथुरानगरीस्तूपे पट्टतः पूर्वसूरिभिः ।
लिपीकर्मीकृता एते सम्प्रदायोऽयमेव हि ॥ २

पू.मु. हंसविजयविरचितम्

## ६. ॥ श्रीत्रिंशच्चतुर्विंशतिजिननामस्तोत्रम् ॥

नत्वा सिद्धसमूहं च, ज्ञानमूर्तिजिनव्रजं ।
भरतैरावतस्थानां, जिनैः शाकं विदेहजैः ॥ १

वक्ष्ये जिनेशिनां त्रिंशच्चतुर्विंशतिनामजां ।
कालत्रितयजातानां नामाण्यघहराण्यहम् ॥ २

### ॥ जंबूद्वीपस्थविदेहद्वयवर्तमानजिननामानि ॥

वन्दे सीमन्धरं देवं, मन्दरेन्द्र हरिद्वयं ।
सीताया दक्षिणे भागे, साम्प्रतं प्रतिवर्त्तिनाम् ॥ ३

ध्याये युगन्धरं धीरं, सुदर्शनेन्द्रा सद्भवं ।
सीताया दक्षिणे भागे, वर्तमानं जिनेश्वरम् ॥ ४

आश्रयेऽहं सदा बाहुं, मेरोः पश्चिमदिग्गतं ।
शीतोदायमकाष्टायां, वर्तमानं जिनाधिपम् ॥ ५

सुबाहुं च जिनं वन्दे, मेरोः पश्चिमदिग्गतं ।
शीतोदव्युत्तरे भागे, तिष्ठन्तं साम्प्रतं शुभम् ॥ ६

### ॥ जंबूद्वीपस्थभरतैरावतयोः त्रिकालसम्भाविनां तीर्थंकराणां नामानि ॥

**वर्तमानचतुर्विंशतिः-**

वृषभोऽजितनाथश्च, श(स)म्भवश्चाभिनन्दनः ।
उक्तः सुमतिपद्माभः, सुपार्श्वश्च शशिप्रभः ॥ ७

सुविधिः शीतलः स्वामी, श्रेयांश्च वासुपूज्यकः ।
विमलानन्तधर्मौ वै, शान्तिकुन्थ्वरमल्लयः ॥ ८

सुव्रतौ नमि नेमी च, पार्श्वनाथोऽथ सन्मतिः ।
एते तीर्थकृतो जम्बू-द्वीपे भारतवर्तिनः ॥ ९

**अतीतचतुर्विंशतिः-**

निर्वाणः सागर उक्तो, महासाधुर्जिनेश्वरः ।
विमलप्रभशुद्धाभौ, श्रीधरो दत्तनायकः ॥ १०

अमलप्रभनाथेशो, उध्र्वरोऽग्निश्च संयमः ।
पुष्पाञ्जलिश्च तीर्थेशो जिनः शिवगणस्तथा ॥ ११

उत्साहो ज्ञाननेता च, परमेश्वर तीर्थराट् ।
विमलेश्वर(रो) यथार्थो (च), श्रीधरकृष्णसंज्ञकौ ॥ १२

ज्ञानशुद्धमतिर्भद्रः श्रीशान्तोऽमी जिनेशकाः ।
जम्बूद्वीपे भरतेऽत्र पूर्वेशा भारतवर्षजाः ॥ १३

**अनागतचतुर्विंशतिः-**

महापद्मः सूरदेवः श्रीप्रभश्च स्वयम्प्रभः ।
सर्वायुद्धो जयदेवो, जिनश्चोदयदेवकः ॥ १४

प्रभादेव उदंकश्च, प्रश्न(प्रसन्न) कीर्तिर्जयाह्वयः ।
पूर्णबुद्धिनिकषायो, विमलो विमलप्रभः ॥ १५

वहलो निर्मलश्चित्रगुप्तः समादिगुप्तकः ।
श्रीस्वयम्भूर्जिनेशानो, कन्दर्पो जयनामकः ॥ १६

श्रीविमलो दिव्यवादोऽनन्तवीरो जिनेश्वरः ।
एते तीर्थकृतो जम्बूद्वीपभारतभाविनः ॥ १७

**वर्तमानचतुर्विंशतिः-**

बालचन्द्रः सुव्रतोऽग्निसेनश्च नन्दिसेनकः ।
श्रीदत्तश्च व्रतन्धरः, शो(सो)मचन्द्र जिनेश्वरः ॥ १८

धृतिदीर्घः शतपुष्पा, शिवाच्छिन्नशतो मुनिः ।
श्रेयान् श्रुतन्धरस्वामी, सिंहसेनोपशान्तिकौ ॥ १९

गुप्ता(प्त)सेनजिनेशानौ, जीयादनन्तवीर्यकः ।
पार्श्वस्वाम्यभिधानेशो, महादेवः श्रीयन्धरः ॥ २०

स्या(श्या)मकण्ठाऽसिप्रभाह्वौ ह्यग्निदत्तो जिनेश्वरः ।
वीरसेन इमे जम्बूस्थैरावतजिनेश्वराः ॥ २१

**अतीतचतुर्विंशतिः-**

पञ्चरूपो जिनधरः श्रीकः श्रीपतिको जिनः ।
ऊर्जयन्ति जिनेशश्च(श्चा)धिक्षायिकोऽभिनन्दनः ॥ २२

श्रीरत्नेशजिनो रामेश्वरो गोस्थितसंज्ञकः ।
विनारगो भूदरोषश्च, सुविधानप्रदत्तकौ ॥ २३

कुमारसर्वशैलेशः प्रभञ्जन(ना)धिनाधिपः ।
सौभाग्यश्च दिनकरो, व्रतबिम्बजिनेश्वरः ॥ २४

सिद्धङ्करसुज्ञानश्च, शरीरकल्पपादपः ।
जिनतीर्थफलेसा(शा)ख्यो, विरमप्रभतीर्थराट् ॥ २५

एते तीर्थकृतो जम्बूस्थौ(स्थै)रावते ते भवाः ।
अतीताः कथिता हंसैः, श्रेयसे सन्तु नः सदा ॥ २६

**अनागतचतुर्विंशतिः-**

सिद्धार्थो विमलस्वामिन्, जयघोषो जिनेश्वरः ।
नन्दिसेनजिनेशानो, स्वर्गमङ्गलनायकः ॥ २७

वज्रधारी च निर्वाणोऽधि(ध)र्मध्वंसजिनाधिराट् ।
सिद्धसेनो महासेनो, रविमित्रो जिनेश्वरः ॥ २८

सत्यसेनोऽपि श्रीचन्द्रो, महीचन्द्रो श्रुतं जिनः ।
देवसेनः सुव्रताख्य, श्रीजिनेन्द्र सुपार्श्वकः ॥ २९

सुलोकोऽनन्तजिनेशो (च), विमित्रसेनकः स्मृतः ।
अग्निदत्तो जिना एते, जम्ब्वैरावतभाविनः ॥ ३०

**॥ पूर्वधातकीखण्डस्थविदेहविहरमाणानां चतुस्तीर्थंकराणां नामानि ॥**

सञ्जा(सुजा)तश्च स्वयम्प्रभः, ऋषभोऽनन्तवीर्यकः ।
धातकीखण्डपूर्वस्थ मेरुविदेहजा जिनाः ॥ ३१

**॥ पूर्वधातकीखण्डस्थभरतैरावतयोः त्रिकालसम्भविनां तीर्थंकराणां नामानि ॥**

**वर्तमानचतुर्विंशतिः-**

श्रीयुगादिश्च सिद्धान्तो, महेशः परमार्थकः ।
समुद्धरजिनेशानो, भूधरो द्योतकोऽर्यमाः ॥ ३२

अभयश्चात्र कम्पेशः श्रीपद्मः पद्मनन्दिकः ।
प्रियङ्करोऽथ सुकृतो, भद्रेशो मुनिचन्द्रकः ॥ ३३

पञ्चमुष्टिः त्रिमुष्टिश्च, श्रीगाङ्गीको गणप्रभुः ।
सर्वाङ्गो देवनार्थोऽपि, ब्रह्मेन्द्रो नाथ इत्यपि ॥ ३४

**अतीतचतुर्विंशतिः-**

रत्नप्रभोऽमितनाथो, श(स)म्भवश्चाकलङ्कक: ।
चन्द्रःस्वामी शुभङ्करः, तत्त्वज्ञानः स्वरूपक: ॥ ३५

स्वामी पुरन्दरः स्वामी, देवदत्तो जिनाधिपः ।
वासवदत्तसंज्ञश्च, श्रेयांसो विश्वरूपक: ॥ ३६

तपस्तेजा प्रतिबोधि, सिद्धार्थः संयमो जिनः ।
अमलो प्रभदेवेन्द्रः प्रकरो विश्वसेनक: ॥ ३७

श्रीमेघनन्दिस्त्रिजेता ह्येते वै भारते जिनाः ।
भूतार्थाः पूर्वधातक्यां, श्रेयसे सन्तु नः सदा ॥ ३८

**अनागतचतुर्विंशतिः-**

सिद्धनाथो जिनेशानः सम्यग्गुणजिनेश्वरः ।
जिनेन्द्रनाथ नामा च, सम्पन्नाथजिनाधिपः ॥ ३९

सर्वस्वामी मुनीशोऽथ, विशिष्टपरमार्थकौ ।
ब्रह्मशान्तिः सुपु(पू)र्वेशो, कामुको ध्याननामक: ॥ ४०

श्रीकल्पजिनसंज्ञोऽथ, संवरः स्वस्त्यजेनक: ।
आनन्दरविप्रभाख्यौ, चन्द्रप्रभः सुनन्दक: ॥ ४१

सुकर्णश्च सुकर्मा च, ह्यमेलपार्श्वनाथक: ।
शाश्वतो भाविनः पूर्व-धातकी भारते जिनाः ॥ ४२

**वर्तमानचतुर्विंशतिः-**

अपार्श्वमः जिनः पुष्पदन्तो ह्युर्ध्व सुचरित्रक: ।
सिद्धानन्दजिनेशानो, नन्दक: पद्मरूपक: ॥ ४३

जिन उदयनाभिश्च, श्रीरुक्मेन्दुकृपालकः ।
जिनः पौष्टिलः श्रीसिद्धेस्वरोऽमृतेन्दुसंज्ञकः ॥ ४४

श्रीस्वामी सेनलिङ्गीशः, श्रीसर्वरथनामकः ।
मेघानन्दजिनेशानो, नन्दिकेशो हरिर्जिनः ॥ ४५

अधिष्ठायिकसंज्ञोऽथ, श्रीशान्तिकजिनेश्वरः ।
नन्दस्वामी जिनकुन्दः, पार्श्वदेवो विरोचनः ॥ ४६

एते तीर्थकृतस्सन्तु, वर्तमानाः स्तुता मुदे ।
धातकी पूर्वमेरुस्थैरावतस्था जगन्नुताः ॥ ४७

**अतीतचतुर्विंशतिः-**

वज्रस्वामी जिनैरुक्त, आदौ च देवदत्तकः ।
सूर्यस्वामी जिनेशानः, पुरुषोत्तमनामकः ॥ ४९

शरण्यस्वामी जिनेशानो, विबोधो विक्रमस्तथा ।
निर्घण्टको हरिश्चन्द्र, परत्रेरितनाथकः ॥ ५०

निर्वाणनाथनामाख्यो, धर्महेतुश्चतुर्मुखः ।
सुकृते दुःश्रुताध्विश्च, विमलादित्यसंज्ञकः ॥ ५१

देवव्रतजिनेशानो धरणेन्द्रः सुतीर्थकः ।
उदयानन्दसर्वस्थौ, श्रीधर्मको जिनेश्वरः ॥ ५२

क्षेत्रस्वामी हरिश्चन्द्रोऽमी जिनाः सन्तु शान्तये ।
धातकीपूर्वमेरोश्चैरावतेऽतीतकाः सताम् ॥ ५३

**अनागतचतुर्विंशतिः-**

श्रीवीरश्च जिनेशानो, विजयप्रभसंज्ञकः ।
सत्यप्रभजिनाधीशो, महामृगेन्द्र संज्ञकः ॥ ५४

चिन्तामणिरशोकी च, द्विमृगेन्द्रोपवासकौ ।
पद्मचन्द्रजिनेशानो, बोधकेन्दुर्जिनेश्वरः ॥ ५५

चिन्ताहेमजिनाधीशोत्साहकोपासिवोसिनः ।
श्रीदेवज्ञलनामा च नारिको नरनाद्यकः ॥ ५६

श्रीनागेन्द्रजिनाधीशो नीलोत्पलप्रकम्पकौ ।
श्रीपुरोहितभेदी च, पार्श्वनाथो जिनेश्वरः ॥ ५७

निर्वागभेदि विरोशिकाधातक्यैरावताजिना ।
भाविनो विश्रुता हंसैः श्रेयसे सन्तु नः सदा ॥ ५८

**॥ पश्चिमधातकीखण्डस्थविदेहद्वयविहरमाण-चतुस्तीर्थंकरनामानि ॥**

सुरप्रभो विशालादि, प्रभो वज्रधरस्व(श्व) हि ।
चन्द्राननो जिनादि प्राग्, धातक्यास्तु विदेहके ॥ ५९

**॥ पश्चिमधातकीखण्डस्थभरतैरावतयोः त्रिकालसम्भाविनां तीर्थंकरनामानि ॥**

**वर्तमानचतुर्विंशतिः-**

विश्वचन्द्रो जिनेशानो, कपिलो वृषभस्तथा ।
प्रियतेजा जिनाधीशो, प्रशमो विषमाङ्गकः ॥ ६०

चारित्रः श्रीप्रशा(सा)दित्यो, मञ्जुकेशी जिनेश्वरः ।
पीतवासा जिनाधीशो, सुराधिपः जिनेश्वरः ॥ ६१

दयानाथः सहश्रा(स्रा)दिभुजः श्रीनृपसिंहकः ।
ऐरावतो जिनो बाहुजिनः श्रीर्मल्लयोगकः ॥ ६२

अयोगो नाशदेवेशः, श्रीकामारिवराङ्गकौ ।
नेमिनाथो जिनेशानो, भारते सन्तु नः सदा ॥ ६३

**अतीतचतुर्विंशतिः-**

वृषभप्र(प्रि)यमित्रश्च, शान्तिश्च समु(सुम)तिर्जिनः ।
उक्तवादी जिनाधीशो, ह्यतिव्यक्तजिनेश्वरः ॥ ६४

कालाशेन जिनेशानो, श्रीकर्माजितबुद्धकौ ।
श्रीप्रव्रजिनसौधर्मौ, तमोदीपश्च वज्रकः ॥ ६५

बुद्धनाथः प्रबन्धेशो, ह्यतीतप्रमुखो जिनः ।
पल्योपमस्त्वकोपश्च, तिष्ठतो मृगनायकः ॥ ६६

श्रीदेवेन्द्रपदेस्थश्च, शिवनाथो जिना अमी ।
भूताः पश्चिमधातक्या, भारते सन्तु नः श्रिये ॥ ६७

**अनागतचतुर्विंशतिः-**

रक्तेशजिनयश्चक्रहस्तः श्रीकृतनाथकः ।
परमेश्वरनामा च, सुमूर्त्तिकजिनेश्वरः ॥ ६८

द्विजराजजिन श्रेयोगताश्चारुजनाथकः ।
देयावनाथ दयाधिक्यः पुष्पनाथो तृतीयकः ॥ ६९

प्रतिभूतश्च नागेन्द्रः, तपोधिकवशाननौ ।
अरण्यको दशानीको, स्वाच्छिको भाविनो जिनाः ॥ ७०

अमी पश्चिमधातक्या, भारते सन्तु नो मुदे ॥ ७१

**वर्तमानचतुर्विंशतिः-**

साधितः श्रीजिनः स्वामीस्तमित्येन्द्रोत्यनन्दकः ।
पुष्पकोत्फुल्लनामा च, मुण्डिकः प्रहितो जिनः ॥ ७२

जिनो मदनसिन्धुश्च, हसदिन्द्रो जिनेश्वरः ।
चन्द्रपाश्र्वोऽब्जहस्तश्च जिनवल्लभसंज्ञकः ॥ ७३

विभूतिकः कुं(कु)कुब्जेशः, सुपर्णो हरिवासकः ।
प्रियमित्रजिनो धर्मदेवः प्रिर्य(य)रतो जिनः ॥ ७४

नन्दिनाथो जिनेशानो, स्थानिकः पर्वनाथकः ।
पार्श्वनाथो जिनस्वामी, विचित्राल्हा(ह्ला)दयो जिनाः ॥ ७५

एते पश्चिमधातक्यैरावते वर्तिनो जिनाः ॥ १६

**अतीतचतुर्विंशतिः-**

सुमेरुश्च जिनेशानो, जिनोऽजितकृतो वरः ॥ ७६

श्रीकैटभजिनाधीशः, प्रस(श)स्तादपि निर्म्मदः ।
जिनो कुलकरस्वामी, वर्द्धमानोऽमृतेन्द्रकः ॥ ७७

स(श)ङ्खानन्दजिनः कल्पाकृतिः श्रीहरिनाथकः ।
बाहुस्वामी जिनाधीशो, भार्गवोऽथ सुभद्रकः ॥ ७८

विपातित जिनेशानो, विपोषितजिनेश्वरः ।
ब्रह्मचारी जिनेशानो, साक्षिकः सुचरित्रकः ॥ ७९

श्रीपारिणामिको देवः श्रीस्वासतनिधिर्जिनः ।
निधिनाथः कौशिकेशः ह्युक्तो धर्मेश इत्यपि ॥ ८०

एते पश्चिमधातक्यैरावतेऽतीतका जिनाः ॥ १७

**अनागतचतुर्विंशतिः-**

श्रीरवीन्दुर्जिनेशानो, सौकर्मालिकसंज्ञकः ॥ ८१

पृथ्विवान् कुलरत्नश्च धर्मनाथः सुसोमकः
श्रीवरुणो जिनाधीशो, अभिनन्दनसंज्ञकः ॥ ८२

सर्वनाथः सुदृष्टिश्चः सौष्टिः सुधान्यनायकः ।
सोमचन्द्रजिनः क्षेत्राधिनाथः श्रीसदन्तिकः ॥ ८३

श्रीजयन्तजिनाधीशः, तमोरिपुजिनेश्वरः ।
जिनो निर्मितदेवश्च, कृतपार्श्वजिनेश्वरः ॥ ८४

बोधिलाभजिनेशानो, बाहुनन्दिर्जिनेश्वरः ।
दृष्टिस्वामी जिनाधीशः, श्री श्रीकुङ्कुमनाभिकः ॥ ८५

वक्त्रेशोऽपरधातक्यैरावते भाविनो जिनाः ।
संसारदुःखनाशाय, कृताः सन्तु सु(शु)भाय च ॥ ८६

**॥ पूर्वपुष्करस्थविदेहद्वयविहरमाणचतुस्तीर्थंकरनामानि॥**

चन्द्रबाहुर्भुजङ्गेश ईश्वरो नमिसत्प्रभुः ।
पूर्वपुष्करमेरुस्थ-विदेहद्वयजा जिनाः ॥ १

## ॥ पूर्वपुष्करस्थभरतैरावतयोस्त्रैकाल्यसम्भाविनां तीर्थंकराणां नामानि ॥

**वर्तमानचतुर्विंशतिः-**

जगन्नाथः प्रभासारः, सुरस्वामी जिनाधिपः ।
भरतेशो जिनो दीर्घजिनो विख्यातकीर्त्तिकः ॥ १

अवसानी प्रबोधादिनाथस्तपोविधानकः ।
पावकः स्त्रिपुरेशाख्यः, सौगतो वासवस्तथा ॥ २

स्वर स्वरस्वामीजिनाधिपः (?) २

मनोहरः सुकर्मेशः दृष्टिसेवितसंज्ञकः ।
अमलेन्द्रो धर्मवासः, प्रशा(सा)दजिननायकः ॥ ३

प्रभामृगेन्द्रनामा च, विभ्युद्धितकलङ्कः ।
स्फटिकप्रभनामा च, गजेन्द्रो ध्यानयोजनः ॥ ४

पूर्वपुष्करपे(प)क्षे च, भारते वर्तिनो जिनाः । ॥ १९

**अतीतचतुर्विंशतिः-**

दमनेन्द्रजिनो मूर्तिस्वामी(मि)नी रङ्गनायकः ॥ ५/६

प्रलम्बितजिनः पृथ्वीपतिश्चारित्रसन्निधिः ।
अपराजितनामा च, सुबुद्धिकश्च बुद्धिराट् ॥ ७

वैतालिकस्त्रिमुष्टीशो, मुनिबोधकलापकः ।
तीर्थस्वामी जिनो धर्मधीजिनोः धरणेशकः ॥ ८

प्रभुर्विश्वादिनाथश्च, अनादिप्रभुसंज्ञकः ।
सर्वतीर्थो निरोपम्यो, कौमारिक जिनेश्वरः ॥ ९

वरविहारनामा च, धरणेशो विकाश(स)कः ।
पूर्वपुष्कर एते च, भारतेऽतीतका जिनाः ॥ १०(२०)

**अनागतचतुर्विंशतिः-**

संवतध्वजनामा च, त्रिजयन्तजिनेश्वरः ।
त्रिस्तम्भः परिब्रह्मा च, ह्यवालिशः प्रवादिकः ॥ ११

भूमानन्दजिनेशानो, उक्तः त्रिनयनो जिनः ।
श्रीविद्वान् परमात्मादि त्र(त्रि)भङ्गो भूमिकेन्द्रकः ॥ १२

गोस्वामी भूविकल्याणः, प्रवासितः सुमण्डलः ।
महावसुददिव्योजा, ज्योतिप्रबोधकौशिकौ ॥ १३

अभयाङ्को जिनेशानः, प्रमितिर्जनसत्तमः ।
दस्फारिको व्रतस्वामी, श्रीनिधानस्त्रिकर्मकः ॥ १४

पूर्वपुष्कर एते च, भारते भाविनो जिनाः ॥ २१

**वर्तमानचतुर्विंशतिः-**

शङ्करो क्ष(ख)र्वंसो नग्नः श्रीनग्नाधिपतिर्जिनः ॥ १५

नष्टपाखण्ड सुस्वप्नवेदौ तपोधनो जिनः ।
पुष्पकेतुर्जिनेशानो, धार्मिकश्चन्द्रकेतुकः ॥ १६

जिनेशानोऽनुरक्तादि, ज्योतिः वीतरागकः ।
उद्योतश्च तपोपेक्षो मधुनाथो जिनेश्वरः ॥ १७

मरुदेवो दमस्वामी, वृषभेषशिलाततः ।
विश्वनाथो महेन्द्रश्च, नन्दस्तमोनिभो जिनः ॥ १८

ब्रह्मजो वर्तिनः पूर्वपुष्करैरावते जिनाः ॥ २२

**अतीतचतुर्विंशतिः-**

कृत्येष्टश्च यदिष्टश्च देवादित्यजिनेश्वरः ॥ १९

अस्थानिकः प्रचण्डश्च, श्रीवेणुकस्त्रिवेणुकः ।
वज्रब्रह्मः सुवज्राङ्गो, ह्यविरोधान्त्यपापकः ॥ २०

लोकोत्तर जिनाधीशो जिनो जलधिशेषकः ।
विद्योतनः सुमेरुश्च, जिनो भावितवत्सलः ॥ २१

जिनालः श्रीतुषारश्च भुवनेशः सुकामकः ।
देवादिदेवनामा च, ह्यकारिमश्च विम्पतः ॥ २२

पूर्वपुष्कर एते चैरावतेऽतीतका जिनाः ।

**अनागतचतुर्विंशतिः-**

यशोधरजिनेशानो, सुकृतो नयघोषकः ॥ २३

निर्वाणश्रीजिनेशी(शा)नो जिनो व्रतवशो वरः ।
अनिद्राजजिनेशानो, श्रीजनार्जुनसंज्ञकः ॥ २४

तपश्चन्द्रजिनाधीशो, सोरिकेशो महेशिनः ।
सुसुग्रीवजिनेशानो, जिनेन्द्राय जिनेश्वरः ॥ २५

अवतीरको दयातीतः सुवरः सर्वशीलकः ।
प्रतिजानजिनेशानो, जितेन्द्रिय जिनेश्वरः ॥ २६

तपत्योरत्नादिकरो, देवेशः लाञ्छनः प्रभुः ।
विदेहो भामि(वि)नः पूर्वपुष्करैरावते जिनाः ॥ २७

**पश्चिमपुष्करविदेहद्वयवर्तमानचतुस्तीर्थंकराणां नामानि**

वीरसेनो महाभद्रः, जयदेवो जिनेश्वरः ।
जितवीर्या विदेहेऽमी जिनाः पश्चिमपुष्करे ॥ २८

**वर्तमानचतुर्विंशतिः-**

अथ पश्चि(म) कथ्यन्ते

सर्वाङ्गस्वामी पद्मादिकरः पद्मकरस्तथा ।
बलनाथश्च योगेशो, सूक्ष्माङ्गश्च जिनेश्वरः ॥ २९

जिनव्रतचलातीतकलंवकजिनेश्वरः ।
परत्यागोऽथ स्वेधाक्षः, सुस्वामी मुक्तिचन्द्रकः ॥ ३०

अप्राशिकजिनेशानो, जयचन्द्रमदम्भकः ।
मालाधारी जिनेस(श)श्च, सुसंयमजिनेश्वरः ॥ ३१

जिनो मलयसिन्धुश्च, धरो देवधरस्तथा ।
जिनेशश्च सुसंयेमी, सुसंयमजिनेश्वरम् ॥ ३२

रतानन्द प्रतीच्यां तु, पुष्करे भारते जिनाः ।
वर्तमाना जिना एते, जिनोऽथ पद्मचन्द्रकः ॥ ३३

**अतीतचतुर्विंशतिः-**

रत्नाङ्गो योगिकः स्वामी, सर्वार्थकृषिनायकः ।
हरिभद्रो जिनाधीशो, गुणाधिपः परत्रकः ॥ ३४

ब्रह्मनाथो मुनिश्चन्द्रः, दीपकोऽथ जिनेश्वरः ।
राजर्षिश्च विशालश्च, नन्दितो रविनायकः ॥ ३५

सोमदत्तो जयस्वामी, मोक्षनाथश्च भानुकः ।
धनुःसाङ्गजिनेशानो, रोमाञ्चकजिनेश्वरः ॥ ३६

मुक्तिनाथः प्रसिद्धश्च, जिनेशोऽतीतका जिनाः ।
प्रतीताः पुष्करार्द्धेऽमी, भारते सन्तु नो मुदे ॥ ३७

**अनागतचतुर्विंशतिः-**

प्रभावकजिनेशानो, विनतेन्द्रः प्रभावकः ।
जिनो दिनकरः स्वामी, ह्यगस्तेजा जिनेश्वरः ॥ ३८

धनदत्तो जिनेशानो, पारेशो जिनदत्तकः ।
पार्श्वनाथ जिनेशानो, मुनिसन्ध्वस्तिकौ जिनौ ॥ ३९

भावनीकजिनेशानो, नृपनाथो जिनेश्वरः ।
नारायणजिनाधीशः प्रशस्ताकाश्च भूपतिः ॥ ४०

सुदृष्टिर्भवभीतश्च, नन्दनो भार्गवो जिनः ।
जिनः सुवसुनामा च, पाराशर्यजिनेश्वरः ॥ ४१

वनवासीजिनेशानो, भरतेशो जिना अमी ।
प्रतीची पुष्कराद्धे स्युर्भारते भाविनो जिनाः ॥ ४२

**वर्तमानचतुर्विंशतिः-**

गाङ्गेयो नसु(?) वादश्च, भीमो दयाधिको जिनः ।
सुभद्रस्वामीनामा च, दनीशो(?) नन्दिघोषकः ॥ ४३

रूपवीर्योऽथ व्र(व)ज्रादिनाभ्रसन्तोषसंज्ञकः ।
श्रीसुधर्मो जिनेशानो, प्रणीन्द्रो(फणीन्द्रो) वीरचन्द्रकः ॥ ४४

मेधानीकजिनेशश्च, कोपाक्षयस्त्वकामकः ।
धर्मधामजिनः सूक्तः, सेतः क्षेमागसंज्ञकः ॥ ४५

दयानाथजिनेशानः कीर्तियः सु(शु)भसेनकः ।
प्रतीची पुष्करार्द्धे चैरावते वर्तिनो जिनाः ॥ ४६

**अतीतचतुर्विंशतिः-**

उपशान्तजिनाधीशः, श्रीफलो जिनसंज्ञकः ।
जिनः पूर्वा(र्वा)शसौन्दर्यो, श्रीगौराङ्गकत्रिविक्रमौ ॥ ४७

नरसिंहो जिनाधीशो, जिनो मृगवसुर्वरः ।
सोमेश्वरजिनेशानो, सुधारसजिनेश्वरः ॥ ४८

अपापमलसंज्ञैकः, विबोधः सन्धिको जिनः ।
मान्धाता च जिनेशादि तेजा विद्याधरो जिनः ॥ ४९

सुलोचनश्च मौनादि, निधिस्त्रीपुण्डरीककौ ।
जिनश्चित्रजिनाधीशो, मणिरिन्द्रजिनेश्वरः ॥ ५०

जिनः सर्वकलो भूरिः श्रवापुण्याङ्गसंज्ञकः ।
प्रतीची पुष्करार्द्धे चैरावतेऽतीतका जिनाः ॥ ५१(२९)

**अनागतचतुर्विंशतिः-**

अदोषिकं जिनाधीशो, वृषभः श्रीजिनेश्वरः ।
विनयानन्दजिनेशानो, मुनिभानूरवेन्द्रकः ॥ ५२

चन्द्रकेतुर्ध्वजादित्यो, वसुबोधश्च मुक्तगः ।
धर्म्मबोधश्च देवाङ्गो, मारिचीकः सुजीविनः ॥ ५३

यशोधरो जिनः स्वामी, गौतमो मुनिसु(शु)द्धकः ।
प्रबोधिकजिनाधीशः, सदानिकश्चरित्रराट् ॥ ५४

सदानन्दः-स्वबोधार्थ-बन्धकाख्यः सुधानिकः ।
ज्योतिमुचिसुरार्थश्च, हंसैरेतैस्स्तुता जिनाः ॥ ५५

प्रतीची पुष्करार्द्धे चैरावते भाविनो जिनाः ।
भरतैरावते क्षेत्रे, पञ्चके सन्तु सम्भवाः ॥ ५६(३०)

जिनार्विंशतिके सप्तशतसङ्ख्यामुदे च वः ।
सन्तु पञ्चविदेहस्था जिना विंशतिसङ्ख्यकाः ॥ ५७

हंसाभिधो विजयकीर्ति च पादपद्म-
भृङ्गश्चकार सह विंशतिसङ्ख्यकैश्च ।
वैदेहकैः जिनवरैस्स्तवनं जिनानां,
ऐरावतेषु भरतेषु च नामबद्धम् ॥ ५८

**॥ इति श्री त्रिंशच्चतुर्विंशतिजिननामस्तोत्रं संपूर्णम् ॥**

पू.आ. श्री समन्तभद्रसूरिविरचितम्

# ७. ॥ श्रीचतुर्विंशतिजिनस्तोत्रम् ॥

**( मुरजबन्धः )**

## श्री ऋषभ-जिन-स्तुतिः

श्रीमज्जिनपदाऽभ्याशं प्रतिपद्याऽऽगसां जये ।
कामस्थानप्रदानेशं स्तुतिविद्यां प्रसाधये ॥ १

मुरजबन्धो गोमूत्रिकाबन्धश्च-

स्नात स्वमलगम्भीरं जिनामितगुणार्णवम् ।
पूतश्रीमज्जगत्सारं जना ! यात क्षणाच्छिवम् ॥ २

**( अर्द्ध भ्रमगूढपश्चार्द्धः )**

धिया ये श्रितयेतार्त्या यानुपायान्वरानताः ।
येऽपापा यातपारा ये श्रियाऽऽयातानतन्वत ॥ ३

आसते सततं ये च सति पुर्वक्षयालये ।
ते पुण्यदा रतायातं सर्वदा माऽभिरक्षत ॥ (यु.) ४

**( साधिकपादाभ्यासयमकः )**

नतपीलासनाशोक सुमनोवर्षभासितः ।
भामण्डलासनाऽशोकसुमनोवर्षभासितः ॥ ५

**( गुप्तक्रियो मुरजबन्धः )**

दिव्यै र्ध्वनिसितच्छत्रचामरैर्दुन्दुभिस्वनैः ।
दिव्यैर्विनिर्मितस्तोत्रश्रमदर्दुरिभिर्जनैः ॥ (यु.) ६

यतः श्रितोपि कान्ताभिर्दृष्टा गुरुतया स्ववान् ।
वीतचेतोविकाराभिः स्रष्टा चारुधियां भवान् ॥ ७

विश्वमेको रुचामाऽऽको व्यापो येनार्य्य ! वर्त्तते ।
शश्वल्लोकोऽपि चाऽलोको द्वीपो ज्ञानार्णवस्य ते ॥ ८

श्रितः श्रेयोऽप्युदासीने यत्त्वय्येवाऽश्नुते परः ।
क्षतं भूयो मदाहाने तत्त्वमेवार्चितेश्वरः ॥ ९

**( गतप्रत्यागतार्द्धः )**

भासते विभुताऽस्तोना ना स्तोता भुवि ते सभाः ।
याः श्रिताः स्तुत ! गीत्या नु नुत्या गीतस्तुताः श्रिया ॥ १०

**( श्लोकयमकः )**

स्वयं शमयितुं नाशं विदित्वा सन्नतस्तु ते ।
चिराय भवते पीड्यमहोरुगुरवेऽशुचे ॥ ११

स्वयं शमयितुं नाशं विदित्वा सन्नतः स्तुते ।
चिराय भवतेपीड्य महोरुगुरवे शुचे ॥ (यु.)१२

**( प्रथमपादोद्भूतपश्चार्द्धैकाक्षरविरचितश्लोकः )**

ततोतिता तु तेतीतस्तोतृतोतीतितोतृतः ।
ततोऽतातिततोतोते ततता ते ततोततः ॥ १३

**( एकाक्षरविरचितैकैकपादः श्लोकः )**

येयायायाययेयाय नानानूनाननानन ।
ममाममाममामामिताततीतिततीतितः ॥ १४

( पादाभ्याससर्वपादान्तयमकः, युग्मकयमकः )

गायतो महिमायते गा यतो महिमाय ते ।
पद्मया स हि तायते पद्मयासहितायते ॥ १५

## श्री अजितजिन-स्तुतिः

( श्लोकयमकः )

सदक्षराजराजित प्रभो दयस्व वर्द्धनः ।
सतां तमो हरन् जयन् महो दयापराजितः ॥ १६

सदक्षराजराजित प्रभोदय स्ववर्द्धनः ।
स तान्तमोह रञ्जयन् महोदयापराजितः ॥ १७

## श्री शम्भव-जिनस्तुतिः

( अर्द्ध भ्रमः )

नचेनो न च रागादिचेष्टा वा यस्य पापगा ।
नो वामैः श्रीयतेऽपारा नयश्रीर्भुवि यस्य च ॥ १८

पूतस्वनवमाचारं तन्वायातं भयादुचा ।
स्वया वामेश पाया मा नतमेकार्च्य शंभव (यु.) ॥ १९

( अर्द्ध भ्रमः )

धाम स्वयममेयात्मा मतयादभ्रया श्रिया ।
स्वया जिन विधेया मे यदनन्तमविभ्रम ॥ २०

## श्री अभिनन्दनजिनस्तुतिः

( अर्द्ध भ्रमः )

अतमः स्वनतारक्षी तमोहा वन्दनेश्वरः ।
महाश्रीमानजो नेता स्वव मामभिनन्दन ॥ २१

( गर्भे महादिशि चैकाक्षरश्चतुरक्षरचक्रश्लोकः । )

नन्द्यनन्तर्द्ध्यनन्तेन नन्तेनस्तेऽभिनन्दन ।
नन्दनर्द्धिरनम्रो नम्रो न नष्टेऽभिनन्द्य न ॥ २२

( गर्भे महादिशि चैकाक्षरचक्रश्लोकः )

नन्दनश्रीर्जिन त्वा न नत्वा नर्द्धया स्वनन्दि न ।
नन्दिनस्ते विनन्ता न नन्तानऽन्तोभिनन्दन ॥ २३

( गर्भमहादिशैकाक्षरचक्रश्लोकः )

नन्दनं त्वाप्यनष्टो न नष्टोऽनत्वाभिनन्दन ।
नन्दनस्वर नत्वेन नत्वेनः स्यन्न नन्दनः ॥ २४

श्रीसुमतिजिन-स्तुतिः

( समुद्गकयमकः। )

देहिनो जयिनः श्रेयः सदाऽतः सुमते ! हितः ।
देहि नोजयिनः श्रेयः स दातः सुमतेहितः ॥ २५

( चक्रश्लोकः )

वरगौरतनुं देव वन्दे नु त्वाक्षयार्ज्जव ।
वर्जयार्त्तिं त्वमार्याव वर्यामानोरुगौरव ॥ २६

श्रीपद्मप्रभ-जिन-स्तुतिः।

( अर्द्ध भ्रमः )

अपापापदमेयश्रीपादपद्म प्रभोऽर्दय ।
पापमप्रतिमाभो मे पद्मप्रभ मतिप्रद ॥ २७

( गतप्रत्यागतपादयमकश्लोकः )

वन्दे चारुरुचां देव भो वियाततया विभो ।
त्वामजेय यजे मत्वा तमितांतं ततामित ॥ २८

**श्रीसुपार्श्वजिन-स्तुतिः**

स्तुवाने कोपने चैव समानो यन्न पावकः ।
भवान्नेकोपि नेतेव त्वमाश्रेयः सुपार्श्वकः ॥ २९

**श्री चन्द्रप्रभजिन-स्तुतिः**

चन्द्रप्रभो दयोजेयो विचित्रेऽभात् कुमण्डले ।
रुन्द्रशोभोक्षयोमेयो रुचिरे भानुमण्डले ॥ ३०

प्रकाशयन् खमुद्भूतस्त्वमुद्धाङ्ककलालयः ।
विकासयन् समुद्भूतः कुमुदं कमलाप्रियः ॥ ३१

धाम त्विषां तिरोधानविकलो विमलोक्षयः ।
त्वमदोषाकरोस्तोनः सकलो विपुलोदयः ॥ ३२

यत्तु खेदकरं ध्वान्तं सहस्रगुरपारयन् ।
भेत्तुं तदन्तरत्यन्तं सहसे गुरु पारयन् ॥ ३३

खलोलूकस्य गोव्रातस्तमस्ताप्यति भास्वतः ।
कालोविकलगोघातः समयोऽप्यस्य भास्वतः ॥ ३४

लोकत्रयमहामेयकमलाकरभास्वते ।
एकप्रियसहायाय नम एकस्वभाव ते ॥ ३५

( अर्द्धभ्रमगूढद्वितीयपादः )

चारुश्रीशुभदौ नौमि रुचा वृद्धौ प्रपावनौ ।
श्रीवृद्धौतौ शिवौ पादौ शुद्धौ तव शशिप्रभ ॥ ३६

## श्रीपुष्पदन्त-जिन-स्तुतिः

### ( निरौष्ठ्यश्लोकयमकः )

शंसनाय कनिष्ठायाश्चेष्टाया यत्र देहिनः ।
नयेनाशंसितं श्रेयः सद्यः सन्नज राजितः ॥ ३७

शं स नायक निष्ठायाश्चेष्टाया यत्र देहि नः ।
न येनाशं सितं श्रेयः सद्यः सन्नजराजितः ॥ (यु.) ३८

शोकक्षयकृदव्याधे पुष्पदन्त स्ववत्पते ।
लोकत्रयमिदं बोधे गोपदं तव वर्त्तते ॥ ३९

लोकस्य धीर ते बाढं रुचयेपि जुषे मतम् ।
नो कस्मै धीमते लीढं रोचतेपि द्विषेमृतम् ॥ ४०

## श्रीशीतल-जिनस्तुतिः

एतच्चित्रं क्षितेरेव घातकोपि प्रसा(पा)दकः ।
भूतनेत्र पतेस्यैव शीतलोपि च पावकः ॥ ४१

काममेत्य जगत्सारं जनाः स्नात महोनिधिम् ।
विमलात्यन्तगम्भीरं जिनामृतमहोदधिम् ॥ ४२

## श्रीश्रेयांसजिन-स्तुतिः

### ( अर्द्ध भ्रमनिरौष्ठ्यगूढचतुर्थपादः )

हरतीज्याहिता तान्ति रक्षार्थायस्य नेदिता ।
तीर्थादि श्रेयसे नेताज्यायः श्रेयस्ययस्य हि ॥ ४३

### ( अर्द्ध भ्रमः )

अविवेको न वा जातु विभूषापन्मनोरुजा ।
वेषा मायाज वैनो वा कोपयागश्च जन्म न ॥ ४४

( अर्द्ध भ्रमः )

आलोक्य चारु लावण्यं पदाल्लातुमिवोर्जितम् ।
त्रिलोकी चाखिला पुण्यं मुदा दातुं ध्रुवोदितम् ॥ ४५

( श्लोकयमकः )

अपराग समाश्रेयन्ननाम यमितोभियम् ।
विदार्य सहितावार्य समुत्सन्नज वाजितः ॥ ४६

अपराग स मा श्रेयन्ननामयमितोभियम् ।
विदार्यसहितावार्य समुत्सन्नजवाजितः ॥ (यु.) ४७

### श्रीवासुपूज्य-जिन-स्तुतिः

( अनन्तरपादमुरजबन्धः )

अभिषिक्तः सुरैर्लोकैस्त्रिभिर्भक्तः परैर्न कैः ।
वासुपूज्य मयीशेशस्त्वं सुपूज्यः क ईदृशः ॥ ४८

चार्वस्यैव क्रमेजस्य तुङ्गः सायो नमन्नभात् ।
सर्वतो वक्त्रमेकास्यमङ्गं छायोनमप्यभात् ॥ ४९

### श्रीविमल-जिन-स्तुतिः

( इष्टपादमुरजबन्धः )

क्रमतामक्रमं क्षेमं धीमतामर्च्यमश्रमम् ।
श्रीमद्विमलमर्चेमं वामकामं नम क्षमम् ॥ ५०

( द्व्यक्षरपादाभ्यासयमकः )

ततोमृतिमतामीमं तमितामतिमुत्तमः ।
मतोमाताितता तोत्तुं तमितामतिमुत्तमः ॥ ५१

( चक्रश्लोकः )

( अक्षरद्वयविरचितसमुद्गयमकः )

नेताननतनुते नेनोनितान्तं नाततो नुतात् ।
नेता न तनुते नेनो नितान्तं ना ततो नुतात् ॥ ५२

( चक्रश्लोकः )

नयमानक्षमामान न मामार्यार्त्तिनाशन ।
नशनादस्य नो येन नये नोरोरिमाय न ॥ ५३

( गूढस्वेष्टपादचक्रश्लोकः )

वर्णभार्यातिनन्द्याव वन्द्यानन्त सदारव ।
वरदातिनतार्य्याव वर्य्यातान्तसमार्णव ॥ ५४

## श्रीअनन्तजिन-स्तुतिः

( गूढद्वितीयतृतीयान्यतरपादद्व्यक्षरमयश्लोकः )

नुन्नानृतोन्नतानन्त नूतानीतिनुताननः ।
नतोनूनोनितान्तं ते नेतातान्ते निनौति ना ॥ ५५

## श्रीधर्म-जिन-स्तुतिः

( गूढद्वितीयचतुर्थान्यतरपादोऽर्द्धभ्रमः )

त्वमवाध दमेनर्द्ध मत धर्मप्र गोधन ।
वाधस्वाशमनागो मे धर्म शर्मतमप्रद ॥ ५६

( गतप्रत्यागतैकश्लोकः )

नतपाल महाराज गीत्यानुत ममाक्षर ।
रक्ष मामतनुत्यागी जराहा मलपातन ॥ ५७

मानसादर्शसंक्रान्तं सेवे ते रूपमद्भुतम् ।
जिनस्योदयि सत्त्वान्तं स्तुवे चारूढमच्युतम् ॥ ५८

यतः कोपि गुणानुक्त्या नावाब्धीनपि पारयेत् ।
न तथापि क्षणाद्भक्त्या तवात्मानं तु पावयेत् ॥ ५९

रुचं बिभर्ति ना धीरं नाथातिस्पष्टवेदनः ।
वचस्ते भजनात्सारं यथायः स्पर्शवेदिनः ॥ ६०

प्राप्य सर्वार्थसिद्धिं गां कल्याणेतः स्ववानतः ।
अप्यपूर्वार्थसिद्ध्येगां कल्याऽकृत भवान् युतः ॥ ६१

भवत्येव धरा मान्या सूद्यातीति न विस्मये ।
देवदेव पुरा धन्या प्रोद्यास्यति भुवि श्रिये ॥ ६२

एतच्चित्रं पुरो धीर स्नपितो मन्दरे शरैः ।
जातमात्रः स्थिरोदार क्वापि त्वममरेश्वरैः ॥ ६३

( अनन्तरपादमुरजः )

तिरीटघटनिष्ठ्यूतं हारीन्द्रौघविनिर्मितम् ।
पदे स्नातः स्म गोक्षीरं तदेडित भगोश्चिरम् ॥ ६४

कुत एतो नु सन्वर्णो मेरोस्तेऽपि च संगतेः ।
उत क्रीतोथ संकीर्णो गुरोरपि तु संमतेः ॥ ६५

( अनन्तरपादमुरजः )

हृदि येन धृतोसीनः स दिव्यो न कुतो जनः ।
त्वयारूढो यतो मेरुः श्रिया रूढो मतो गुरुः ॥ ६६

### श्रीशान्ति-जिन-स्तुतिः

चक्रपाणेर्दिशामूढा भवतो गुणमन्दरम् ।
के क्रमेणेदृशा रूढाः स्तुवन्तो गुरुमक्षरम् ॥ ६७

त्रिलोकीमन्वशास्संगं हित्वा गामपि दीक्षितः ।
त्वं लोभमप्यशान्त्यङ्गं जित्वा श्रीमद्विदीशितः ॥ ६८

केवलाङ्गसमाश्लेषबलाढ्य महिमाधरम् ।
तव चाङ्गं क्षमाभूषलीलाधाम शमाधरम् ॥ ६९

त्रयो लोकाः स्थिताः स्वैरं योजनेधिष्ठिते त्वया ।
भूयोन्तिकाः श्रितास्तेरं राजन्तेधिपते श्रिया ॥ ७०

परान् पातुस्तवाधीशो बुधदेव भियोषिताः ।
दूराद्धातुमिवानीशो निधयोवज्रयोज्झिताः ॥ ७१

( पादादियमकश्लोकः )

समस्तपतिभावस्ते समस्तपति तद्द्विषः ।
संगतोहीन भावेन संगतो हि न भास्वतः ॥ ७२

नयसत्त्वर्त्तवः सर्वे गव्यन्ये चाप्यसंगताः ।
श्रियस्ते त्वयुवन् सर्वे दिव्यर्द्धया चावसंभृताः ॥ ७३

तावदास्व त्वमारूढो भूरिभूतिपरम्परः ।
केवलं स्वयमारूढो हरिर्भाति निरम्बरः ॥ ७४

नागसे त इनाजेय कामोद्यन्महिमार्दिदने ।
जगत्त्रितयनाथाय नमो जन्मप्रमाथिने ॥ ७५

( श्लोकयमकालङ्कारश्च )

रोगपातविनाशाय तमोनुन्महिमायिने ।
योगख्यातजनार्चाय श्रमोच्छिन्मन्दिमासिने ॥ ७६

रोगपातविनाशाय तमोनुन्महिमायिने ।
योगख्यातजनार्चायः श्रमोच्छिन्मन्दिमासिने ॥ ७७

प्रयत्येमान् स्तवान् वश्मि प्रास्तश्रान्ताकृशार्त्तये ।
नयप्रमाणवाग्रश्मिध्वस्तध्वान्ताय शान्तये ॥ ७८

( सर्वपादमध्ययमकः )

स्वसमान समानन्द्या भासमान स मानघः ।
ध्वंसमानसमानस्तत्रासमानसमानतम् ॥ ७९

सिद्धस्त्वमिह संस्थानं लोकाग्रमगमः सताम् ।
प्रोद्धर्त्तुमिव सन्तानं शोकाब्धौ मग्नमंक्ष्यताम् ॥ ८०

## श्रीकुन्थु-जिन-स्तुतिः

( सर्वपादान्तयमकः )

कुन्थवे सुमृजाय ते नम्रयूनरुजायते ।
ना महीष्वनिजायते सिद्धये दिवि जायते ॥ ८१

यो लोके त्वा नतः सोतिहीनोप्यतिगुरुर्यतः ।
बालोपि त्वा श्रितं नौति को नो नीतिपुरुः कुतः ॥ ८२

( गतप्रत्यागतार्द्ध भागः )

नतयात विदामीश शमी दावितयातन ।
रजसामन्त सन्देव वन्देसन्तमसाजर ॥ ८३

( बहुक्रियापद-द्वितीयपादमध्यमकाऽतालुव्यञ्जनाऽवर्णस्वर-
गूढद्वितीयपाद सर्वतोभद्र-गतप्रत्यागताऽर्धभ्रमः )

पारावाररवारापारा क्षमाक्ष क्षमाक्षरा ।
वामानाममनामावारक्ष मर्द्धर्द्धमक्षर ॥ ८४

## श्रीअर-जिन-स्तुतिः

( गतप्रत्यागतपादपादाभ्यासयमकाक्षरद्वयविरचितश्लोकः )

वीरावारर वारावी वररोरुरुरोरव ।
वीरावाररवारावी वारिवारिरि वारि वा ॥ ८५

( अनुलोमप्रतिलोमश्लोकः )

रक्ष माक्षर वामेश शमी चारुरुचानुतः ।
भो विभोनशनाजोरुनम्रेन विजरामय ॥ ८६

( अनुलोमप्रतिलोमश्लोकः )

यमराज विनम्रेन रुजोनाशन भो विभो ।
तनु चारुरुचामीश शमेवारक्ष माक्षर ॥ ८७

( गतप्रत्यागतभागः )

नय मा स्वर्य वामेश शमेवार्य स्वमाय न ।
दमराजर्त्त वादेन नदेवार्त्त जरामद ॥ ८८

( यथेष्टैकाक्षरान्तरित )

वीरं मा रक्ष रक्षार परश्रीरदर स्थिर ।
धीरधीरजरः शूर वरसारर्द्धिरक्षर ॥ ८९

## श्रीमल्लिजिन-स्तुतिः

( अर्द्ध भ्रमः )

आस यो नतजातीर्य्या सदा मत्वा स्तुते कृती ।
यो महामतगोतेजा नत्वा मल्लिमितः स्तुतः ॥ ९०

## श्रीमुनिसुव्रत-जिन-स्तुतिः

( निरौष्ट्ययथेष्टैकाक्षरान्तारितमुरजबन्धो गोमूत्रिका षोडशदलपद्मश्च )

ग्लानं चैनश्च नः स्येन हानहीन घनं जिन ।
अनन्तानशन ज्ञानस्थानस्थाऽऽनत-नन्दन ॥ ९१

( अर्द्ध भ्रमः )

पावनाजितगोतेजो वर नानाव्रताक्षते ।
नानाश्चर्य सुवीतागो जिनार्य मुनिसुव्रत ॥ ९२

## श्रीनमि-जिन-स्तुतिः

( गतप्रत्यागतपादयमकाक्षरद्वयविरचितसन्निवेशविशेषसमुद्गतानुलोम-प्रतिलोमश्लोकयुगलश्लोकः )

नमेमान नमामेनमानमाननमानमा-
मनामोनु नुमोनामनमनोमम नो मन ॥ ९३

न मे माननमामेन मानमाननमानमा-
मनामो नु नु मोनामनमनोम मनोमन ॥ ९४

( अनुलोमप्रतिलोमसकलश्लोकगतप्रत्यागतार्द्धः )

नर्दयाभर्त्तवागोद्य द्य गोवार्त्तभयार्दन ।
तमिता नयजेतानुनुताजेय नतामित ॥ ९५

( अनुलोमप्रतिलोम-गतप्रत्यागतश्लोकः )

हतभीः स्वय मेध्याशु शं ते दातः श्रिया तनु ।
नुतया श्रित दान्तेश शुद्ध्यामेव स्वभीत ह ॥ ९६

## श्रीनेमि-जिन-स्तुतिः

(द्व्यक्षरश्लोकः)

मानोनानामनूनानां मुनीनां मानिनामिनम् ।
मनूनामनुनौमीमं नेमिनामानमानमन् ॥ ९७

(अनुलोमप्रतिलोमैकश्लोकः)

तनुतात्सद्यशोमेय शमेवार्य्यवरो गुरु ।
रुगुरो वर्य्य वामेश यमेशोद्यत्सतानुत ॥ ९८

## श्रीपार्श्व-जिन-स्तुतिः

जयतस्तव पार्श्वस्य श्रीमद्भर्तुः पदद्वयम् ।
क्षयं दुस्तरपापस्य क्षमं कर्तुं ददज्जयम् ॥ ९९

(गूढतृतीयचतुर्यानन्तराक्षरद्वयविरचितयमकानन्तरपादमुरजबन्धः)

तमोत्तु ममतातीत ममोत्तममतामृत ।
ततामितमते तातमतातीतमृतेमित ॥ १००

स्वचित्तपटयालिख्य जिनं चारु भजत्ययम् ।
शुचिरूपतया मुख्यमिनं पुरुनिजश्रियम् ॥ १०१

## श्रीवर्धमान-जिन-स्तुतिः

धीमत्सुवन्द्यमान्याय कामोद्वामितवित्तृषे ।
श्रीमते वर्धमानाय नमो नमितविद्विषे ॥ १०२

वामदेव क्षमाजेय धामोद्यमितविज्जुषे ।
श्रीमते वर्धमानाय नमोन मितविद्विषे ॥ १०३

समस्तवस्तुमानाय तमोघ्नेमितवित्त्विषे ।
श्रीमतेवर्धमानाय नमोन मितविद्विषे ॥ १०४

प्रज्ञायां तन्वृतं गत्वा स्वालोकं गोर्विदास्यते ।
यज्ज्ञानान्तर्गतं भूत्वा त्रैलोक्यं गोष्पदायते ॥ १०५

( श्लोकयमकः )

को विदो भवतोपीड्यः सुरानतनुतान्तरम् ।
शं सते साध्वसंसारं स्वमुद्यच्छन्नपीडितम् ॥ १०६

कोविदो भवतोपीड्यः सुरानत नुतान्तरम् ।
शंसते साध्वसं सारं स्वमुद्यच्छन्नपीडितम् ॥ १०७

( समुद्गकयमकः )

अभीत्यावर्द्ध मानेनः श्रेयोरुगुरु संजयन् ।
अभीत्या वर्धमानेन श्रेयोरुगुरु संजयन् ॥ १०८

( द्व्यक्षरवृत्तं शार्दूलविक्रीडितम् )

नानानन्तनुतान्त तान्तिततनिनुन्नुन्नान्त नुन्नानृत
नूतीनेन नितान्ततानितनुते नेतोन्नतानां ततः ।
नुन्नातीतितनून्नतिं नितनुतान्नीतिं निनूतातनु-
न्तान्तानीतितताननुतानन नतान्नो नूतनैनोत्तु नो ॥ १०९

( चक्रवृत्तम् )

वन्दारुप्रबलाजवंजवभयप्रध्वंसिगोप्राभव
वर्द्धिष्णो विलसद्गुणार्णव जगन्निर्वाणहेतो शिव ।
वन्दीभूतसमस्तदेव वरद प्राज्ञैकदक्षस्तव
वन्दे त्वावनतो वरं भवभिदं वर्यैकवन्द्याभव ॥ ११०

( इष्टपादवलयप्रथमचतुर्थसप्तमवलयैकाक्षरचक्रवृत्तम् )

नष्टाज्ञान मलोन शासनगुरो नम्रं जनं पानिन
नष्टग्लान सुमान पावन रिपूनप्यालुनन् भासन ।
नत्येकेन रुजोन सज्जनपते नन्दन्ननन्तावनः
नन्तॄन् हानविहीनधामनयनो नः स्तात्पुनन् सज्जिन ॥ १११

( इष्टपादवलयप्रथमचतुर्थसप्तमवलयैकाक्षर चक्रवृत्तम् )

रम्यापारगुणारजस्सुरवरैरर्च्याक्षर श्रीधर
रत्यूनारतिदूर भासुर सुगीरर्य्योत्तर्द्धीश्वर ।
रक्तान् क्रूरकठोरदुर्द्धररुजोरक्षन् शरण्याजर
रक्षाधीर सुधीर विद्वर गुरो रक्तं चिरं मा स्थिर ॥ ११२

उपसंहार ( चक्रवृत्तम् )

प्रज्ञा सा स्मरतीति या तव शिरस्तद्यन्नतं ते पदे
जन्मादः सफलं परं भवभिदी यन्नाश्रिते ते पदे ।
माङ्गल्यं च स यो रतस्तव मते गीः सैव या त्वा स्तुते ।
ते ज्ञा ये प्रणता जनाः क्रमयुगे देवाधिदेवस्य ते ॥ ११३

सुश्रद्धा मम ते मते स्मृतिरपि त्वय्य्र्च्चनं चापि ते
हस्तावञ्जलये कथाश्रुतिरतः कर्णोऽक्षि संप्रेक्षते ।
सुस्तुत्यां व्यसनं शिरो नतिपरं सेवेदृशी येन ते
तेजस्वी सुजनोऽहमेव सुकृती तेनैव तेजःपते ॥ ११४

जन्मारण्यशिखी स्तवः स्मृतिरपि क्लेशाम्बुधेर्नौः पदे ।
भक्तानां परमौ निधी प्रतिकृतिः सर्वार्थसिद्धिः परा ।

वन्दीभूतवतोपि नोन्नतिहतिर्नन्तुश्च येषां मुदा ।
दातारो जयिनो भवन्तु वरदा देवेश्वरास्ते सदा ॥ ११५

**( कविकाव्यनामगर्भचक्रवृत्तम् )**

गत्वैकस्तुतमेव वासमधुना तं येच्युतं स्वीशते
यन्नत्यैति सुशर्म पूर्णमधिकां शान्ति व्रजित्वाध्वना ।
यद्भक्त्या शमिताकृशाघमरुजं तिष्ठेज्जनः स्वालये
ये सद्भोगकदायतीव यजते ते मे जिनाः सुश्रिये ॥ ११६

पू.आ. श्री ऋषिवर्द्धनसूरिरचितम्

# ८. ॥ श्रीनगरकोटमण्डनचतुर्विंशति-जिनस्तवनम् ॥

नाभिराज-कुलकमलमरालं, प्रथम(तीर्थ)करमुदयविशालं ,
जिनपतिमजितमबालम् ।
वन्दे विनय-विनत-भूपालं, सम्भवमभिनन्दनमनरालं,
दूरितभवजम्बालम् ॥ १

सुमतिमुदितमहिमामित[मालं], श्रीपद्मप्रभजिनमकरालं,
त्रिभुवनजनसुरसालम् ।
श्रीसुपार्श्वमभिनौमि सुभालं, चन्द्रप्रभविभुमतिसुकुमालं,
शमरसकी[र]रसालम् ॥ २

कमलाकेलि-कमलपदकमलं, पुष्पदन्तशीतलजिनयमलं,
नमत नमत मतममलम् ।
श्रीश्रेयांसमसंशयशबलं, वासुपूज्यजिनपतिमतिसबलं,
विगलितकलिकलितुमुलम् ॥ ३

अविकलकेवलकमलाविमलं, जनताजनितोदयमथविमलं,
जिनमनन्तजितमतुलम् ।
धर्मनाथमवितथपथकुशलं, वसुधातलविस्तारितकुशलं,
भजत शान्तिमतिसकलम् ॥ ४

कुन्थुनाथमतिविशदाचारं, वचनकलाविजितामृतधारं,
श्रीअरजगदाधारम् ।
इन्द्रनीलसमदेहमुदारं, सेवे मल्लिनाथमविकारं,
मुनिसुव्रतनेतारम् ॥ ५

नमिजिनमुज्ज्वलगुणगम्भीरं, नेमिनाथमधिगतभवतीरं,
नीरञ्जनकोटीरम् ।
वन्दे पार्श्वदेवमतिधीरं, विघ्नहरं कनकाभशरीरं,
श्रीमन्तं जिनवीरम् ॥ ६

नगरकोटवरनगरे दशरथकारितजिनभवने
शिवशिवपथ[रूचि]रचैत्येष्वपि सारम् ।
जिनवरनिकरमेवमहमविरतमानमामि
सादरमुदितोदितचिन्तितफलदातारम् ॥ ७

पू. आ. श्री जिनप्रभसूरिविरचितम्

# १. ॥ श्रीचतुर्विंशतिजिनस्तवनम् ॥

(वसन्ततिलका)

आनम्रनाकिपतिरत्न-किरीटरोचि-
र्नीराजितक्रमसरोज-निवासिलक्ष्मीः ।
उत्तप्तहेमपरमाणुमयप्रभो वः
श्रीनाभिनन्दनजिनाधिपतिः पुनातु ॥ १

चाणूरजिच्चरणनिर्गतसिन्धुवारि-
धाराभिधौत-गरुडच्छदगौरकान्तिः ।
कन्दर्पदर्पपवनाशननाशनैक-
विष्णुध्वजो विजयतामजितो जिनेन्द्रः ॥ २

वन्दारुसादरपुरन्दरमौलिमौली-
रत्नांशु मांसलितपादनखप्रभौघः ।
पुष्पेषुपन्नगपतिक्षयपक्षिराजः
श्रीसम्भवो भवतु भाग्यविभूतये वः ॥ ३

नालीकसंश्रयनिबद्धरसोऽमराली-
संसेवितोचितगतिः शुचिपक्षशाली ।
नित्यं मनःसरसि वीतमले मराल-
लीलायितं कलयतादभिनन्दनो वः ॥ ४

अर्त्तिं निवर्त्तयतु कार्तिकपूर्णिमेन्दु-
संवावदूकवदनः सदनं गुणानाम् ।
व्याकोशचम्पक-विरोचि-शरीररोचि-
भव्याङ्गिदत्त-सुमतिः सुमतिर्मुनीशः ॥ ५

कल्याणवल्लिवनपल्लवनाम्बुवाहः,
प्रत्यूषपूषकिरणाऽरुणकायकान्तिः ।
गीर्वाणमौलिमणिचुम्बितपादपद्मः,
पद्मप्रभो ! दिशतु नः पदवीमपङ्काम् ॥ ६

भव्येषु तोषमतनुं वितनोतु सेवा-
हेवाकिनाकिमुकुटोपलघट्टितांह्रिः ।
देवेन्द्रवाहनकरेणुसलीलगामी,
चामीकरोज्ज्वलरुचिर्भगवान् सुपार्श्वः ॥ ७

देवः शरज्जलधरोज्झितवारिधार-
धौतत्रिलोचनशिलोच्चयगौरमूर्तिः ।
त्रैलोक्यलोककुमुदाकरपूर्णचन्द्र-
श्चन्द्रप्रभो ! भवतु वः शिवदानशौण्डः ॥ ८

प्रेङ्खन्नखावलिमयूखशिखानुविद्धा,
बालातपच्छुरितपङ्कजकान्तिजैत्री ।
कुन्दावदातगुणमौक्तिकताम्रपर्णी
पादद्वयी मम मुदं सुविधेर्विधत्ताम् ॥ ९

उद्दामकामकरटीन्द्र-मृगाधिराज-
स्त्रैलोक्यलोचन-चकोर-सुधामरीचिः ।
योगीन्द्रहृत्कमलवासविलासहंसः
श्रीशीतलः सफलयत्वभिवाञ्छितं वः ॥ १०

इक्ष्वाकुवंशसुरमन्दिरहेमकुम्भः,
कायप्रभाऽपहसितद्रुतशातकुम्भः ।

ज्ञानात्मदर्शतलबिम्बितविश्वविश्वः,
श्रेयांसतीर्थपतिरर्पयतु प्रियं वः ॥ ११

जीयाज्जगत्त्रयपतिः प्रतिपक्षपक्ष-
नक्षत्रमण्डलनिरस्तिगभस्तिमाली ।
प्रौढप्रभावभवनं भुवनैकबन्धु-
र्बन्धूकबन्धुररुचिः प्रभुवासुपूज्यः ॥ १२

त्रैलोक्यशेखरितशासनमोहराज-
माद्यद्यशःशशधरग्रसनैकराहुः ।
पोतः प्रमादजलधौ कलधौतकान्ति-
र्मच्चेतसो विमलतां विमलस्तनोतु ॥ १३

आनन्दमेदुरनमत्त्रिदशेशमौलि-
मन्दारदामविगलन्मकरन्दधौतम् ।
लक्ष्मीनिकेतनमनन्तजिनेश्वरस्य,
पादारविन्दमभिनन्दतु मानसं नः ॥ १४

श्रीभानुभूपकुलकैरवशीतभानुः,
सम्मोहसन्तमससञ्चयचण्डभानुः ।
पुष्यत्कषायदनुजान्वयचक्रपाणिः,
पाणिस्थमावहतु वः शिवशर्म धर्मः ॥ १५

बाह्यान्तरारिकुलकाननधूमकेतुः,
सङ्केतधाम जिनचक्रिरमारमण्योः ।
सौवर्णपद्मदलकोमलकायकान्तिः,
श्रीशान्तिरन्तयतु सन्ततिमेनसां नः ॥ १६

सिद्धान्तसिद्धतटिनीतुहिनाऽचलाय
श्रीवल्लिवेल्लनकलामलयाऽनिलाय ।
निःशेषजन्तुपरिरक्षणदीक्षिताय,
श्रीकुन्थवे गुणगणैः पृथवे नमोऽस्तु ॥ १७

देवः सुदर्शननराधिपवंशवंश-
मुक्ताफलं सफलितप्रणताभिलाषः ।
लोलाक्षपक्षिकुलसंयमनैकपाशः,
श्रीमान् अरः स्फुरतु मानसमन्दिरे मे ॥ १८

चिन्तामणी-त्रिदशपादप-कामधेनुः,
माहात्म्यजैत्रचरणाम्बुरुहप्रणामः ।
मारप्रवीरजयमल्लिमतल्लिकास्तु,
मल्लिर्मदीयहृदि पल्लवितप्रमोदः ॥ १९

निर्वाणराज्यकमलाहृदितारहारः,
संसारवारिनिधितारणकर्णधारः ।
अम्भोदसोदरवपुः स्वपदारविन्दे,
श्रीसुव्रतो दिशतु षट्चरणव्रतं मे ॥ २०

नम्रद्युसन्मणिकिरीटघटप्रसारी,
ज्योत्स्नाजलस्नपितपादपयोरुहश्रीः ।
कीर्तिप्रतानधवलीकृतभूर्भुवः स्व-
र्भद्राणि सान्द्रयतु वो नमितीर्थनाथः ॥ २१

सेवापरायणनरायणचारुचूडा-
रत्नप्रभापटलपाटलितांह्रिपीठः ।

राजीमतीहृदयपङ्कजचञ्चरीकः
श्रीनेमिरस्तु भवतां भवतान्तिशान्त्यै ॥ २२

फुल्लत्फणीन्द्रफणराजिमणीमरीचि-
वीचिप्रपञ्चितशचीपतिकार्मुकश्रीः ।
दुर्गोपसर्गजलशोषविधौतपर्तुः,
स्वामी पिपर्तु भवतां रुचितानि पार्श्वः ॥ २३

नम्रेन्द्रशेखरपरागपिशङ्गितांह्रि-
रुत्तुङ्गसङ्गमकगर्वगिरीन्द्रवज्रः ।
सिद्धार्थपार्थिवकुलार्णवकौस्तुभो वः
श्रेयांसि मांसलयतात् प्रभुवर्धमानः ॥ २४

प्रज्ञावलम्बितजिनप्रभसूरिवर्य-
वाक्पारवर्ति विभवाविभवाधिकाराः ।
यच्छन्तु योगिवृषभा ऋषभादयो वः,
श्रीवर्धमानचरमाः परमार्थसिद्धिम् ॥ २५

पू.आ.श्री जिनप्रभसूरिविरचितम्

## १०. ॥ श्रीचतुर्विंशतिजिनस्तवनम् ॥

जिनर्षभ ! प्रीणितभव्यसार्थ ! समस्तदोषाजिततीर्थनाथ ! ।
श्रीसम्भवाखण्डलवन्द्य ! नन्द्याः
स्वामिन् ! प्रजानामभिनन्दनस्त्वम् ॥ (उपजाति) १

सुखाय पुंसां सुमते ! ऽसुखास्त मृगाङ्कपद्मप्रभगौरकान्ते ! ।
सुपार्श्वनेतर्महसेनपुत्र ! त्रैलोक्यलोकस्तवनीय भूयाः ॥(उ.जा.)२

विरोचनाभं सुविधिं जिनेन्द्रं स्वभावतः शीतलमर्चयामि ।
श्रेयांसमर्च्यं दिविजव्रजेनाऽऽसक्तं न सम्पत्सु न वासुपूज्यम् ॥३
(उ.जा.)

सुवर्णकान्ते ! विमलत्वमुच्चकैरनन्तविज्ञाननिविष्टविष्टपः ।
अहर्मणे ! धर्मपथप्रकाशने कुरुष्व शान्ते ! हितमङ्गिनां पदम् ॥४
(वंशस्थ)

निःसीमसूरतनयः स्थितिमार्गदर्शिन्
निर्माहि शर्म सुदृशां प्रियमुक्तिदार ! ।
निर्मृष्टगारुडरुचे निगृहीतमोह !
मल्लेश ! मोदित महाशय सुव्रतेन ॥ (वसन्ततिलका) ५

अथो नमीनाङ्कनिरासदक्ष ! सम्प्रीणिताशेषसमुद्रनेमे ! ।
शान्ताऽखिलाऽपाय मनोज्ञपार्श्व ! श्रीवर्द्धमानैधि सुखश्रिये नः॥६
(उ.जा.)

निर्व्याजमेधिततमोहरणैकदक्षे सर्वज्ञराजिमहनीयपदे नयाद्ये ।
सार्वोदिते भव सरस्वति पोत(पाप?)रूपे
मिथ्यात्ववारिणि सदा मयि सुप्रसन्ना ॥ (वसन्ततिलका) ७

एवं श्रीवृषभादयो जिनवराः श्रीवर्धमानान्तिमाः,
सान्द्रानन्दमखण्डखण्डितपदैर्नूताश्चतुर्विंशतिः ।
प्रज्ञोल्लासिलसज्जिनप्रभकवि व्यावर्ण्यमानोदया,
भूयासुर्मयि सुप्रसन्नहृदयास्त्रैलोक्यलक्ष्मीधराः ॥ (शा.वि.) ८

पू.आ.श्री धर्मघोषसूरिविरचितः

## ११. ॥ भाविचतुर्विंशतिजिनस्तवः ॥

(अनुष्टुप्)

देवेन्द्रवन्दितान् भाविचतुर्विंशतिमर्हतः ।
भाविशन्धर्मकीर्त्तिश्रीविद्यानन्दशिवान् स्तुवे ॥ १

प्रथमः पद्मनाभोऽर्हन् जीवः श्रेणिकभूपतेः ।
जीयाज्जीवः सुपार्श्वस्य द्वितीयः सूरदेवकः ॥ २

तृतीयोऽर्हन् सुपार्श्वाख्यो जीवः पोट्टिलकस्य तु ।
तुर्यः स्वयम्प्रभाभिख्यो जीवो जीयाद् दृढायुषः ॥ ३

पञ्चमः कार्त्तिकजीवः सर्वानुभूतिनामकः ।
जिनो देवश्रुतो नाम जीवः शङ्खस्य षष्ठकः ॥ ४

उदयाख्यो जिनो भावी नन्दजीवस्तु सप्तमः ।
जिनो जीवः सुनन्दस्याऽष्टमः पेढालनामकः ॥ ५

जयतात् केकल(शी)जीवो नवमः पोट्टिलो जिनः ।
जीवो रेयलिनामुस्तु (?) शतकीर्त्तिर्दशमोऽर्हन् ॥ ६

जीवः सत्यकिसञ्ज्ञस्यैकादशः सुव्रतो जिनः ।
कृष्णस्य शार्ङ्गिणो जीवोऽममाख्यो द्वादशो जिनः ॥ ७

बलदेवस्य जीवोऽर्हन् निष्कषायस्त्रयोदशः ।
रोहिणीश्राविकाजीवो निष्पुलाकश्चतुर्दशः ॥ ८

निर्ममः सुलसायास्तु जीवः पञ्चदशो जिनः ।
रेवतीश्राविकाजीवश्चित्रगुप्तस्तु षोडशः ॥ ९

जीवो गवालिनामाऽस्ति समाधिः सप्तदशोऽर्हन् ।
जीवो मार्गलिसञ्ज्ञस्याष्टादशः संवराभिधः ॥ १०

जीवो द्वैपायनस्यैकोनविंशोऽर्हन् यशोधरः ।
जीवः कर्णस्य विंशस्तु विजयाख्यो जिनेश्वरः ॥ ११

जीवस्तु नारदस्यैकविंशो मल्लाभिधो जिनः ।
अम्बडस्य तु जीवोऽर्हन् द्वाविंशो देवनामकः ॥ १२

त्रयोविंशो जिनोऽनन्तवीर्योऽव्यादमरस्य तु ।
जीवः स्वातेर्जिनो जीयाच्चतुर्विंशोऽत्र भद्रकृत् ॥ १३

इत्याख्या जीवसञ्ज्ञाभिः संस्तुता भाविनो जिनाः ।
विश्राणयन्तु मे शीघ्रं श्रेयः संश्रेयसीं श्रियम् ॥ १४

पू.आ. श्री धर्मघोषसूरिविरचितम्

## १२. ॥ सर्वजिनस्तवनम् ॥

(शार्दुलविक्रीडित)

नम्राखण्डलमौलिमण्डलमिलन्मन्दारमालोच्छलत्-
सान्द्रामन्दमरन्दपूरसुरभीभूतक्रमाम्भोरुहान् ।
श्रीनाभिप्रभवप्रभुप्रभृतिकाँस्तीर्थङ्करान् शङ्करान्
स्तोष्ये साम्प्रतकाललब्धजननान् भक्त्या चतुर्विंशतिम् ॥ १

नन्द्या**न्नाभिसुतः** सुरेश्वरनतः संसारपारं गतः
क्रोधाद्यैरजितं स्तुवेऽह**मजितं** त्रैलोक्यसम्पूजितम् ।
सेनाकुक्षिभवः पुनातु विभवः श्रीशम्भवः **शम्भवः**
पायान्माम**भिनन्दनः** सुवदनः स्वामी जनानन्दनः ॥ २

लोकेशः **सुमति**स्तनोतु नमति श्रेयःश्रियं सन्मतिं
दम्भद्रौ कलभं मदेभशरभं संस्तौमि **पद्मप्रभम्** ।
श्रीपृथ्वीतनयं **सुपार्श्व**मभयं वन्दे विलीनामयं
श्रेयस्तस्य न दुर्लभं शशिनिभं यः स्तौति **चन्द्रप्रभम्** ॥ ३

बोधिं नः **सुविधे** ! विधेहि सुविधे ! कर्मद्रुमौघप्रधे !
जीयादम्बुजकोमलक्रमतलः श्रीमाञ् जिनः **शीतलः** ।
श्री**श्रेयांस** ! जय स्फुरद्गुणचयः श्रेयःश्रियामाश्रयः
सम्पूज्यो जगतां श्रियं वितनुतां **श्रीवासुपूज्यः** सताम् ॥ ४

मोक्षं वो **विमलो** ददातु विमलो मोहाम्बुवाहानिलो
**ऽनन्तो**ऽनन्तगुणः सदा गतरणः कुर्यात् क्षयं कर्मणः ।
धर्मो मे विपदं छ्यताच्छिवपदं दद्यात् सुखैकास्पदं
**शान्ति**स्तीर्थपतिः करोत्विभगतिः शान्तिं कृताघक्षितिः ॥ ५

**कुन्थु**र्मेघरवो भवादवतु वो मानेभकण्ठीरवो
भक्त्या नम्रनरामरं जिनवरं प्रास्तस्मरं नौम्य**रम्** ।
श्रीमल्लेखनतक्रमोज्झिततमो **मल्ले**ऽस्तु तुभ्यं नमो
विश्वार्च्यो भवतः स पातु भवतः **श्रीसुव्रतः** सुव्रतः ॥ ६

लोभाम्भोजतमेश्वरोपम ! **नमे** ! धर्मे धियं धेहि मे
वन्देऽहं वृषगामिनं प्रशमिनं श्री**नेमिनं** स्वामिनम् ।
श्रीमत्**पार्श्व**जिनं स्तुवेऽस्तवृजिनं दान्ताक्षदुर्वाजिनं
नौमि श्री**त्रिशलाङ्गजं** गतरुजं मायालतायां गजम् ॥ ७

इत्थं धर्मवचोवितानरचितं वर्य-स्तवं मुद्युतः
सद्धर्मद्रुमसेकसंवरमुचां भक्त्याऽर्हतां नित्यशः ।
श्रेयःकीर्त्तिकरं नरः स्मरति यः संसारमाकृत्य सो-
ऽतीतार्त्तिः परमे पदे चिरमितः प्राप्नोत्यनन्तं सुखम् ॥ ८

पू.आ.श्री जिनवल्लभसूरिविरिचतम्

## १३. ॥ सर्वजिनेश्वरस्तोत्रम् ॥

(वसन्ततिलका)

प्रीतिप्रसन्नमुखकौशिकनन्द्यमाना,
दोषान्धकारनिकरं परितः किरन्तः ।
नालीकप्रक्रमघनाः कुमुदं दधानाः,
प्रीणन्तु सन्तत(?) सदा जिनचन्द्रपादः ॥ १

तान्यक्षराण्यपि न वेद्मि न ता गिरोऽपि,
मद्गोचरे न मम धीरपि तादृगस्ति ।
वाचस्पतिप्रभृतिवर्ण्यगुणं यतस्त्वं,
संस्तौमि भक्तिविवशस्तदपीश ! वच्मि ॥ २

स्वामिन्नियच्चिरमिह भ्रमता भवाब्धौ,
सञ्जातपातकचयेन कदाचनापि ।
न त्वं स्तुतो न च नुतो न विलोकितो न,
ध्यातोऽन्यथा कथमियं विपदां ततिर्मे ॥ ३

दुर्वासनान्धतमसोच्चयचण्डभानो !,
भस्मीकृतप्रसृतमोहलतावितान ! ।
रागज्वलज्ज्वलनसं शमनाम्बुवाहं,
क्वाहं सभक्ति न वितास्मि गतास्मि तत्त्वाम् ॥ ४

नाथ ! त्वदङ्घ्रिनमनादरताडितोर्वी-
पीठोपजातकिणलक्ष्मललाटपट्टम् ।
वक्ष्यामि कर्हि जगदीश्वरदत्तसान्द्र-
कस्तूरिकास्तबकपङ्कमिवास्मि हृष्टः ॥ ५

स्फीतोपनीतसुखमस्तसमस्ततापं,
यैस्तर्षतस्तव वचोऽमलहारहारि ।
प्रोद्यत्कपोलपुलकोपवितैः पयोवत्,
पीतं श्रवोऽञ्जलिपुटैर्जिन ! तेऽत्र धन्याः ॥ ६

व्यासर्पिकेवलबलक्षतविश्वविश्व-
मिथ्यात्वविप्लवचयेऽपि शतन्वयीश ।
यत्केऽपि कुग्रहविधूतधियस्तदेत-
न्नाश्चर्यमन्धदृश एव रवावुलूकाः ॥ ७

उद्भूतभक्तिभरबन्धुरकान्तिकाया,
यं प्रातिहार्यविधिमादधिरे सुरेशाः ।
त्वं विश्वविस्मयकरं स्मरघस्मरस्य,
स्मृत्वापि ते किमपि हर्षमहं वहामि ॥ ८

यस्तावकं चरणवारिरुहं न नन्ता,
भावुक्तभाषितमलं मनसा न मन्ता ।
युष्मान्निदर्शितचरित्रविधौ निरन्ता,
संसारनीरनिधिपारमसौ न गन्ता ॥ ९

हर्षप्रकर्षवशतः शमुदुच्चदञ्ज,
रोमाञ्चकञ्चुकचिताङ्गसुराङ्गनाभिः ।
देवोदगीयत यशस्तव मेरुशृङ्ग-
लीलालतागृहगतानुगसङ्गताभिः ॥ १०

क्षुण्णक्षय क्षिपितमोक्षविपक्षलक्ष,
क्षीणक्षदक्षुभितपक्ष्मिलदृक्कटाक्षैः ।
क्षान्तिक्षत क्षमजिताक्ष सदक्षमङ्क्षु,
रक्ष क्षणं क्षतकमक्ष निरीक्षणान् माम् ॥ ११

त्वामीश ! जन्ममहिमादिषु तुष्यदन्तः,
पुष्यत् प्रमोदभरहृष्यदशेषगात्रः ।
त्वष्टावगीतर वधू हितदिव्यतूर्य-
नादानुविद्धमधुरध्वनिरिन्द्रराजी ॥ १२

त्वन्नाथ ! संस्मरणतोऽपि किलैककाल-
मे कोऽपि दूरतरवर्त्यपि भूयसोऽपि ।
भव्यान् सदापि विविधार्थरुचीन् कृतार्थी,
कुर्वन्नमेयमहिमामनुविश्रुतोऽसि ॥ १३

किं नु ग्रही किमु सदाग्रहवान् किमज्ञः,
किं मत्सरी किमलसः किमुताऽऽत्मशत्रुः ।
लोकोयमुत्तमतमं मतदानदक्षं,
साक्षाद्भवन्तमपि यन्न नमस्करोति ॥ १४

निस्सीमभीमभववारिधिरन्ध्रमध्य-
मज्जज्जनव्रजसमुत्तरणैकसेतो ! ।
वेलात् कुशास्त्रजडवृद्धकुबोधवल्ली-
सञ्छेदनोग्रपरशो ! भगवन् ! प्रसीद ॥ १५

त्वं सर्ववित्परमकारुणिकस्त्वमेव,
त्वं पश्यसि त्रिजगदप्यनिशं यथावत् ।
त्वन्मात्रमेकशरणं भवपङ्कमग्न-
मुद्धर्त्तुमर्हसि समग्रजगच्छरण्य ! ॥ १६

यत्त्वामनन्ति गुणराशिमुदारवाच-
स्तुत्वा किलास्मि विरमन्ति सुरेश्वराद्याः ।
तस्मिन्न शक्तिरथवा श्रम एव तेषां,
हेतुर्न तृप्तिरवधिर्न च ते गुणानाम् ॥ १७

एकापि चाश्रयवशेन किलाश्रयन्ती,
नानात्वमभ्रजलवद् युगपत्क्षणेन ।
सर्वाङ्गिनां सकलसंशयहृत्त्रिलोक्यां,
वागेवमुक्तजिनवैभवमुद्भवं ते ॥ १८

सन्तु श्रियः कृतमुदारमुदारमण्या-
मण्यादिभिर्भवतु किं गजवाजिराज्या ।
राज्यानुधिक् ! नुतिपदं भव तीर्थराज !,
राजत्यदा मम गिरः परमा वसन्तु ॥ १९

द्वेषद्विषि भ्रमपिषि प्रकषायकक्ष-सप्तार्चिषि स्मयमुषि श्री... ।
..., सम्पत्पुषि त्वयि यशोयुषि मेऽस्तु भक्तिः ॥ २०

कल्पद्रुकल्प ! नतकल्पितवस्तुदाने,
सम्प्रापितप्रवरसौख्यचय ! स्तुवाने ।
वक्तुं विभो ! गुणगणं तव नास्मि जाने,
भक्त्या परं मम यतः स्वभवार्त्तिहाने ॥ २१

व्याधिं धुनीहि जिन ! रागलतां लुनीहि,
चेतः पुनीहि मयि शीलगुणान् सिनीहि ।
आधिं मथान मनसोऽभिमतं ग्रथान,
द्वेषं मुषाण जिनपादनतिं पुषाण ॥ २२

दूरीभवद् वृजिनवल्लभसिद्धिबद्धा-
बद्धा तव स्तवमवापि शुभं मया यत् ।
धर्मद्रुमोऽपि च तयो(?) फलमात्मनां [स्राक्],
सस्तं स्वहस्तगतमस्तु जिनेश्वर ! द्राक् ॥ २३

पू.आ. श्रीसागरचन्द्रसूरिविरचितम्
विविधच्छंदोऽलङ्कृतं क्रियागुप्तकम्

# १४. ॥ श्रीचतुर्विंशतिजिनस्तवनम् ॥

जगति जडिमभाजि व्यञ्जितापूर्वनीते !
प्रथमजनिततीर्थाभ्युन्नते ! नाभिसूते ।
जिन ! वृजिनवितानध्वंसिनी तावकीन-
क्रमकमलनमस्यां काञ्चनस्याभिलाषम् ॥ (मालिनी) १

अपेतः कर्माब्धेरचलपरिचर्यापरिचयात्
प्रतिष्ठामापन्नः शिवमजरमासाद्य परमम् ।
रजन्याः स्वामीव त्वमजित ! जिनास्मासु तमसः
समुच्छ्रायं छायादलिततपनीयाम्बुजरुचे ! ॥ (शिखरिणी) २

श्रीशम्भव ! त्रिभुवनाधिपते ! रयेण
व्यालोलमिन्द्रियबलं बलवन्निगृह्य ।
निर्मूलितोच्चतममोहमहीरुहेण
गम्भीर एष भगवन् ! भवता भवाब्धिः ॥ (वसन्ततिलका)३

भवतः स्वभावसुभगाङ्गचङ्गिम-
व्यवधानभीरुमनसोऽभिनन्दन ! ।
मरुतां गिरौ जननमज्जनोत्तरं
नवबन्धुरा भरणडम्बरं सुराः ॥ (मञ्जुभाषिणी) ४

यदि सिद्धिवधूपरिरम्भविधौ
त्वरितोऽसि ततः सुमते ! सुमतिम् ।
विनिबर्हणमुल्बणमोहतते-
स्तुहिनामलसद्गुणकेलिगृहम् ॥ (त्रोटकम्) ५

श्रीमत्पद्मप्रभ ! जिन ! भवान् भव्यपद्मैकभानो !
पादानम्रान्न पुनरितरान् दुर्गतिद्वारतो यत् ।
नैतन्न्याय्यं तव खलु जने दर्शितप्रातिकूल्ये
सौहार्दं वा दधति सदृशी विश्रुता चित्तवृत्तिः ॥(मन्दाक्रान्ता)६

विश्वजनीन ! सुपार्श्वजिनेन्दो !
वारिनिधे ! करुणारसराशेः ।
त्वद्गुणभावनयामतिमान्यः
स्वस्ति परं परयाऽपि सतुल्यम् ॥ (दोधक) ७

तवान्तःसभं देशनारम्भभाजः
स्फुरन्त्यादराभावितन्यासमन्तात् ।
जनः स्वेऽतिमानं चिरोपार्जितेन
मलेनेव चन्द्रप्रभ ! प्रोज्झितात्मा (भुजङ्गप्रयातम्) ८

सुविधिजिन ! कदाचनापि पङ्कोद्-
भवसुभगौ सकलश्रियां निवासौ ।
न हृदयविषयं त्वदीयपादौ
नियतमतोऽहमभाजनं शुभानाम् ॥ (पुष्पिताग्रा) ९

खरतराघनिदाघभवक्लम-
प्रशमवारिद ! देव ! नतात्मनाम् ।
भगवता भवता शुभमद्भुतं,
चरितपूतमहीतल ! शीतल ! ॥ (द्रुतविलम्बितम्) १०

जलाञ्जलिं दातुमना जन ! त्वं बलीयसे चेद्भवशात्रवाय ।
वितीर्णलोकत्रयकम्पनाय श्रेयांसमश्रस्तरसस्तदानीम् ॥ ११
(उपजाति)

स्वामिनः किन्नराणां नराणां च ये
स्वर्गिणो ये सुरैश्वर्यभाजश्च ये ।
प्राप्य सर्वेऽप्यहंपूर्विकां सर्वदा
ते भवत्पूजने वासुपूज्य ! प्रभो ! ॥ (स्रग्विणी) १२

निरुपमपरहितवितरणनिरत !
त्वमसमशमधननिधनविरहित ! ।
विमल ! विमल-तमगुणगणविभवैः
सकलभुवनतलवदनतिलकताम् ॥ (गुणमणिनिकर) १३

शीतदीधितिकलारुचिरामा
त्वद्गुणावलिरनन्त ! जिनेश ! ।
यो न कृत्स्नजगतामपि कुक्षौ
मादृशां कथमसौ कलनीया ॥ (स्वागता) १४

चिरार्जिता सुचिरपित्तजन्मना
गुरूष्मणा प्रति कलमाकुलीकृताः ।
गिरं पयो मधुरतरां निपीय ते
शरीरिणो जिनवर ! धर्म ! निर्वृतिम् ॥ (रुचिता) १५

संसारे वन इव दुर्गतित्रियामा
व्यापारस्खलितदृशां चिरं जनेन ।
प्रत्यूषे रविमिव सुक्षिणेन (?) वीक्ष्य
त्वां शान्ते ! प्रकटितदुर्गमोक्षमार्गम् ॥ (प्रहर्षिणी) १६

कृतकर्मनिर्मथन ! कुन्थुजिन ! प्रयतस्त्वमुज्ज्वल-तपश्चरणे ।
अपि सार्वभौम विभवं तृणवन्नतनैकनाकिजनराजगण ! ॥ १७
(प्रमिताक्षरा)

क्षान्त्याधार ! ध्वस्तदुर्वारमार ! ज्ञानोदार ! प्राप्तसंसारपार ! ।
मुक्तेद्र्वार ! व्यक्तधर्मावतार !
स्वर्णाकार ! प्राणिजातं जिनार ॥ (शालिनी) १८

गीर्वाणश्रेणिमुक्तमन्दारमाला
स्रस्तं किञ्जल्कं सर्वतो विस्फुरन्तम् ।
एतस्मिन्नीले मल्लिनाथ ! त्वदङ्गे
प्रातस्सं भानोर्व्योमनीव प्रकाशम् ॥ (वैश्वदैवी) १९

मृगनाभिसनाभितां रुचा वपुषस्त्वं यदि सुव्रत ! प्रभो ! ।
ननु निर्मल निर्मलात्मनामुपमानत्वमुपागतः कथम् ॥ २०
(प्रबोधिता)

भवतः क्रमाङ्गुलिनखावलीनिर्गतै-
रजनीश्वरोज्ज्वलतरैः प्रभाजालिकैः ।
भगवन् ! नमे ! नमनशालिनां मौलिषु
स्फुटमालतीकुसुममालिकालङ्कृतिः ॥ (पथ्या) २१

नियतमिति नो मिथ्यावादाः स्मरं सह तृष्णया,
यदसि विमुखो राजीमत्यामथापि नृपश्रियाम् ।
कथमिव ततः स्वामिन् ! नेमे ! रतो विरतिः स्त्रियां
शिवपदपुरः साम्राज्याप्तौ भृशं च समुत्सुकः ॥ (हरिणी) २२

भर्ता भोगभृतां मणिप्रणयवान् यन्मूद्र्धमार्गेऽशुभद्
ध्यानाग्नेः स्खलयन् स्फुलिङ्गशबलं धूमोद्गमाडम्बरम् ।
स त्वं पार्श्व ! विशुद्धवैभवनिधे ! व्याधूतभूतग्रह-
ग्रामस्थाम सुनामधेय ! भगवन् ! विघ्नौघनिघ्नं जनम् ॥ २३
(शार्दूलविक्रीडितम्)

आत्मन्युद्भूतरागे विशदतरलसज्ज्ञानलक्ष्मीर्यदीये
यस्मिन् कल्पद्रुरूपे प्रणयमुपगते स्वेषु वेश्माङ्गणेषु ।
यत्पादाग्रेण मेरुक्षितिधरमधुना देवदेव ! पुमांसो
भीतत्राणैकतानं व्यसनशतविनाशाय तं वर्धमानम् ॥ २४

(स्रग्धरा)

इत्थं तीर्थकृतां ततेस्त्रिभुवनश्रीमौलिलीलास्रजो
विद्वान् सागरचन्द्र इत्यभिधया लब्धप्रसिद्धिस्तुतिम् ।
सर्वाङ्गं परितन्वतीं सुमनसामानन्दरोमोद्गमं
नानावृत्तनिवेशपेशलतरैर्युक्तां क्रियागुप्तकैः ॥ २५

(शार्दूलविक्रीडितम्)

पू.आ.श्री हेमचन्द्रसूरिविरचितः

श्रीऋषभप्रभोर्निर्वाणदनन्तरं श्रीभरतनरदेवेन अष्टापददाद्रौ विहितः

## १५. ॥ श्रीचतुर्विंशतिजिनस्तवः ॥

(अनुष्टुप्)

कल्याणैः पञ्चभिर्दत्तसुखाय श्वभ्रिणामपि ।
जगत्सुखकर ! नमस्तुभ्यं त्रिजगदीश्वर ! ॥ १

स्वामिन् ! विश्वजनीनेन त्वया विहरताऽन्वहम् ।
रविणेवाऽनुगृहीतं, चराचरमिदं जगत् ॥ २

अप्यार्याणामनार्याणां, प्रीतये व्यहरँश्चिरम् ।
गतिः परोपकाराय, भवतः पवनस्य च ॥ ३

उपकर्तुमिहाऽन्येषां, व्यहार्षीर्भगवंश्चिरम् ।
मुक्तौ कस्योपकाराय, गतोऽसि परमेश्वर ! ? ॥ ४

लोकाग्रमद्य लोकाग्रं, भवता यदधिष्ठितम् ।
मर्त्यलोकोऽयमद्यैव, मर्त्यलोकस्त्वयोज्झितः ॥ ५

अद्याऽपि साक्षात् त्वमसि, तेषां भव्यशरीरिणाम् ।
विश्वानुग्रहकरिर्णीं, देशनां ये स्मरन्ति ते ॥ ६

रूपस्थमपि ये ध्यानं, त्वयि नाथ ! प्रयुञ्जते ।
प्रभो ! प्रत्यक्षमेवाऽसि तेषामपि महात्मनाम् ॥ ७

यथा संसारमत्याक्षीरशेषं परमेश्वर ! ।
निर्ममोऽपि तथा जातु, मा त्याक्षीर्मानसं मम ॥ ८

जयाऽजित ! जगन्नाथ ! कषायविषयाजित ! ।
विजयाकुक्षिमाणिक्य ! जितशत्रुनृपात्मज ! ॥ ९

जितारिसूनो ! श्रीसेनाकुक्षिसम्भव ! सम्भव ! ।
भवव्योमातिक्रमणप्रभाकर ! नमोऽस्तु ते ॥ १०

सिद्धार्थापूर्वदिक्सूर्य ! संवरान्वयमण्डन ! ।
विश्वाभिनन्दन ! विभो ! ऽभिनन्दन ! पुनीहि नः ॥ ११

भगवन् ! मङ्गलादेवीमेघमालैकमौक्तिक ! ।
मेघान्वयाऽवनीमेघ ! सुमते ! भवते नमः ॥ १२

स्वामिन् ! धरधराधीशसरित्पतिनिशाकर ! ।
सुसीमाजाह्नवीपद्म ! पद्मप्रभ ! नमोस्तु ते ॥ १३

श्रीसुपार्श्वप्रभो ! पृथ्वीमलयावनिचन्दन ! ।
श्रीप्रतिष्ठकुलगृहप्रतिष्ठास्तम्भ ! पाहि माम् ॥ १४

महसेनान्वयनभश्चन्द्र ! चन्द्रप्रभ ! प्रभो ! ।
भगवन् ! लक्ष्मणाकुक्षिसरसीहंस ! रक्ष नः ॥ १५

श्रीरामानन्दनाराममहीकल्पमहीरुह ! ।
सुग्रीवसूनो ! सुविधे ! विधेहि शिवमाशु नः ॥ १६

नन्दादेवीहृदानन्द ! स्वामिन् ! दृढरथात्मज ! ।
जगदाह्लादशीतांशो ! श्रीशीतल ! मुदे भव ॥ १७

श्रीविष्णुदेवीतनय ! विष्णुराड्वंशमौक्तिक ! ।
निःश्रेयसश्रीरमण ! श्रेयांस ! श्रेयसे भव ॥ १८

जयाविदुरभूरत्न ! वसुपूज्यनृपात्मज ! ।
वासुपूज्य ! जगत्पूज्य ! विश्राणय शिवश्रियम् ॥ १९

श्यामाशमीशमीगर्भ ! कृतवर्मनृपात्मज ! ।
भगवन् ! विमलस्वामिन् ! विमलीकुरु मे मनः ॥ २०

श्रीसिंहसेनभूपालकुलमङ्गलदीपक ! ।
सुयशःस्वामिनीसूनोऽनन्तोऽनन्तं सुखं तनु ॥ २१

सुव्रताप्राग्गिरितटीभानो ! भानुनृपात्मज ! ।
श्रीधर्मनाथ ! भगवन् ! धेहि धर्मे धियं मम ॥ २२

विश्वसेनकुलोत्तंसाऽचिरादेवीतनूद्भव ! ।
श्रीशान्तिनाथो भगवन् ! भव नः कर्मशान्तये ॥ २३

सूरान्वयवियत्सूर ! श्रीशशीकुक्षिसम्भव ! ।
कुन्थुनाथ ! जगन्नाथ ! जयोन्मथितमन्मथ ! ॥ २४

देवीशरच्छ्रीकुमुद ! सुदर्शननृपात्मज ! ।
अरनाथ ! वितर मे, भवोत्तरणवैभवम् ॥ २५

कुम्भाम्भोधिसुधाकुम्भ ! प्रभावत्यङ्गसम्भव ! ।
कर्मक्षयमहामल्ल ! मल्लिनाथ ! शिवं दिश ॥ २६

सुमित्रहिमवत्पद्मह्रद ! पद्मावतीसुत ! ।
मुनिसुव्रततीर्थेश ! नमस्ते परमेश्वर ! ॥ २७

वप्रावज्राकरमहीवज्र ! श्रीविजयात्मज ! ।
जगन्नमस्यपादाब्ज ! नमस्तुभ्यं नमिप्रभो ! ॥ २८

शिवगामिन् ! शिवासूनो ! समुद्रानन्दचन्द्रमः ।
अरिष्टनेमे ! भगवन् ! नमः कारुणिकाय ते ॥ २९

अश्वसेनावनीपालकुलचूडामणे ! प्रभो ! ।
वामासूनो ! नमस्तुभ्यं, श्रीमत्पार्श्वजिनेश्वर ! ॥ ३०

सिद्धिसम्प्राप्तिसिद्धार्थ ! सिद्धार्थनृपनन्दन !
त्रिशलाहृदयाश्वास ! श्रीवीर ! भवते नमः ॥ ३१

पू.आ.श्री हेमचन्द्रसूरिविरचितम्

## १६. ॥ श्रीसकलार्हत् स्तोत्रम् ॥

(अनुष्टुप्)

सकलार्हत्प्रतिष्ठान-मधिष्ठानं शिवश्रियः ।
भूर्भुवः स्वस्त्रयीशान-मार्हन्त्यं प्रणिदध्महे ॥ १

नामाऽऽकृतिद्रव्यभावैः, पुनतस्त्रिजगज्जनं ।
क्षेत्रे काले च सर्वस्मिन्नर्हतः समुपास्महे ॥ २

आदिमं पृथिवीनाथ-मादिमं निष्परिग्रहम् ।
आदिमं तीर्थनाथं च, ऋषभस्वामिनं स्तुमः ॥ ३

अर्हन्तमजितं विश्व-कमलाकरभास्करम् ।
अम्लानकेवलादर्श-सङ्क्रान्तजगतं स्तुवे ॥ ४

विश्वभव्यजनाराम-कुल्यातुल्या जयन्ति ताः ।
देशनासमये वाचः, श्रीसम्भवजगत्पतेः ॥ ५

अनेकान्तमताम्भोधि-समुल्लासनचन्द्रमाः ।
दद्यादमन्दमानन्दं, भगवानभिनन्दनः ॥ ६

द्युसत्किरीटशाणाग्रो-त्तेजिताङ्घ्रिनखावलिः ।
भगवान् सुमतिस्वामी, तनोत्वभिमतानि वः ॥ ७

पद्मप्रभप्रभोर्देह-भासः पुष्णन्तु वः श्रियं ।
अन्तरङ्गारिमथने, कोपाटोपादिवारुणाः ॥ ८

श्रीसुपार्श्वजिनेन्द्राय, महेन्द्रमहिताङ्घ्रये ।
नमश्चतुर्वर्णसङ्घ-गगनाभोगभास्वते ॥ ९

चन्द्रप्रभप्रभोश्चन्द्र-मरीचिनिचयोज्ज्वला ।
मूर्तिर्मूर्तसितध्यान-निर्मितेव श्रियेऽस्तु वः ॥ १०

करामलकवद् विश्वं, कलयन् केवलश्रिया ।
अचिन्त्यमाहात्म्यनिधिः, सुविधिर्बोधयेस्तु वः ॥ ११

सत्त्वानां परमानन्द-कन्दोद्भेदनवाम्बुदः ।
स्याद्वादामृतनिःस्यन्दी, शीतलः पातु वो जिनः ॥ १२

भवरोगार्त्तजन्तूना-मगदङ्कारदर्शनः ।
निःश्रेयसश्रीरमणः, श्रेयांसः श्रेयसेऽस्तु वः ॥ १३

विश्वोपकारकीभूत-तीर्थकृत्कर्मनिर्मितिः ।
सुरासुरनरैः पूज्यो, वासुपूज्यः पुनातु वः ॥ १४

विमलस्वामिनो वाचः, कतकक्षोदसोदराः ।
जयन्ति त्रिजगच्चेतो-जलनैर्मल्यहेतवः ॥ १५

स्वयम्भूरमणस्पर्द्धि-करुणारसवारिणा ।
अनन्तजिदनन्तां वः, प्रयच्छतु सुखश्रियम् ॥ १६

कल्पद्रुमसधर्माण-मिष्टप्राप्तौ शरीरिणाम् ।
चतुर्धा धर्मदेष्टारं, धर्मनाथमुपास्महे ॥ १७

सुधासोदरवाग्ज्योत्स्ना-निर्मलीकृतदिङ्मुखः ।
मृगलक्ष्मा तमःशान्त्यै, शान्तिनाथः जिनोऽस्तु वः ॥ १८

श्रीकुन्थुनाथो भगवान्. सनाथोऽतिशयर्द्धिभिः ।
सुरासुरनृनाथाना-मेकनाथोऽस्तु वः श्रिये ॥ १९

अरनाथस्तु भगवाँ-श्चतुर्थारनभोरविः ।
चतुर्थपुरुषार्थश्री-विलासं वितनोतु वः ॥ २०

सुरासुरनराधीश-मयूरनववारिदम् ।
कर्मद्रून्मूलने हस्ति-मल्लं मल्लिमभिष्टुमः ॥ २१

जगन्महामोहनिद्रा-प्रत्यूषसमयोपमम् ।
मुनिसुव्रतनाथस्य, देशनावचनं स्तुमः ॥ २२

लुठन्तो नमतां मूर्ध्नि, निर्मलीकारकारणम् ।
वारिप्लवा इव नमेः, पान्तु पादनखांशवः ॥ २३

यदुवंशसमुद्रेन्दुः, कर्मकक्षहुताशनः ।
अरिष्टनेमिर्भगवान्, भूयाद्वोऽरिष्टनाशनः ॥ २४

कमठे धरणेन्द्रे च, स्वोचितं कर्म कुर्वति ।
प्रभुस्तुल्यमनोवृत्तिः, पार्श्वनाथः श्रियेऽस्तु वः ॥ २५

श्रीमते वीरनाथाय, सनाथायाद्भुतश्रिया ।
महानन्दसरोराज-मरालायार्हते नमः ॥ २६

कृतापराधेऽपि जने, कृपामन्थरतारयोः ।
इषद् बाष्पार्द्रयोर्भद्रं, श्रीवीरजिननेत्रयोः ॥ २७

जयति विजितान्यतेजाः, सुरासुराधीशसेवितः श्रीमान् ।
विमलस्त्रासविरहित-स्त्रिभुवनचूडामणिर्भगवान् ॥(आर्या) २८

वीरः सर्वसुरासुरेन्द्रमहितो, वीरं बुधाः संश्रिताः,
वीरेणाभिहतः स्वकर्मनिचयो, वीराय नित्यं नमः ॥
वीरात्तीर्थमिदं प्रवृत्तमतुलं, वीरस्य घोरं तपो,
वीरे श्रीधृतिकीर्तिकान्तिनिचयः, श्रीवीर ! भद्रं दिश ॥ २९
(शा.वि.)

अवनितलगतानां कृत्रिमाकृत्रिमानां,
वरभवनगतानां दिव्यवैमानिकानाम् ।
इह मनुजकृतानां देवराजाऽर्चितानां,
जिनवरभवनानां भावतोऽहं नमामि ॥ (मालिनी) ३०

सर्वेषां वेधसामाद्य-मादिमं परमेष्ठिनाम् ।
देवाधिदेवं सर्वज्ञं, श्रीवीरं प्रणिदध्महे ॥ (अनुष्टुप्) ३१

(शार्दूलविक्रीडित)

देवोऽनेकभवार्जितोर्जितमहा-पापप्रदीपानलो,
देवः सिद्धिवधूविशालहृदया-लङ्कारहारोपमः ।
देवोऽष्टादशदोषसिन्धुर-घटा-निर्भेदपञ्चाननो,
भव्यानां विदधातु वाञ्छितफलं, श्रीवीतरागो जिनः ॥ ३२

ख्यातोऽष्टापदपर्वतो गजपदः, सम्मेतशैलाभिधः,
श्रीमान रैवतकः प्रसिद्ध-महिमाशत्रुञ्जयो मण्डपः ।
वैभारः कनकाचलोऽर्बुदगिरिः, श्रीचित्रकूटादय-
स्तत्र श्रीऋषभादयो जिनवराः, कुर्वन्तु वो मङ्गलम् ॥ ३३

पू.आ. श्री रवि(जिन?)प्रभसूरिविरचितम्

## १७. ॥ श्रीचतुर्विंशतिजिनमङ्गलाष्टकम् ।

(द्रुतविलम्बित)

नतसुरेन्द्रजिनेन्द्रयुगादिमा-ऽजित ! जिताऽखिलकर्म महारिपो!
अभवसंभवसंभवनाथ ! मे प्रणत कल्पतरो ! कुरु मङ्गलम् ॥१

त्वमभिनन्दन ! नन्दननन्दन ! ध्रुवगते ! सुमतेसुमते ! सदा ।
सुकृतपद्म सुपद्म ! जिनेश ! मे, प्रसृतकीर्तितते ! कुरु मङ्गलम्॥२

रुचिरपार्श्वसुपार्श्व ! जिनेश्वरा-
ऽमृतमयूखमनोज्ञ शशिप्रभो ! ।
सुखनिधे ! सुविधे सुविधीश ! हे,
वरकृपाकर ! मे कुरु मङ्गलम् ॥ ३

मलयचन्दनशीतलशीतल ! प्रवरविष्णुनरेश्वरनन्दन ! ।
नृपतिराड्वसुपूज्यसुतान्वहं, प्रबलतीर्थपते ! मे कुरु मङ्गलम्॥४

विमलनाथ ! नृनाथनतक्रम !
स्फुरदनन्तयशोमदनन्त ! मे ।
निहतकर्मसुधर्म ! धियांनिधे !,
विविधधर्मनिधे ! कुरु मङ्गलम् ॥ ५

विहितशान्तिकशान्ति जिनोत्तम ! ध्वसितमन्मथकुन्थुजिनप्रभो!।
अरजिनेश ! सुरेशनताऽनिशं, कलमरालगते ! कुरु मङ्गलम् ॥६

कुमतमल्ल ! सुमल्लिविभो ! भृशं, सुमुनिसुव्रत ! सुव्रत सुव्रत ! ।
ननुदमेननमेन नमेऽनमन्, प्रहतपापमते ! कुरु मङ्गलम् ॥ ७

शिवनिवास ! शिवाङ्गसमुद्भव ! प्रवरपार्श्वकपार्श्वकपार्श्वक ! ।
भवदवानलनीर ! सुवीर हे ! कृतसुरेन्द्रनते ! कुरु मङ्गलम् ॥८

इति रवि(जिन)प्रभसूरिनता जिना, विमलकेवललोकितभूतलाः।
सकलसंसृतिसागरपारदा, ददतु पूज्यतमाः कुरु मङ्गलम् ॥ ९

पू.आ.श्री सोमतिलकसूरिविरचितम्

## १८. ॥ श्रीचतुर्विंशतिजिनस्तवनम् ॥

(अनुष्टुप्)

जिन ! श्रीनाभिजात ! त्वां नतामरनराजित ! ।
वन्देऽहं हतसंसारसम्भवामलकेवल ! ॥ १

देव संवरसम्भूते सुमते ! कुमतापह ! ।
सुसीमाधरसम्भूतपरमानन्द ! पाहि माम् ॥ २

मयापि पृथिवीजात ! सुयशो भवतीशितः ।
महसेनभवासङ्ग सुविधे सलया रतिः ॥ ३

श्रेयसे भव मह्यं त्वं निकामशम ! शीतल ! ।
कृतानन्तशिवश्रेयन् जयाङ्गज मदासन ॥ ४

विमल ! ज्ञानसम्पन्न ! सदानन्तसुखावह ! ।
मदनं मदलं धर्म नाशयाशयसङ्गतम् ॥ ५

वसुधाविहितानन्द ! शान्ते ! शान्तरसालय ! ।
तमो हर ममाऽऽशु श्रीनन्दनासारमानहृत् ॥ ६

सुगन्धिशीलमल्ले ! त्वां भावारिभयभीलुके ।
मयीह सुव्रतस्वामी भवामदन मे भय ॥ ७

शिवाभव नमामि त्वां न वामेयमदासन ।
हतमोह महावीर ! नवीनहरिदीधिते ॥ ८

श्रीसोमप्रभसद्वर्णगुरुं गुरुमुदालयम् ।
वन्दे संयमरम्य त्वा महाशय रमावरम् ॥ ९

एवं श्रीजिन यः सोमयशोमलननौविन ।
तं पालय मुदाकुन्दतमः सूर ! भवारितः ॥ १०

यस्त्वां श्रीजिनसूदितोन्मदमनश्चौरः प्रणौति श्रमं,
जित्वा सोढगरिष्ठकष्टदहनं रोचिष्णुभालद्युतम् ।
दत्तामर्त्यपवित्रसम्मद ! पठन् कान्तं विशङ्कः स्तवं,
वन्द्याऽहनाय भवान् जिनाः प्रददतामन्येपि तस्मै शिवम् ॥११

पू.आ.श्री जिनसेनसूरिकृतंहरिवंशपुराणस्थम्

## १९. ॥ श्रीचतुर्विंशतिजिनमङ्गलम् ॥

(अनुष्टुभ्)

सिद्धं ध्रौव्यव्ययोत्पादलक्षणद्रव्यसाधनम् ।
जैनं द्रव्याद्यपेक्षातः साद्यनाद्यथ शासनम् ॥ १

शुद्धज्ञानप्रकाशाय लोकालोकैकभानवे ।
नमः श्रीवर्द्धमानाय वर्द्धमानजिनेशिने ॥ २

नमः सर्वविदे सर्वव्यवस्थानां विधायिने ।
कृतादिधर्मतीर्थाय वृषभाय स्वयम्भुवे ॥ ३

येन तीर्थमभिव्यक्तं द्वितीयमजितायितम् ।
अजिताय नमस्तस्मै जिनेशाय जितद्विषे ॥ ४

शं भवे वा विमुक्तौ वा भक्ता यत्रैव शम्भवे ।
भेजुर्भव्या नमस्तस्मै तृतीयाय च सम्भवे ॥ ५

तीर्थं चतुर्थमर्थ्यर्थं यश्चकाराभिनन्दनः ।
लोकाभिनन्दनस्तस्मै जिनेन्द्राय नमस्त्रिधा ॥ ६

पञ्चमं सप्रपञ्चार्थं तीर्थं वर्तयति स्म यः ।
नमः सुमतये तस्मै नमः सुमतये सदा ॥ ७

ककुभोऽभासयद्यस्य जितपद्मप्रभा प्रभा ।
पद्मप्रभाय षष्ठाय तस्मै तीर्थकृते नमः ॥ ८

यस्तीर्थं स्वार्थसंपन्नः परार्थमुदपादयत् ।
सप्तमं तु नमस्तस्मै सुपार्श्वाय कृतात्मने ॥ ९

अष्टमस्येन्द्रजुष्टस्य कर्त्रे तीर्थस्य तायिने ।
चन्द्रप्रभजिनेन्द्राय नमश्चन्द्राभकीर्तये ॥ १०

देहदन्तप्रभाक्रान्तकुन्दपुष्पत्विषे नमः ।
पुष्पदन्ताय तीर्थस्य नवमस्य विधायिने ॥ ११

शुचिशीतलतीर्थस्य जन्तुसंतापनोदिनः ।
दशमस्य नमः कर्त्रे शीतलायापथाशिने ॥ १२

तीर्थं व्युच्छिन्नमुद्भाव्य भव्यानामाजवञ्जवम् ।
चिच्छेदैकादशो योऽर्हंस्तस्मै श्रीश्रेयसे नमः ॥ १३

कुतीर्थध्वान्तमुद्धूय द्वादशं तीर्थमुज्ज्वलम् ।
नमस्कृतवते भर्त्रे वासुपूज्यविवस्वते ॥ १४

विमलाय नमस्तस्मै यः कापथमलाविलम् ।
त्रयोदशेन तीर्थेन चकार विमलं जगत् ॥ १५

तस्मै नमः कुसिद्धान्ततमोभेदनभास्वते ।
चतुर्दशस्य तीर्थस्य यः कर्त्ताऽनन्तजिज्जिनः ॥ १६

अधर्मपथपातालपतदुद्धरणक्षमम् ।
कर्त्रे पञ्चदशं तीर्थं धर्माय मुनये नमः ॥ १७

सृष्ट्रे षोडशतीर्थस्य कृतनानेतिशान्तये ।
चक्रेशाय जिनेशाय नमः शान्ताय शान्तये ॥ १८

येन सप्तदशं तीर्थं प्रावर्त्ति पृथुकीर्त्तिना ।
तस्मै कुन्थुजिनेन्द्राय नमः प्राक्चक्रवर्त्तिने ॥ १९

नमोऽष्टादशतीर्थाय प्राणिनामिष्टकारिणे ।
चक्रपाणिजिनाराय निरस्तदुरितारये ॥ २०

तीर्थेनैकोनविंशेन स्थापितस्थिरकीर्त्तये ।
नमो मोहमहामल्लमाथिमल्लाय मल्लये ॥ २१

स्वं विंशतितमं तीर्थं कृत्वेशो मुनिसुव्रतः ।
अतारयत् भवाल्लोकं यस्तस्मै सततं नमः ॥ २२

नमये मुनिमुख्याय नमितान्तर्बहिर्द्विषे ।
एकविंशस्य तीर्थस्य कृताभिव्यक्तये नमः ॥ २३

भास्वते हरिवंशाद्रिश्रीशिखामणये नमः ।
द्वाविंशतीर्थसच्चक्रनेमयेऽरिष्टनेमये ॥ २४

धर्ता धरणनिर्धूतपर्वतोद्धरणासुरः ।
त्रयोविंशस्य तीर्थस्य पाश्र्वो विजयतां विभुः ॥ २५

इत्यस्यामवसर्पिण्यां ये तृतीयचतुर्थयोः ।
कालयोः कृततीर्थास्ते जिना नः सन्तु सिद्धये ॥ २६

पू.आ.श्री रविषेणाचार्यकृत-श्रीपद्मचरितान्तर्गतम्

## २०. ॥ श्रीचतुर्विंशतिजिनमङ्गलम् ॥

(अनुष्टुभ्)

सिद्धं संपूर्णभव्यार्थं सिद्धेः कारणमुत्तमम् ।
प्रशस्तदर्शनज्ञानचारित्रप्रतिपादनम् ॥ १

सुरेन्द्रमुकुटाश्लिष्टपादपद्मांशुकेशरम् ।
प्रणमामि महावीरं लोकत्रितयमङ्गलम् ॥ २

प्रथमं चावसर्पिण्यामृषभं जिनपुङ्गवम् ।
योगिनं सर्वविद्यानां विधातारं स्वयम्भुवम् ॥ ३

अजितं विजिताशेषबाह्यशारीरशात्रवम् ।
शंभवं शं भवत्यस्मादित्यभिख्यामुपागतम् ॥ ४

अभिनन्दितनिःशेषभुवनं चाभिनन्दनम् ।
सुमतिं सुमतिं नाथं मतान्तरनिराशिनम् ॥ ५

उद्यदर्ककरालीढपद्माकरसमप्रभम् ।
पद्मप्रभं सुपार्श्वं च सुपार्श्वं सर्ववेदिनम् ॥ ६

शरत्सकलचन्द्राभं परं चन्द्रप्रभं प्रभुम् ।
पुष्पदन्तं च संफुल्लकुन्दपुष्पप्रभद्विजम् ॥ ७

शीतलं शीतलध्यानदायिनं परमेष्ठिनम् ।
श्रेयांसं भव्यसत्त्वानां श्रेयांसं धर्मदेशिनम् ॥ ८

वासुपूज्यं सतामीशं वसुपूज्यं जितद्विषम् ।
विमलं जन्ममूलानां मलानामतिदूरगम् ॥ ९

अनन्तं दधतं ज्ञानमनन्तं कान्तदर्शनम् ।
धर्मं धर्मध्रुवाधारं शान्तं शान्तिजिनाहितम् ॥ १०

कुन्थुप्रभृतिसत्त्वानां कुन्थुं हितनिरूपितम् ।
अशेषक्लेशनिर्मोक्षपूर्वसौख्यारणादरम् ॥ ११

संसारस्य निहन्तारं मल्लं मल्लिं मलोज्झितम् ।
नमिं च प्रणताशेषं सुरासुरगुरुं विभुम् ॥ १२

अरिष्टनेमिमन्यूनारिष्टनेमिं महाद्युतिम् ।
पार्श्वं नागेन्द्रसंसक्तपरिपार्श्वं विशां पतिम् ॥ १३

सुव्रतं सुव्रतानां च देशकं दोषदारिणम् ।
यस्य तीर्थे समुत्पन्नं पद्मस्य चरितं शुभम् ॥ १४

अन्यानपि महाभागान् मुनीन् गणधरादिकान् ।
प्रणम्य मनसा वाचा कायेन च पुनः पुनः ॥ १५

पू.आ. श्री सोमसुन्दरसूरिशिष्य (ज्ञानसागरसूरि ?) कृतम्

## २१. ॥ श्रीचतुर्विंशति-जिनस्तवनम् ॥

(शिखरिणी)

श्रियः श्रीमान् विश्राणयतु भवतां नाभिनृपभू-
र्बभौ यस्य स्कन्धेऽञ्जनघनविनीलीऽलकततिः ।
हृदन्तः संसिक्ताशमरसभरैः प्रादुरभवत्
प्रसर्पन्तीवोच्चैरसमसमतावल्लिविततिः ॥ १

महोन्नत्या गत्या पुनरनुपमैर्दानललितै-
र्जितंमन्यो मन्ये भजति यतिपं यद्द्विपपतिः ।
शमश्रीसाम्राज्यं नृपतिजितशत्रूज्ज्वलकुले
सकेतुः श्रीहेतुः सृजतु जगतः श्रीमदजितः ॥ २

जगत्प्रेयः श्रेयः श्रियमयमनन्तां वितनुतां
सतां विश्वश्लाघ्यातिशयविभवः शम्भवबिभुः ।
ध्वजीचक्रे चेतोऽभिमतवसतिप्राप्तिचतुरं
तुरङ्गं रङ्गाद् यः शिवनगरयानोत्सुक इव ॥ ३

चतुर्थस्तीर्थेशः सुखयतु स यस्यैककपिना-
प्युपास्तेस्तज्जातिः प्रथितमहिमा राममहिता ।
अबध्नादम्भोधिं निरवधि विधत्ते स्म जनता
कृतातङ्का लङ्का दशमुखमुखम्लानिमपि च ॥ ४

गुरुत्वं पावित्र्यप्रथनमघमङ्गल्यमहिमा
सुवर्णः सद्वर्ण्यस्त्रिभुवनविभूषाविधिरपि ।
दिशन्ते स्वर्णस्याद्भुततरयदंशप्रभवतां
सतां तोषं पोषं नयतु सुमतिः स व्रतिपतिः ॥ ५

स्फुरत्पद्मासद्मानुपमपदपद्मः प्रणमतां
महापद्मः पद्मप्रभविभुरभीष्टं घटयतु ।
सुरङ्गा रङ्गन्ती श्रयति परितः कुङ्कुमरस-
च्छटाच्छोटच्छायां त्रिजगति यदङ्गद्युतिततिः ॥ ६

सुपार्श्वः श्रीतीर्थाधिपतिरहितध्वंसनविधि-
प्रवीणः प्रीणातु प्रणतजनतामीहितफलैः ।
फणा पञ्च प्राञ्च-त्प्रशमरससिक्तव्रतलता-
प्रतानप्रख्यत्वं दधति वितता यस्य शिरसि ॥ ७

यतीन्द्रः श्रीचन्द्रप्रभविभुरसङ्गः शुभतती-
र्वितीर्यादार्याणां यदनुदिनसङ्गादिव विधुः ।
तमोहर्त्ता कर्त्ता कुवलयविकाशं विशदरुक्
कलाशाली सोमः समजनि शिवस्यापि मुकुटम् ॥ ८

विधेर्वृद्धेः सिद्धीर्दधिरुदधिरद्वैतमहसां
निधिः श्रीणां स्वामी शमवदवधिः पातु सुविधिः ।
शरच्चन्द्रो ज्योतिद्युतिततिमिषाद्यस्य परितः
सितध्यानं किन्तु प्रसृमरतरं प्रादुरभवत् ॥ ९

अतुल्याः कल्याणश्रिय उरुसुवर्णच्छविवपुः
स पुष्यात् मोक्षश्रीकलितललितः शीतलजिनः ।
ध्वजीभावाद् यस्यानुपममहिमानं किमु विद-
न्नतुच्छं श्रीवत्सं वहति हृदये श्रीपतिरपि ॥ १०

प्रभुः श्रेयःश्रितः प्रगुणयतु नैःश्रेयसपद-
प्रदः श्रीश्रेयांसः श्रितजनततेः श्रायसयशाः ।

स्वयं यः स्याद्वादे परविरचितां विष्णुतनुजै-
रपि प्रद्युम्नत्वं जहदिह विरोधोक्तिमरुधत् ॥ ११

वने व्याधा बाधां विदधति कृतान्तश्च नुदते
स्वयानं मां कुर्वन्निति भयभरेणेव शरणम् ।
ध्वजव्याजाद् भेजे यमियमहिषः पुष्यतु स वः
शिवश्रीप्रोल्लासं नृपवसुपूज्यात्मजजिनः ॥ १२

क्षमाभृज्जज्ञेऽहं त्वमिव तदपि क्रूर इति मे-
ऽपवादः प्रख्यातस्तदपहरतं विश्वहितकृत् ।
यमेवं विज्ञीप्सुः श्रयति किल कोलः स विमल-
प्रभुः श्रीसंवासः किसलयतु कल्याणकमलाम् ॥ १३

स्फुरज्ज्ञानात्वोकं रणदनणुलोकम्पृणगुणै-
रनन्तं श्रीमन्तं भजत समनन्तं जिनपतिम् ।
दशामेकामेकान्तिकसुखविशेषामपि चतु-
र्दशत्वं बिभ्राणः सततमुपभुङ्क्ते जगति यः ॥ १४

सशर्मश्रीनर्म स्थिरयतु कुकर्मद्रुहुतभुक्
सधर्मः श्रीधर्मः प्रभुरनिभधर्मप्रभुरभूः ।
अपि स्फूर्जद्वज्रस्त्यजति च तयोर्दुश्च्यवनजं
कलावद्द्वेषित्वं न च भजति भानोरपि सुतः ॥ १५

रणद्वीणावेणुक्वणनिपुणवाणीश्रवणतः
सरङ्गः सारङ्गस्त्यजति यदुपान्तं न नियतम् ।
स सार्वः किं कुर्वत्कनकतनुकान्तिः प्रतिहता-
पशान्तिं श्रीशान्तिर्जयति जगदद्वैतमहिमा ॥ १६

जगन्नाथः पाथःपतिरिव सनाथः शमरसैः
पृथुश्रीश्रीकुन्थुः प्रथयति सदानन्दद्युपथम् ।
शुभाकृष्टिं दृष्टिं स्फुटयति सतां सौरिरपि य-
स्तथा श्रीपुत्रोऽपि श्रयति यतिचित्तेषु वसतिम् ॥ १७

सतां सीमा श्रीमानरजिनवरः किन्नरनर-
स्फुरद्गीतिस्फीति प्रथितमहिमा वः शिवकृते ।
ध्वजीभूयः श्रेयः सदनयदुपास्तेः परिचयाद्
ध्रुवं तं व्यावर्त्तः स्फुरति जगतां मङ्गलकृते ॥ १८

प्रफुल्लश्रीमल्लिप्रभुरभिमतं पल्लवयतु
प्रमावल्लीहल्लीसकमलयमन्दानिलतुलः ।
समावित्तां यावत्त्रिभुवन[नृ]चिन्तावितरण-
श्रियं यं शिश्राय ध्वजकपटवान् दैवतघटः ॥ १९

नभ(म)स्पा(स्या)मः श्यामच्छविमविरतं सुव्रतविभुं
भवव्याधिग्रस्तं त्रिजगदगदङ्कारचरितम् ।
क्षमाधारी स्फारीकृतरतिरिव श्रायससुखे
सिषेवे यं कूर्माधिपतिरतिगुप्तेन्द्रियगणः ॥ २०

मुदं दत्ता मत्ताऽऽन्तररिपुवपुःपाटनपटु-
स्फुटाप्यानध्वानस्फुरदसिरसौ श्रीनमिजिनः ।
यदङ्गे रङ्गेण स्थितिमकृत नित्यं निजसुहृद्
दृशोः प्रीतिस्फीतेरिव विकचनीलाम्बुजमिदम् ॥ २१

जगन्मङ्गल्यश्रीकरणनिपुणध्वानमधुर-
स्फुरत्कण्ठश्रीभिर्विजित इव कम्बुर्भजति यम् ।

कृतव्यापव्यापत्प्रसरदुरुवल्लीघनवने
सनेमिः श्रीनेमिः शमितभवततिर्विजयते ॥ २२

अमेया देयाद्वः शिवसुखरमा रम्यसुषमा-
भिरामः श्रीपार्श्वस्त्रिभुवनविभोर्यस्य शिरसि ।
परां शोभां भुङ्क्ते सजलजलभृन्नीलमतुल-
श्रियः सत्रं छत्रं फणिपतिफणामण्डलमिषात् ॥ २३

सुखानि श्रीखानिर्जनयतु जिनेन्द्रः स चरमः
समश्रीविश्रामावनिरवनहेतुस्तनुमताम् ।
नृसिंहं यं सिंहः सुपरिवरिवस्यंस्त्रिभुवने
सजातीयैः सङ्गः परिणतिसुरङ्गं गमयति ॥ २४

विनम्राणां मौलौ कलयति यदीयांह्रियुगली
नखोल्लेखप्रेङ्खत्त्विषिततिवितानस्तनुमताम् ।
जगज्जैत्रच्छत्रश्रियमपहृतानन्तवृजिनां
जिनाधीशाः सिद्धिं विदधतु चतुर्विंशतिरमी ॥ २५

आनम्रामरदेवसुन्दरशिरःकोटीरकोटीलुठत्
माणिक्योल्लसदंशुमांसलपदप्रेङ्खन्नखज्योतिषः ।
एवं श्रीजिनपुङ्गवाः स्तवपथं नीता मया सादरं
दद्युः श्रीगुरुसोमसुन्दरतरज्ञानश्रियं शाश्वतीम् ॥(शा.वि.) २६

पू.आ. श्री जयतिलकसूरिकृता

पादस्याद्यन्तयोर्हारानुकारविन्यस्तैः

वर्तमानातीतानागतविहरमाणशाश्वतजिननाम-

पूर्व-पश्चिमजिननामाक्षरनिबद्धा जिनद्वयस्तवरूपा चत्वारः चतुर्विंशतिका

## २२. ॥ श्रीवर्तमानजिनचतुर्विंशतिका ॥

(उपजाति)

श्रीनाभिसूनो ! जिनसार्वभौम,
वृषध्वज त्वन्नतये ममेहा ।
षड्जीवरक्षापर देहि देवी-
भर्त्रर्चितं खं पदमाशु वीर ! ॥ १

श्रीनन्दनाद्या व्यथयन्ति पापा,
अवाप्त देवाजित मां सुपार्श्व ।
जिनाङ्गिनां रोगततिर्विलीना,
तवाभिधानादपि पार्श्वनाथ ! ॥ २

संसारपारोऽजनि मेऽद्य जाने,
भवत्पदौ संभव यद्यजामि ।
वश्याः स्वयं ते मदमोहमाना,
अनङ्गभङ्गे सति नेमिनाथ ! ॥ ३

भिदेलिमैना अभिनन्दनेन,
नन्द त्वमंह्री तव पूजयामि ।
दया दरिद्रेऽपि नृपे समाना,
नमे कथं ते मयि सा न नाथ ॥ ४

श्रीखण्डवत्तापहरा शिवश्री-
सुखाय गीस्ते सुमते प्रजासु ।
महस्तु ते सुव्रतदेव तीव्र-
तिरस्क्रियाकृत्तमसोऽपि तात ॥ ५

पद्मप्रभाक्षिद्वयमंहसाम-
द्मरं मुदे ते स्थिरपक्ष्मवल्लि ।
प्रभो प्रभा ते भुवि दीप्यमाना
भजद्यमीत्वं जिन ! मल्लिनाथ ! ॥ ६

श्रीमान् सुपार्श्वोऽपि हि निस्तमाअ-
सुमत्सुखं देशनया चकार ।
पारङ्गतः पातकवल्लरीप-
र्श्वग्रं जनं चारपतिः पुनाति ॥ ७

चन्द्रप्रभाणोर्हर मेऽघशङ्कुं,
द्रष्टास्मि हृत्ते समकुम्भिकुन्थु ।
प्रबालतां मुञ्चति नाप्ययंना,
भक्तः सुवर्णे त्वयि कुन्थुनाथ ! ॥ ८

श्रीरङ्गजा ते सुविधे सदाशां
सुधांशुगौरी विशदीकरोति ।
विश्वैकवन्द्योऽसि मृगाङ्क नाना,
धिनोषि कोकानपि शान्तिनाथ ! ॥ ९

श्रीशीतल ! त्वां जितमोहयोध,
शीलाढ्य याचे जिनराज शर्म ।
तव स्वरूपं हृदि सन्दधाना,
लयं लभन्ते त्वयि धर्मनाथ ! ॥ १०

श्रीवत्सिनि श्रीर्हृदि तावके श्री-
श्रेयांस सक्ता नितरामहोअ ।
यांमे निजां देहि वदान्य दीनं
समीक्ष्य वीराग्रिम मामनन्त ! ॥ ११

वाग्वासुपूज्यागमिकी श्रुतिश्री-
सुखं कषन्ती भवताऽभ्यसावि ।
पूर्णा ममाशा विमलाद्य नाम,
ज्यया समं लीनशिरो नतोऽलं ॥ १२

नवीनपीनस्वनमानगानकि-न्नराननानर्घ्यनवेन मानसे ।
नमानधा नम्रनरेनका नता, नवं नवं न स्वनता न जैनपाः ॥१३
(वंशस्थ)

इत्थं नायकपद्मरागरुचिरा सत्कण्ठभूषाकरी,
येषां नाममयी सुवर्णमणिभिर्हारावली निर्मिता ।
चारित्रप्रभदीक्षितस्तुतपदा देयासुरुच्चैर्जिनाः,
श्रीशत्रुञ्जयशेखरद्युतिभृतः सर्वेऽपि ते मङ्गलम् ॥(शा.वि.)१४

# श्री अतीतजिनचतुर्विंशतिका

(उपजाति)

के केवलज्ञानिजिनं शिवश्री,
वरं न याचन्त इहात्मभासम् ।
लसन्त्यलं सम्प्रतिदेवदीप्र-
ज्ञानार्णवे कच्छपवज्जगंति ॥ १

नीता न निर्वाणपदं जनाः श्री-
निर्वाणिना के न विनैव दास्यम् ।
वाणी तव स्यन्दन ! सौख्यकन्द,
णीधातुवत्प्राप्तिवदा न किन्न ॥ २

श्रीसागरस्त्वं कुरु मेऽविनाशि,
सारं सुखं सागरदेवदेव ! ।
गरिष्ठतां को गदितुं शशाक,
रसज्ञया ते शिवकृज्जितार ॥ ३

महायशस्तीर्थपते ! त्वयाशु,
हास्यादिषट्कं विजितं विशुद्ध ।
यशो दिशस्ते निखिला जगाम,
शार्वाङ्गरुक् शुद्धमतेऽस्तरीति ॥ ४

श्रीमन्नत ! त्वां विमलाब्जराजि-
विराजितं को विमलं न मेने ।
मनोरथं कस्य भवान्न विश्व-
लक्ष्मीपते ! देव जिनेश्वरार ॥ ५

सर्वानुभूते ! तव केवलश्री-
र्वागीशवाचामपि चित्रताकृत् ।
नुतिस्तवैषा पुनरुक्तिभूता
भूयोऽर्थिता यत्क्रियते कृतार्थ ॥ ६

तिलत्रिभागे न तुलामियाय,
श्रीश्रीधरस्यापि भवान् हिमांशो ! ।
धर्मद्रुमाराममिदं प्रबोध-
रम्यं श्रयामीति यशोधरोरः ॥ ७

दत्तक्रमौ विश्वतमोलताअ-
त्तश्चन्द्रसूर्याविव रुक्चयेन ।
देवो मुदे वोऽस्त्वनलो विशाल-
वक्षा विपक्षागदवानलश्रीः ॥ ८

दामोदरे यः प्रणतिं ततान
मोहं विजित्याशु स मोक्षगामी ।
ददाति भक्ताय नमीश्वरोऽश्व-
रत्नादिलक्ष्मीः शिवमप्युदारः ॥ ९

श्रीमान् सुतेजाः परमोन्मनाअ-
सुखक्षयायास्तु नयैकशास्ता ।
तेरे त्वयाऽस्ताघ ! भवार्णवोऽघ
जात्याकुलोऽस्ताघलसज्जडश्रीः ॥ १०

श्रीस्वामिवक्त्राब्जमलीन् विकाशि
स्वामोदपूरेण समाजुहाव ।
मीमांसते कः शिवगत्यपांग-
मुच्चैर्लयं यः श्रुतिषु प्रयाति ॥ ११

निश्शक्तिरासीन्मुनिसुव्रतश्री-
सुतोऽपि ते सद्व्रतखण्डनासु ।
व्रध्नो यथा विश्वविसारि धाम,
तथाऽतिविश्वं सुमतिर्दधाति ॥ १२

नरानराणाममरासुरेन-नवीनलक्ष्मीं ददतो नतेन ।
नमाम्यतीताननघाननेन, नवेन नुत्वा न न मस्तकेन ॥ १३

इत्थं स्वस्तिकनायकेन रुचिरा सत्कण्ठभूषाकरी,
येषां नाममयैः सुवर्णमणिभिर्हारावली निर्मिता ।
चारित्रप्रभदीक्षितस्तुतपदा देयासुरुच्चैर्जिना-
स्ते श्रीसूरिपदाज्जयादितिलकस्यास्यापि मे मङ्गलम् ॥ १४
(शा.वि.)

## श्री अनागतजिनचतुर्विंशतिका

(उपजाति)

पद्मा दुरापा तव पद्मनाभ !,
द्मतेव शब्दादिगता जिनेन्द्र ।
नाथोऽङ्गिनां भद्रकृदाप्तगीः कृत्,
भवेन्दिराया इव साध्वहोअः ॥ १

सूरादिदेवाभ्युदयं जनीनं,
रवेरिवेच्छामि तवेह तात ! ।
देशे क्व ते सङ्गम एष भावी,
वरेण्यपुण्याप्तिरनन्तवीर्य ! ॥ २

श्रीभाजि ते पादपयोजवृन्दे,
सुपार्श्व ! भृङ्गामि कदा मुदैव ।
पार्श्वे न दोषास्तव सन्ति वादे,
श्वपूर्वशब्दा इव देवदेव ! ॥ ३

स्वयम्प्रभ प्राभवमस्तु काम-
यंतुस्तवोल्लङ्घितमोहमल्ल ।
प्रभो ! पतन्तं प्रबले प्रमादे,
भव्यं जनं प्रोद्धर मल्लदेव ! ॥ ४

सर्वानुभूते ! तव भाविनीश्री-
र्वाचंयमैरत्र न कैरनावि ? ।
नुन्नो नियत्या शुभयार्थपुंज-
भूताय ते श्रीविजय स्तवाय ॥ ५

तिरस्कुरु त्वं कमनीयकाय !,
देवश्रुतारीनघकौशिकांशो ! ।
वचो विपक्षोऽपि यशोधराधः,
श्रुत्वा न कर्ता तव हेतुसारं ॥ ६

तमस्युदेष्यत्युदयोडुपश्रीः,
उत्काश्चकोरा रचयन्तु लासं ।

दधाति ते संवर ! सूरतैव,
यथा प्रभामेधि तथाप्रकारः ॥ ७

श्रीरागमिश्रो भविताऽत्र यः श्री-
पेढाल ! कैस्ते ध्वनिराप्यतेसः ? ।
ढाक्कस्वराभं भुवि यस्य नामा-
लक्ष्मीप्रयाणे स जिनः समाधिः ॥ (इन्द्रवज्रा) ८

पोताद्विषः पोट्टिल ! भान्ति केचि-
ट्टिड्डा इवार्कस्य रुचौ तवात्र ।
लयं जना नामनि ये तवागुः -
श्रीः सेवते तानिह चित्रगुप्त ! ॥ ९

सितादिकीर्ते ! तव कीर्तनानि,
तन्वन्ति लोके सुविशुद्धकर्म ।
कीर्तिः परा निर्मम ! देहिनाम-
र्ति ध्वान्तमस्यात्तव चन्द्ररुक् श्रीः ॥ १०

श्रीसुव्रतस्यार्हति यः पदानि,
सुरद्रुमास्तस्य गृहे पुपुष्युः ।
व्रते मनोवृत्तिरिहास्त्वलोला,
तत्त्वोपदेशं दिश निष्पुलाक ! ॥ ११

श्रीखण्डचर्च्यानि पदानि तानि,
अर्हाम्यहं तेऽमम ! दत्तनिष्क ! ।
ममास्त्वखण्डा त्वयि भक्तिरेषा,
महामुनीनामिन ! निष्कषाय ! ॥ १२

भाव्या जिना मेऽत्र भवन्तु तुल्य-श्रियः सुरेनव्रजसेव्यपादाः ।
दानादिधर्मान्वितधौततत्त्वो - पदेशदानस्थितये स्थिराभाः ॥१३

इत्थं नायकवज्रबन्धरुचिरा सत्कण्ठभूषाकरी,
येषां नाममयैः सुवर्णमणिभिर्हारावली निर्मिता ।
चारित्रप्रभदीक्षितस्तुतपदा देयासुरुच्चैर्जिना-
स्ते श्रीसूरिपदाज्जयादितिलकस्यास्यापि मे मङ्गलम् ॥ १४

(शा.वि.)

## श्रीविहरमाण-शाश्वतजिनचतुर्विंशतिका

**सीमन्धरः** पूर्वविदेहभू**श्री**-
**मंगल्य**चित्रोऽस्तु मुदे प्रजासु ।
**धर्मं** दिशन् सम्प्रति पक्वबिम्**बा**
**रक्ताधरोऽसौ** जयतात्सुबा**हुः** ॥ १

(इन्द्रवज्रा)

(उपजाति)

**युगन्धर** ! त्वं जय चक्रवा**यु**-
**गंधेन** सम्प्रीणितभव्यभृं**गः** ।
**धर्म**द्विषोऽर्कान् ग्रसतेऽत्र बुं**बा**-
**रवं** वितन्वन् युगबाहुरा**हुः** ॥ २

**सुजात** ! तीर्थङ्कर निर्विकार,
**जागर्षि** येषां हृदि तैरपा**वि** ।
**तनोतु** भङ्गं मम कर्मव**प्र**-
**वृक्षा**वलीनां स रविप्रभे**भः** ॥ ३

षण्णामृतूनां समकालभावि-
भावाः श्रितास्त्वां वृषभाननेशाः ।
न वर्ण्यते कैस्तव हे विशाल !,
नवाम्बुजन्यासभवा पदश्रीः ॥ ४

स्वयम्प्रभ ! त्वं जय दुष्टभाव-
यन्त्रोपमो मोहमहीध्रवज्र ।
प्रसन्नगम्भीरपदाः प्रबोध-
भव्या गिरो वज्रधरश्चकार ॥ ५

अनन्तवीर्यस्य जिनस्य वाचं,
नंदिप्रदात्रीं ब्रुवते मुनींद्राः ।
तवापि चन्द्रानन ! चिन्निधान,
बलस्य पारं न विदन्त्यमान ॥ ६

लगन्ति कौ यस्य पदा न याने,
भुजङ्गदेवं तमहं नमामि ।
जंभारिसेव्यातिशयप्रदीप्र !
गवीह नेमिप्रभ ! मेऽस्तु लाभः ॥ ७

वीरासनं क्षीरविशुद्धवाचं,
रात्रौ दिवा च स्मर भो वितन्द्रः ।
सनातनं राज्यमिहाविलंबा-
न तो ददाति प्रभुचन्द्रबाहुः ॥ ८

श्रीईश्वरं तीर्थकरं नमाम,
ईशा भवामो वयमप्यदेहाः ।

श्वसन्ति जीवा ब्रुवति त्वयीभ-
रवे महाभद्र ! जिनेन्द्रचन्द्र ! ॥ ९

श्रीपुष्करार्धे प्रणमाम्यमंदे,
अहं पदे तेऽजितवीर्यदेव ! ।
जिनो यकान् देवयशा इयाय,
त एव रम्या जगतीह देशाः ॥ १०

श्रीसिद्धचैत्येष्वृषभस्य सेवा,
ऋद्ध्या महत्या विबुधैरकारि ।
षडर्धसङ्ख्येऽत्र जगत्यशेषे,
भव्यानतो नन्दतु वारिषेणः ॥ ११

चंद्राननार्केन्दुमहांसि याव-
द्रा गोऽस्तु तावत्त्वयि मे परर्द्धे ! ।
नमोऽस्तु ते शाश्वतचैत्यभूमा-
ननाग्र्यपुण्ड्राय च वर्धमान ॥ १२

तातोपमा मानविहीनदेहा, हावादिना नाकिनराबलाभिः ।
भिन्ना न येऽये स्वबलैरमेया, याचे रमामादरभाविनीं तान् ॥१३

इत्थं बन्धुकनायकेन रुचिरा सत्कण्ठभूषाकरी,
येषां नाममयैः सुवर्णमणिभिर्हारावली निर्मिता ।
चारित्रप्रभदीक्षितस्तुतपदा देयासुरुच्चैर्जिना-
स्ते श्रीसूरिपदाज्जयादितिलकस्यास्यापि मे मङ्गलम् ॥ १४

(शार्दूलविक्रीडित)

पू.आ. श्री जयतिलकसूरिशिष्यविनिर्मितम्

# २३. ॥ पञ्चषष्टियन्त्रगर्भितम् श्रीचतुर्विंशतिजिनस्तोत्रम् ॥

(अनुष्टुप्)

आदौ नेमिजिनं नौमि, सम्भवं सुविधिं तथा ।
धर्मनाथं महादेवं, शान्तिं शान्तिकरं सदा ॥ १

अनन्तं सुव्रतं भक्त्या, नमिनाथं जिनोत्तमम् ।
अजितं जितकन्दर्पं, चन्द्रं चन्द्रसमप्रभम् ॥ २

आदिनाथं तथा देवं, सुपार्श्वं विमलं जिनम् ।
मल्लिनाथं गुणोपेतं, धनुषां पञ्चविंशतिम् ॥ ३

अरनाथं महावीरं, सुमतिं च जगद्गुरुम् ।
श्रीपद्मप्रभनामानं, वासुपूज्यं सुरैर्नतम् ॥ ४

शीतलं शीतलं लोके, श्रेयांसं श्रेयसे सदा ।
कुन्थुनाथं च वामेयं, श्रीअभिनन्दनं जिनम् ॥ ५

जिनानां नामभिर्बद्धः, पञ्चषष्टिसमुद्भवः ।
यन्त्रोऽयं राजते यत्र, तत्र सौख्यं निरन्तरम् ॥ ६

यस्मिन्गृहे महाभक्त्या, यन्त्रोऽयं पूज्यते बुधैः ।
भूतप्रेतपिशाचादि-भयं तत्र न विद्यते ॥ ७

सकलगुणनिधानं यन्त्रमेनं विशुद्धं,
हृदयकमलकोशे धीमतां ध्येयरूपम् ।
जयतिलकगुरुश्रीसूरिराजस्य शिष्यो-
वदति सुखनिदानं मोक्षलक्ष्मीनिवासम् ॥ (मालिनी) ८

पू.आ.श्री कमलप्रभसूरिविरचितम्

## २४.॥ आद्यन्ताक्षरेश्रीचतुर्विंशतिजिनस्तोत्रम् ॥

(उपजाति)

श्रीमच्चतुर्विंशति तीर्थराज-नामाक्षराद्यं भरताधिराजः ।
श्रीवीतरागस्तवनं प्रधानं, चक्रे विधायात्ममनो निधानम् ॥ १

**श्री** केवलज्ञान विभैक धा**म** !,
**ऋ**ते भवन्तं हृदयं दूरी **हा** ।
**ष**ट्शत्रुजातादति दुःख रा**वी**,
**भ**क्त्याडण्डगतोऽस्मीत्यथ रक्ष **वीर** ॥ २

**श्री** वीतरागादभुत मोह ता**पा**,
**अ**संशयं जग्मुरकर्म पा**र्श्व** ! ।
**जि**न ! त्वदास्याशु सुधाति पा**ना**-
**त्त**था तव स्नात्रजलेन ना**थ** ! ॥ ३

**श्री** मज्जिन ! त्वा हृदि दुःख दू**ने**,
**सं**स्थाप्य यद्देव ! सुखी भवा**मि** ।
**भ**क्तिर्ममेयं न तु काऽपि ना**ना**,
**व**र्णी कृपां ते जयतीह ना**थ** ! ॥ ४

**अ**रुपिणीनष्टगुणा शिव**श्री**,
**भि**न्ना कदाऽप्यस्तरसा रसे**न** ।
**न**न्दत्प्रभावा भवतोच्च का**मि**,
**द**माश्रितास्तां जिन ! केन ने**मुः** ? ॥ ५

**न**को मनोभूस्त्रि जगन्त्यमू**नि**,
**सु**खादबबन्ध त्वरितं मनस्**सु** ।

मत्वेति हत्वा मन एवं तीव्रं,
तिरोभवस्त्वं शुचिधर्म घातः ॥ ६

पश्याऽऽहिता दुर्निगडे प्रमादेऽ-
व्यको वयं दुःख कदन्न मेव ।
प्रभो ! ऽसि सौख्यामृत मात्तधाम !,
भवेत्वदन्ताकिमिदन्न भङ्गिः ॥ ७

श्री वीतरागेन्द्र ! शिवश्रिया अ-
सुखासुखाह्यल्प विकल्पभार ! ।
पार्श्वे न तस्याक्षरणोऽहिनाना,
र्श्ववृन्द मातिष्ठति नैव नाथ ! ॥ ८

चन्द्रो यथा नन्दति सर्वरौ कुं,
द्रवेत् तु चन्द्राश्म चयोऽमतं थु ।
प्रभो ! तथा शान्त रसान्विता जना,
भवन्ति ते वाग्भिरनून वित्पथ ! ॥ ९

श्री रज्जुबद्धां नृतर्ति दृढाशां,
सुमोह एष भ्रमयन्नरातिः ।
विभो ! तवाग्रे तु नयेत् कदा नाऽऽ-
धिव्याधि वह्नि प्रशमेऽसि पाथः ॥ १०

श्रीमन्नहं मोह तमो भिरन्धः
शीलाध्वहीनं कृतवान् कुकर्म ।
तस्य क्षयोऽभूत् तव दर्शनेनाऽ,
लसं मनो मेऽस्तु तवाङ्कितेऽथः ॥ ११

श्रीमन् ! यथाऽऽद्यो लघुरष्टजुः श्री,
श्रेष्ठः प्रवृद्ध्यै वचन श्रिया अ ।
यांस्त्वं नृचित्तेऽणुरपीह नूनं,
सर्वेसिरेवासि तथाऽद्यं नेतः ॥ १२

वाग्मीश ! ते सर्वसमा वचः श्री,
सुधास्त्रवा सद्भिरिति व्यभावि ।
पूर्णात्सुमात् त्वं बुधितो निकाम !,
ज्यायो रसोल्लोलततिः समूल ! ॥ १३

इत्थं श्रीजिनराजमव्ययसुखायुवीर्यतेजो युतं,
स्वस्थैः श्रीऋषभादि नाम मणिभिः श्रेणी द्वयस्थैः क्रमात् ।
नित्यं भूषितमात्म चेतसि मुदा संस्थाप्य यो ध्यायति,
सिद्धिश्री कमलप्रभः स भवति स्फूर्जद्यशः सौरभः ॥ १४
(शा.वि.)

पू.आ.श्री भुवनसुन्दरसुरिसन्दृब्धम्
विविधयमकमयम्

## २५. ॥ श्रीचतुर्विंशतिजिनस्तवनम् ॥

(द्रुतविलम्बित)

विजयते वृषभः स शमास्पदं जिनपतेरिह यस्य शुभं पदम् ।
प्रणमतां विपदोऽपि हि सम्पदन्त्यविकलं विकलङ्करमापदम्॥१

विपुलमङ्गललक्ष्मिनिकेतनं स्तुतिपरामरचारणकेतनम् ।
अजिततीर्थपते ! पदयामलं तव भजे स्थिरसौख्यमयाऽमलम्॥२

मदनमर्दन ! सम्भव ! ते श्रियेऽमदनरेन्द्रनताङ्घ्रियुगं मुदा ।
प्रमदनिर्भरदेवगणस्तुताऽप्रमदयोपशमादिगुणालय ! ॥ ३

शिववधूवरहारविनायकप्रभ ! भवन्तमघाहिविनायक ! ।
भजति तुर्यजिनं भुवि ना यकः स भवतीहितवस्तुविनायकः ॥४

विजयते सुमते ! जनताऽऽरकं तव मतं विदधद् भुवि तारकम्।
निजयशस्ततिनिर्जिततारकं महिमधाम विभो ! निहतारकम् ॥५

कमलमीप्सुरहं निहताखिलाकमल ! ते चरणं शरणं श्रितः ।
कमलया कलया कलितानिशं
कमललाञ्छन ! देव ! धरात्मज ! ॥ ६

जिन ! सुपार्श्व ! सुपर्वसभाजन ! प्रबलहर्षविकाशिसभाजन ! ।
प्रशमनाममहारसभाजन ! त्वमसि शस्यगुणो न सभाजन ! ॥७

जिनपते ! क्षणदेश्वरलाञ्छनाऽखिलविचक्षणदेशनरस्तुत ! ।
कृतशिवेक्षण ! देव ! सुखावलीः
कुरु सदा क्षणदेश ! दयानिधे ! ॥ ८

विहरति त्वयि भूमितले विभाविह रतिः समभूत् सुविधे !सताम्।
विहरति प्रथितां भवभीमतां विहर तिग्मकरादिसुरस्तुतः ॥ ९

गुरुरुचे रुरुचे तव यो मते जिन ! भवे दभवेदशिवो ह्यसौ ।
विनयिने नयिने प्रणतोऽस्मि तत्
शुभवते भवते भव शीतल ! ॥ १०

सुनयनं नयनन्दिसरोरुहोद्भवरविर्वरविष्णुसुतं जिनम् ।
सुविभवं विभवं जनता श्रिता
सुविशदेऽविशदेव पदे ध्रुवम् ॥ ११

अकमनङ्गमनन्तमितं सदाप्यनवमं नवमं रसमाश्रितम् ।
जितमदं तमदम्भगिरं जिनं सजयया जयया जनितं स्तुवे ॥१२

विमल ! ते मलतेऽमलतेजसः शिवरसं वरसंवरसङ्गतम् ।
सुचरणं चरणं च रणं च यः स्थिरतमारतमार तमाप चित् ॥१३

जिनमनन्तमनन्तचितं भजेत् सुखमपारमपारमितं च यः ।
शिवरमा वरमाश्रयमाश्रयेत् तमुदितं मुदितं स्थिरसम्पदा ॥१४

अवनतामर ! तामरसाननं प्रवरमङ्गलमङ्गलता नृणाम् ।
जनमता नमतादिह सुव्रतासुतमसौ तमसौहृदभेदिनम् ॥ १५

नमत शान्तिजिनं पदयोर्लुठत्सुरवरं रवरञ्जितसज्जनम् ।
स्फुरति यस्य सुधर्मकथावनी
सुखचिता खचिता मणिमौक्तिकः ॥ १६

सुरपतिस्तव कुन्थुविभो ! गुणान् सुरपतित्वमनारतमेव यत् ।
सवितरस्यघतामसखण्डने स वितरस्यतुलं च सुखं नृणाम् ॥१७

मदनदैत्यविनाशसुदर्शनं प्रमदनिर्भ्भरतातसुदर्शनम् ।
अरजिनं सुखकारणदर्शनं सुजन ! हे भज पङ्कजदर्शनम् ॥१८

जिनपतिं बहुलक्षमया चितं प्रददतं वसुलक्षमयाचितम् ।
नृपतिकुम्भभवं तिमिराजितं प्रणमताङ्घ्रिलुठत्सुरराजितम् ॥१९

भुवनतारक ! तारकलाः श्रयन् वरसभासित ! भासितभूतल ! ।
प्रशमनाशय ! नाशय दुष्कृतं
जिन ! सुमित्रज ! मित्रजनावलेः ॥ २०

अघनि (वि)शासनशासन ! हर्षदः प्रबलदर्पकंदर्पकलाजितः ।
त्वमसमानसमानसतोषकृद्विजयनन्दन ! नन्द नयाश्रित ! ॥२१

घृतरसास्तरसा दधतो मुदां वरचयं रचयन्ति जनेर्महम् ।
सुरजना रजनावपि यस्य तं स्तुत तमांततमाञ्चितनेमिनम् ॥२२

स्मरहृतौ प्रभवन्तमनारतं जिनपपार्श्वभवन्तमनारतम् ।
गुणजितेन्दुभवं तप आश्रयं गतभवं तमहं विभुमाश्रयम् ॥ २३

निजगिराऽमृतयूषमुधाकरं गुणविनिर्जितपूर्णसुधाकरम् ।
जिनमजातरसं महिलासु तं प्रणिदधे प्रयतस्त्रिशलासुतम् ॥२४

भुवनसुन्दरसूरिवरस्तुताः सकलकेवलिनो बलिनो गुणैः ।
भुवि भवन्तु विभास्वरसम्पदे स्फुटमहोदयिनो दयिनो मुदे ॥२५

पू. भुवनहिताचार्यकृतम्

## २६. ॥ श्रीचतुर्विंशतिजिनस्तवनम् ॥

प्रवर्द्धमानाक्षरविभिन्नजातिव्यक्तिछन्दोविशेषयुक्तम्

युगादौ जगदुद्धर्तुं, यो **युग्मविपुलावनौ** ।
दिदेश धर्म्ममोक्षौ तं, स्तौमि श्रीनाभिनन्दनम् ॥ १
(युग्मविपुला)

इन्द्रियगणैरविजितं, योऽर्हति जिनेन्द्रमजितम् ।
सङ्गतनितान्तमुदयं, सोवन्ति महान्त**मुदयम्** ॥ (उदयम्) २

चन्दनकर्पूरागुरुशाला, केतकजाती **चम्पकमाला** ।
नन्दतिवर्या तेऽङ्गसपर्या, सम्भवनेतः कस्य न चेतः ॥ ३
(चम्पकमाला)

**उपेन्द्रवज्रा**युधवामदेवादयोजिता येन नृदेवदेवाः ।
स्मृतेऽपि यन्नामनि सोपि कामो,
म्रियेत नन्द्यादभिनन्दनोऽयम् ॥ (उपेन्द्रवज्रा) ४

**द्रुतविलम्बित**गीतिरसो लसच्चरणसञ्चरणातिमनोहरम् ।
सुरगिरौ सुमतेर्ज्जिनमज्जने
विदधिरे विबुधा नवनर्त्तनम् ॥ (द्रुतविलम्बित) ५

जगतीहितार्थरचनाभिनन्दितः, ससुरासुरेन्द्रमनुजेन्द्रवन्दितः ।
नमतां मतां जनमनोभि**नन्दिनीं**
वितनोतु ऋद्धिमरुणप्रभुप्रभुः ॥ (नन्दिनी) ६

**सिंहोद्धता** अपि जगज्जनताजयेन,
मोहक्रुधा मदनलोभमदादयोऽमी ।
गर्जन्ति तावदतिरङ्गभरेण याव
दन्तः सुपार्श्वसरभस्य न ते स्मरन्ति ॥ (सिंहोद्धता) ७

हिमकरहिमनीरक्षीरडिण्डीरपिण्ड-
प्रवरकिरणमाला**मालिनी** यस्य मूर्तिः ।
सुकृतदलकसारैर्निर्मितेवा च भाति,
प्रथयतु स सुखानि स्वामिचन्द्रप्रभो ! मे ॥ (मालिनी) ८

सुविधिजिनस्तनोतु मम मङ्गलानि नित्यं,
मदनकरीन्द्रकुम्भतटणटनो ससिंहः ।
तरलन्तैरपीक्षणसरैर्यदीयचेतः,
सरसिरुहमनागृन बिभिदे द्यु**वाणिनी**भिः ॥ (वाणिनी) ९

श्रेयोलक्ष्मीं वितरतु स वः शीतलस्तीर्थनाथो,
यस्मिन्गर्भे स्थितवति करस्पर्शमात्रेण मातुः ।
दाहोत्साहा जनकवपुषोऽगुः क्रियं(कियद् ?) वा मृगेन्द्रै-
**र्मन्दाक्रान्ता** अपि किमु मृगा न म्रियन्ते क्षणेन ॥ १०
(मन्दाक्रान्ता)

श्रीश्रेयांसो दिशतु मम महानन्दमन्दोदयर्द्धिं,
वाणीं यस्यानुपममधुरिमोद्गारशृङ्गारसाराम् ।
पायं पायं मदनदहनसंहारिणः सच्चकोराः,
सञ्जायन्तेऽमृतरसभरितां तां यथा **चन्द्रलेखाम्** ॥
(चन्द्रलेखा)११

आस्थानं फणिनां फणेषु ललितं बभ्रोरुरभ्रस्य च,
घ्राणं व्याघ्रविशालवस्त्रविवरे जृम्भासरं बिभ्रति ।
यत्रानन्दकरं करेणुकरिणां **शार्दूलविक्रीडितं**
तां श्रीधर्म्मसभां श्रयामि सततं श्रीवासुपूज्यप्रभुः(भोः) ॥१२
(शार्दूलविक्रीडितम्)

विमलाधीश्वरनन्दनन्दजगदानन्देन्दिरासुन्दरं,
त्वयि भूमीवलयं विहारविधिभिः पूतान्तरं कुर्व्वति ।
सकलोपद्रवडम्बरा अपि खराः प्रापुः प्रणाशं क्षणा-
दथवा स्वैरविहारिणी क्व नु हरौ **मत्तेभविक्रीडितम्** ॥ १३

(मत्तेभविक्रीडितम्)

जन्मस्नात्रं पवित्रं सुरगिरिशिखरे यस्य कर्तुं महद्ध्यां,
त्रैलोक्याधीशलोके कृतमहसि परालङ्कृतीः सर्वनारीः ।
दृष्ट्वा नक्षत्रदम्भादपि गगनरमामौक्तिक**स्रग्धरा**भृ
त्तं पञ्चानन्तकेन्द्रं भजत भवभृतो भावतोऽनन्तदेवम् ॥ १४

(स्रग्धरा)

जनको जज्ञेऽवनीशस्तिमिरतजगती पावना लोकभानुः,
समधर्म्माचारचञ्चुर्गुणसुमणि**महास्रग्धरा**सुव्रताम्बा ।
उपदेशो यस्य पापोपशमशमचणो जन्तुरक्षादिरूपै,
रमणीयस्तं नमामि प्रमुदितमनसा सान्वयं धर्म्मनाथम् ॥ १५

(महास्रग्धरा)

क्षमाधरशिरः स्फुरन्महमविश्वसेनाङ्गभूर्धर्म्मचक्रोत्तरः,
पदाब्जतलसंवरन्नवसुवर्णपद्मागुरुकसन्निभश्रीभरः ।
प्रभासवरदामयुग् रुचिररत्न**वृन्दारकः** श्रेणिसेव्यक्रमः,
सुखानि मम षोडशो दिशतु शान्तिरर्हन्सदा पञ्चमश्चक्रभृत् ॥१६

(वृन्दारकः)

यदपि भवति चक्रिपद्मापि पादाब्जलग्नाचिरं सादरं देहिनां,
तदपि चरणमोचनं नैव कुर्वन्ति सन्तो जनास्तेन मन्ये ध्रुवम् ।

शरदिजन च **मेघमाला** बलां तां पराकृत्य यः स्वीचकार प्रभु-
श्चरणमचलकेवलानन्दमन्दायतं कुन्थुनाथं स्तुवे भावतः ॥ १७
(मेघमाला)

मदपदसम्पदमन्दसुनन्दज्जनपदकुरुगजपुरनगरं,
नवनिधिरत्नचतुर्दशलक्ष्मीहरिकरिरथनरबलकलितम् ।
पदलुलिताखिलभूपतिराज्यं करतलगतमपि **चपलमिदं**,
सपदि विहाय ललौ व्रतमुग्रं य इह तमरमभिसर शरणम् ॥१८
(चपलम्)

मनसिजहव्यवाहमुरुदाहकरं जगदङ्गिनां समवलोक्य विभु-
र्दधदुपकारसारमवतारविधिकृपयाञ्चितोकमिषतः प्रदधौ ।
पदपुरतोयकस्तदुपशान्तिकृते घनसम्भृतं शम**सुधाकलशं**,
प्रदिशतु मोक्षसौख्यकमलाम-
मलामिह मल्लितीर्थपतिरेष मम ॥ (सुधाकलश) १९

स्वःसन्**मालाचित्र**मासूत्रयती जनमनसि निरुपमं
केवलोत्पत्तिकाले, त्रिप्राकारीं यस्य चक्रेऽतिभक्त्या
रजतकनकसुमणिश्रेणिभिः सुप्रभाभिः ।
देवी पद्माश्रीसुमित्राङ्गजन्मा यदुकुलकमलरविर्ध्वस्त-
मोहान्धकारः,पुण्याङ्कुराम्भोधरासारसारः
स दिशतु शिवकमलां सुव्रताधीश्वरो मे ॥ (मालाचित्र) २०

तनोतु मे मनोमतं ततं युतं सुमङ्गलैः कलैर्जिनाधिनायको
नमिः सदा, यदीयधर्म्मदेशना सभासु
भान्तिसौरभातिलोभलीनलोलषट्पदाङ्गनाः ।
सुरावली विकीर्णपञ्चवर्णजानुदघ्नपुष्पसञ्चयाः

स्वनाशशङ्कया रयात्, पलाद्यन**ङ्गशेखरान्** महीतलं
विसंस्थलं गताश्च्युता इव ध्रुवं पुरः प्रभो ! ॥ (अनङ्गशेखर)२१

श्रीनेमिनाथ नमन्नाकिनाथं स्तुवे तं
सनाथं सदा केवलक्षीमहानन्दमन्दैः,
सौभाग्यभाग्याधिके यत्र सम्मोहनै राज-
राजीमतीवाक्यनेत्रभ्रमैस्तीक्ष्णतीक्ष्णैः ।
सार्द्धं जगज्जन्तुजीवातुमर्माविधा विद्धविश्वं-
भरेशानेवेद्योमुखानेकवेधो,
विधं विधातुं न शक्ता विमुक्ता अपि स्वेच्छया
**कामबाणा** यथा पद्मपत्राणिवज्रे ॥ (कामबाणा) २२

श्री**अशोकपुष्पमञ्जरी** मरन्दबिन्दशान्त-
सर्वतो रजोरये सुरप्रमुक्तचङ्ग-
गन्धबन्धस्तनरङ्गणे सभाङ्गणे वरात-
पत्रसत्पवित्रचामरेन्दिरातिरङ्ग ।
श्रीमृगाधिनायका स नोपविष्टपुष्टवाणि-
धर्म्ममर्मदेशनेन बोधिताङ्गशिष्ट-
पृष्टदेशभासमानभावितानदेवदुन्दुभी-
द्धनादपूज्यपादपार्श्वदेवनन्द ॥ (अशोकपुष्पमञ्जरी) २३

नरपतिततिनिषेवितपादपीठाग्रसि-
द्धार्थभूपालवंशाब्दिराकानिशानायकः,
प्रणितभविकमहोदयमेदुरानन्दसं-
भोगभङ्गीभुजङ्गीभवद्भाविभूनायकः ।
मदनदहनघ**नोत्कलिका**कुलं मामकी-

नं मनः शुद्धसंवेगरङ्गामृतासारतो,
रचयतु शमरमारससुन्दरं वर्द्धमानो
जिनो जायमानासमानोल्लसन्मङ्गलः ॥ (उत्कलिका) २४

कर्तुः प्रशस्तिः ।

इत्येवं सर्वदेवा सुरनरबलिराजाधिराजैः सुजाति-
व्यक्तिच्छन्दोविशेषैरहमहमिकया नव्यनव्यैः सुकाव्यैः ।
नित्यं संस्तूयमाना दलितकलिमला नाभिराजाङ्गजाद्याः,
श्रीवीरान्ता जिनेन्द्रा भुवनहितकृते माङ्गलिक्याय सन्तु ॥ २५
(स्रग्धरा)

पू.उपा.श्री क्षमाकल्याणगणिविरचिता

## २७. ॥ श्रीजिन-स्तुतिचतुर्विंशतिका ॥

(अनुष्टुप्)

१. श्रीऋषभजिन-स्तुतिः ।

श्रीमद्वृषभ ! सर्वज्ञ ! वृषभाङ्क ! सुवर्णरुक् ! ।
जय देवाधिदेवार्हन् ! नाभिराजेन्द्रनन्दन ! ॥ १

युगस्यादौ त्वया येन, ज्ञानत्रय-युतेन यत् ।
जनन्या मरुदेवायाः पावनं जठरं कृतम् ॥ २

२. श्रीअजितजिन-स्तुतिः ।

अर्हताऽजितनाथेन, गज-लाञ्छन-शालिना ।
जितशत्रु-महीपाल-पुत्रेण कनकत्विषा ॥ १

विजया-कुक्षि-रत्नेन, भगवँस्त्वयका जिन ! ।
जिता रागादयो येन, वन्दे त्वां सर्वदा मुदा ॥ २

३. श्रीसंभवनाथ-स्तुतिः ।

जितारिनृपतेर्वर्य्यात्, संभवः संभवाभिधः ।
सेनाया नन्दनो हेम-वर्णो गन्धर्वलाञ्छनः ॥ १

सर्व-सौख्य-प्रदो मुख्यः, ज्ञान-दर्शन-संयुतः ।
मुनीनां पुङ्गवो देवो, नित्यं दिशतु मां जिनः ॥ २

४. श्रीअभिनन्दन-स्तुतिः

सिद्धार्थानन्दनं सार्व्वं, वीतरागं जिनपतिम् ।
श्रीसंवर-समुत्पन्नं, प्लवगाङ्कं हिरण्यभम् ॥ १

अभिनन्दन-नामानं, विशुद्ध-हृदयः सदा ।
यस्स्तौति परया भक्त्या, सदा लोकेऽभिनन्द्यते ॥ २

५. श्रीसुमतिनाथ स्तुतिः

मेघाभिध-धरित्रीश-तनयो मङ्गलप्रदः ।
कौञ्चलक्षण-भृद्धेम, - मरीचिर्मङ्गलाङ्गजः ॥ १

सत्यं सुमति-नाथेशः, सुमतिं तनुतात्तमां ।
भविनां पुण्य-कर्तृणां, स्वर्ग-सौख्यावलिप्रदाम् ॥ २

६. श्रीपद्मप्रभ-स्तुतिः

सुसीमापुत्र ! सत्कोक - नदद्युतिधराधर ! ।
धराभिधनृपोद्भूत ! पद्मलक्ष्मणधारक ! ॥ १

भवाब्धौ भवसंकीर्णे, दुस्तरे पततां नृणां ।
त्राणाय सततं देव !, पद्मप्रभ ! जिनेश्वर ! ॥ २

७. श्रीसुपार्श्वनाथ-स्तुतिः

श्रीसुपार्श्वाभिधो देवः, पृथ्वीजः स्वस्तिकाङ्कभृत् ।
प्रतिष्ठ-नृप-संजात-श्चामीकरकरो जिनः ॥ १

समुद्र इव गम्भीरः, कर्मणां छेदने परः ।
यः सार्व्वः परमब्रह्मा, रतं नौमि सदा विभुम् ॥ २

८. श्रीचन्द्रप्रभ - स्तुतिः

चन्द्रप्रभप्रभो ! कान्त - चन्द्रलक्षण-संयुत ! ।
तमापति-च्छविज्ञान,-तमोव्यूह-विनाशन ! ॥ १

संसार-जलधेर्नाथ ! महसेन-नृपोद्भव ! ।
लक्ष्मणापुत्र ! मां स्वामि-न्नव केवल-बोधभृत् ! ॥ २

९. श्रीसुविधिनाथ-स्तुतिः

संस्तुतो वो ददात्वाशु, सुरासुर-नरेश्वरैः ।
सुविधिर्वाञ्छितं शर्म्म, सुग्रीव-नृप-नन्दनः ॥ १

यस्यासीज्जननी रामा माननीया दिवौकसाम् ।
मान-मुक्तोऽवदातो यो-ऽमायो मकर-लाञ्छितः ॥ २

१०. श्रीशीतलनाथ-स्तुतिः

श्रीमच्छीतलनाथेश ! नन्दादृढरथात्मज ! ।
भास्वत्सुवर्णवद्देह ! श्रीवत्साह्वाङ्क-धारक ! ॥ १

त्वदीय-चरणाम्भोज-सेवकानां वपुर्भृताम् ।
प्राक्कृतं वृजिन-व्यूहं, दुष्टं संभिन्द्धि हे विभो ! ॥ २

११. श्रीश्रेयांसनाथ-स्तुतिः ।

विष्णुवंशेऽर्कवद्देवो, विष्णु-पुत्रो हिरण्यभः ।
श्रेयोवृद्धिकरोऽजस्त्रं, खड्गिलञ्छनभृज्जिनः ॥ १

हत्वा कर्मरिपून् सार्व्वः, श्रेयांसः श्रेयसैः सह ।
परज्ञानमयेन त्वं, महानन्द - पदं परम् ॥ २

१२. श्रीवासुपूज्य-स्तुतिः

वरीवर्त्तितरामीहा, भवतां भवतां यदि ।
झटिति च्छेदितुं चित्ते, भो भव्याः प्रासुमक्षरम् ॥ १

तदा भजध्व-मेनं हि, वासुपूज्यं जयासुतम् ।
वसुपूज्य-कुलोत्तंसं, -महिषाङ्कं च रक्तभम् ॥ २

१३. श्रीविमलनाथ-स्तुतिः ।

श्रीमद्विमलनाथेन्द्र ! कृतवर्म-समुद्भव ! ।
शूकराङ्कधर ! श्यामा-पुत्र ! कल्याण-दीधिते ! ॥ १

चन्द्रवद्विमल-ज्ञान ! त्वदीयस्मरणं विना ।
कुर्वन्नप्येति नो ब्रह्म-प्रक्रियां नातिविस्तराम् ॥ २

१४. श्रीअनन्तनाथ-स्तुतिः

हेम-वर्णस्य पुत्रस्य, सुयशः- सिंहसेनयोः ।
देवस्य श्येन-चिह्नस्य, वर्य्यानन्त-गुणोदधेः ॥ १

इन्द्रादयोऽपि यस्यान्तं, गुणानां लेभिरे नहि ।
अनन्तस्य गुणाँस्तस्य, क्षमो वक्तुं नरः कथम् ॥ २

१५. श्रीधर्मनाथ-स्तुतिः

सुव्रता-पुत्र ! वज्राङ्क ! भानुवंशार्क्क-सन्निभ ! ।
कनक-प्रभ-सर्वज्ञ ! धर्मनाथाभिधेश्वर ! ॥ १

तवागोऽपि पुरश्चारी, भूतले यात्यशोकतां ।
अनुत्तरफलाः सन्ति, सतां संगतयोऽपि हि ॥ २

१६. श्रीशान्तिनाथ-स्तुतिः

विश्वसेनधराधीश-नन्दनं मृगलक्ष्मणम् ।
आचिरेयं सुवर्णाङ्गं, कलयामि जिनेश्वरम् ॥ १

तं श्रीमच्छान्ति-नामानं, यस्याग्रे कुर्वते मुदा ।
प्राज्यां सुमनसां वृष्टिं, विबुधा विबुधप्रियाम् ॥ २

१७. श्रीकुन्थुनाथ-स्तुतिः

श्रीयुतायाः श्रियः पुत्र ! श्रेयस्कर ! हिरण्यभ ! ।
सूर-भूपति-सञ्जात ! च्छाग-लक्षण-धारक ! ॥ १

कुन्थुनाथ-जिनेश ! स्य, तीर्थङ्कर ! जगत्पते ! ।
मदीयं पापसन्दोहं, भवान्तर-कृतं घनम् ॥ २

१८. श्रीअरनाथ-स्तुतिः ।

सुदर्शन-नृपोऽद्भूतं, नन्द्यावर्ताङ्क - संयुतम् ।
अम्भोजवन्निरालेपं, देवी-पुत्रं सुवर्णभम् ॥ १

जगन्मुख्या गुणाः सर्वे, धुर्य्यं प्रभुतया जिनं ।
चरीकर्मि नमस्तस्मा-अराय परमात्मने ॥ २

१९. श्रीमल्लिनाथ-स्तुतिः ।

कुम्भ-प्रभावतीपुत्रो, नील-वर्णो घटाङ्कभृत् ।
जगन्मित्र इव ध्वान्त-नाशनाद्विदितः सदा ॥ १

छत्रत्रययुतो भाति, देवो यो विष्टपत्रये ।
तस्य श्रीमल्लिनाथस्य, स्मरणेन मुदा सखे ॥ २

२०. श्रीमुनिसुव्रतनाथ-स्तुतिः ।

सुमित्रनृपतेः सूनो ! पद्माकुक्षि-पवित्रकृत् ।
कूर्म्मलक्षणभृद्धर्म-दायक ! श्यामलच्छवे ! ॥ १

मुनिसुव्रतदेवेन ! क्षीणकर्मारि-मण्डल ! ।
देहि त्वं मेऽव्ययीभावं, पदं तत्पुरुषोत्तम ! ॥ २

२१. श्रीनमिनाथस्तुतिः ।

श्रीमद्विजय-भूपाल-कुलोत्तंस ! हिरण्यरुक् ! ।
वप्रासुत नमिनाथ ! नीलोत्पल-सदङ्कभृत् ! ॥ १

यस्ते पञ्चजनो देव, निन्दां च कुरुते स्वयम् ।
स एति परमज्ञानं, कोऽपि न ह्यत्र संशयः ॥ २

२२. श्रीनेमिनाथ-स्तुतिः ।

शिवायास्तनये वर्य्ये, समुद्र-विजयोद्भवे ।
हरिवंश-हरौ शंभौ शङ्खाङ्के कमलप्रभे ॥ १

त्यक्त-राजीमती-स्नेहे, नेमिनाथे जितस्मरे ।
सिद्धि-प्रमदया माला, प्रत्यक्षेपि जिनेश्वरे ॥ २

२३. श्रीपार्श्वनाथ-स्तुतिः ।

अश्वसेनाख्य-भूपाल-सुतेन परमेष्ठिना ।
वामेयेन दिता येन, कमठस्याभिमानता ॥ १

तस्मै श्रीपार्श्वनाथाय, नमोऽस्तु मामकं सदा ।
पवनाशन-चिह्नाय, नील-वर्णाय शंभवे ॥ २

२४. श्रीमहावीरस्वामि-स्तुतिः।

श्रीमत् सिद्धार्थ-वंशार्क्क ! त्रैशलेय ! जगन्मणे ! ।
महानाद-ध्वजार्हन् ! मे कल्याणं कुरु सर्वदा ॥ १

चरम-तीर्थ-कृद्वीर ! मोहेभ-हनने मृगात् ! ।
त्वद्भक्ति-दत्त-चित्ताय, कमलां देहि मे जिन ! ॥ २

पू.उपा.श्री क्षमाकल्याणगणिविरचिता

# २८. ॥ श्रीजिन-स्तुतिचतुर्विंशतिका॥

(अनुष्टुप्)

१. श्रीऋषभदेव-स्तुतिः

श्रीमन्तं परमानन्द-स्वरूपं परमेश्वरं ।
परमज्ञानिनं पुण्यं, महानन्दनिकेतनम् ॥ १

ऋषभं नाभि-सम्भूतं, मारुदेवं जिनोत्तमम् ।
स्वर्णवर्णं सदा वन्दे, वृषलाञ्छन-शोभितम् ॥ २

२. श्रीअजितनाथ-स्तुतिः ।

अजितं निर्जितोद्दाम-कामचारभटं लघु ।
प्राप्तनिःश्रेयसं प्राज्य-निजसद्गुणराजितम् ॥ १

सुजात-जातरूपाङ्गं, जितशत्रु-कुलोद्भवम् ।
महामृगाङ्कितं भक्त्या, भजामि विजयाङ्गजम् ॥ २

३. श्रीसम्भवनाथ-स्तुतिः

सर्वज्ञं सर्वलोकेशं, निदानं सर्व-सम्पदाम् ।
सर्व-दोषापहं देवं, विश्व-लोके हितावहम् ॥ १

जितारि-तनुजन्मानं, सेना-कुक्षि-समुद्भवम् ।
निजान्तःकरणे नीत्वा, सदा ध्यायामि सम्भवम् ॥ २

४. श्रीअभिनन्दन-स्तुतिः

निर्मलं कमलावासं, सेवितं सुरमण्डलैः ।
पाप-संताप-जाड्यघ्न-मतिगम्भीरतास्पदम् ॥ १

जिनाभिनन्दनं रम्यं, यथा हंसाः सुमानसम् ।
अभिनन्दनमानन्दं, सानन्दं समुपास्महे ॥ २

५. श्रीसुमतिनाथ-स्तुतिः

पूर्ण-ज्ञानगुणाधारं, निर्विकारं निरञ्जनम् ।
अतीत-लौकिकाचारं, निराकारमनश्वरम् ॥ १

सर्वदा निरहंकारं निराधारं निरामयम् ।
निराश्रवं नमस्कुर्यां सन्मतं सुमतीश्वरम् ॥ २

६. श्रीपद्मप्रभ-स्तुतिः

नमोऽस्तु देवदेवाय, विश्वनाथाय नित्यशः ।
निरस्तमोह-भूपाय, सत्यरूपाय सर्वदा ॥ १

रागद्वेष-विमुक्तानां, योगिनां मानसे ध्रुवम् ।
पद्मप्रभाभिधानेन, स्मार्यभावं गताय च ॥ २

७. श्रीसुपार्श्वनाथ-स्तुतिः

महामङ्गलरूपोऽय-, मिति बुद्ध्यैव निश्चितम् ।
स्वयं मङ्गलभूतोऽपि, स्वस्तिको यं समाश्रितः ॥ १

सुरासुरनराधीश-वन्द्यपादाम्बुजन्मने ।
तस्मै देवाधिदेवाय, सुपार्श्वाय नमो नमः ॥ २

८. श्रीचन्द्रप्रभ-स्तुतिः

यदीय-चरणाम्भोज-सेवाहेवाकिभिर्जनैः ।
कथञ्चिदपि दुष्प्राप्या, प्राप्यते पञ्चमी गतिः ॥ १

सोऽयं सर्व-जगन्नाथः, पूर्णचन्द्र-निषेवितः ।
देयाच्च शाश्वतं श्रेयो, मह्यं चन्द्रप्रभो ! जिनः ! ॥ २

९. श्रीसुविधिनाथ-स्तुतिः

(आर्याः)

मोहान्धकार-गहनं, लोकं संवीक्ष्य तत्प्रबोधकृते ।
उदगाद्भानुरिवोच्चै-र्यः श्रीसुग्रीव-सदनाभ्रे ॥ १

मम सद्बुद्ध्या सार्द्धं, वियोगमपनेतुमुद्यतो भवतात् ।
लब्धमहोदय-राज्यः, सोऽयं श्रीपुष्पदन्तेशः ॥ २

१०श्रीशीतलनाथ-स्तुतिः

(द्रुतविलम्बित)

सकल-मङ्गल-केलिनिवेशनं, सहृदयं हृदयङ्गम-देशनम् ।
अभिनतोत्तम-भक्त-सुरेश्वर-मति सुरा-भसुवर्ण-समद्युतिम् ॥१

प्रवर-बन्धुर-लक्षण-संयुतं, मुनिमतं सुनतं जननायकैः ।
नमत शीतलनाथमिमं जना, जगति जीवनदानपरायणम् ॥ २

११. श्रीश्रेयांसनाथ-स्तुतिः

नमोऽस्तु ब्रह्मरूपाय, सर्वदा सर्व-दर्शिने ।
वीतराग-स्वरूपेण, सिद्धावस्थामुपेयुषे ॥ १

श्रीमते विष्णु-पुत्राय, विश्वमित्राय शंभवे ।
श्रेयसे तीर्थनाथाय, परमानन्द-दायिने ॥ २

१२. श्रीवासुपूज्य-स्तुतिः

पूर्णेन्दु-सन्निभं सम्यग्, वीक्ष्य ते मुखमीश्वर ! ।
भजन्ति जन्तुपद्मानि, विकाशमिदमद्भुतम् ॥ १

संसाराम्बुनिधेर्नाथ ! दुस्तरान्मां समुद्धर ।
वसुपूज्यात्मज श्रीमन् ! वासुपूज्य-जिनेश्वर ! ॥ २

१३. श्रीविमलनाथ-स्तुतिः
विशोध्य शुद्धबोधेन, कर्म-जाल-मलीमसम् ।
चेतनं पुण्यरूपः सन्, प्राप्तवान् विमलाभिधाम् ॥ १

कृतवर्म-कुलोत्तंसः, सर्व-कल्याण-जन्मभूः ।
भूयात्कल्याणधामात्मा, स श्यामेयो गतिर्मम ॥ २

१४. श्रीअनन्तनाथ-स्तुतिः ।
अनन्तवीर्य - संपन्न-मनन्त-ज्ञान-दर्शनम् ।
अनन्त-चारु-चारित्र-मनन्त कमलावृतम् ॥ १

अनन्त-भव्य-संसेव्य-मनन्तं परमेश्वरम् ।
नमामि सर्वदानन्तं, निजानन्तर्द्धि-सिद्धये ॥ २

१५. श्रीधर्मनाथ-स्तुतिः
यमीशं वीक्ष्य दम्भोलि-र्मोह-भूप-जयोद्यतम् ।
साहाय्यं कर्तुकामो वा, शीश्रिये लाञ्छनच्छलात् ॥ १

सोऽयं धर्मपतिर्धर्म्मः, सुव्रतः सुव्रताङ्गजः ।
मां पुनातु पवित्रात्मा, चारुचामीकरद्युतिः ॥ २

१६. श्रीशान्तिनाथ-स्तुतिः
अद्भुतं चरितं नाथ ! भवतो भव-भेद-कृत् ।
मृगाङ्केनापि निर्दग्धे, यत्त्वया कुसुमायुधः ॥ १

निर्मिताशान्ति-निर्णाशं, शान्ते ! शान्ति निकेतनम् ।
देहि मे दर्शनं दिव्यं, भव्य-संपद्विधायकम् ॥ २

१७. श्रीकुन्थुनाथ-स्तुतिः ।
अवाप्य सार्वभौमत्वं, सर्वज्ञत्वं च यः प्रभुः ।
बाह्यान्तर-प्रभेदेना-जैषीद् विविधविद्विषः ॥ १

सोऽयं शूरवरः शूरः, प्रभवः प्रभुतास्पदम् ।
महानन्दप्रदो भूयात्, कुन्थुनाथो जिनाधिपः ॥ २

१८. श्रीअरनाथ-स्तुतिः

हित्वा सावद्य-कर्माणि, जित्वा सर्वेन्द्रियाणि च ।
कृत्वा चित्तं निजायत्तं, भूत्वा सदभक्ति-भाजनम् ॥ १

अरनाथ-जगन्नाथं, ये भजन्ति शुभार्थिनः ।
प्राप्नुवन्ति सुमुख्यानि, सर्व-सौख्यानि ते जनाः ॥ २

१९. श्रीमल्लिनाथ-स्तुतिः

लाञ्छन-व्यपदेशेन, यं सिषेवे जगत्प्रियम् ।
कामदः काम-कुम्भोऽपि, मत्वा सर्वार्थ-दायकम् ॥ १

स श्रीमल्लिजिनाधीशः, सुराधीशैः समर्चितः ।
कृपापरायणः कामं, पायान्मां भववारिधेः ॥ २

२०. श्रीमुनिसुव्रतनाथ-स्तुतिः

करुणारसमग्नेन, संविग्नेन त्वया विना ।
देवाज्ञानं निराकर्तुं, समर्थः कोऽपि नापरः ॥ १

तदिममसृणीभूतं, चित्तमुत्तुङ्ग-भावनम् ।
मां विधेहि गुणाधानं, मुनिसुव्रत ! सुव्रतम् ॥ २

२१. श्रीनमिनाथ-स्तुतिः

विजयेश्वर-भूमीश, वंशवार्द्धि विवर्द्धनम् ।
शीतच्छायमिवातुच्छ-पङ्क-भूच्छाय-मर्दनम् ॥ १

जित्वरं घोरकर्माणि, वरेण्यं पुण्य-दर्शनम् ।
नमीशं जगतामिष्टं, द्रष्टुमिच्छामि सत्वरम् ॥ २

२२. श्रीनेमिनाथ - स्तुतिः

अपार-महिमाम्भोधि-ब्रह्मचर्यैक-चेतसा ।
मन्मथो मथितो येन, शिशुत्वेऽपि सुखोचिते ॥ १

सोऽयं श्रीनेमि-सर्वज्ञो, हरिवंश-विभूषणः ।
सेव्यतां शिव-संपत्त्यै, सर्वदा गतदूषणः ॥ २

२३. श्रीपार्श्वनाथ - स्तुतिः

यस्य पादाम्बुज-स्पर्शाद्-गङ्गाभूत्तीर्थमुत्तमम् ।
नागोऽभून्नाग-देवेन्द्रो, यदीय-वचन-श्रुतेः ॥ १

तस्य देवाधिदेवस्य, पार्श्वनाथजिनेशितुः ।
कारणं सर्वसौख्यानां, चरणं शरणं मम ॥ २

२४. श्रीवीरजिन-स्तुतिः

विश्वलोक-मनोहारि-प्रातिहार्य-विराजितः ।
प्रतीक्ष्य परमैश्वर्य-भृतां भूरिकदम्बकैः ॥ १

वर्द्धमानो विशुद्धश्रीः, समासन्नोपकारकः ।
विवेक-भाजनं सन्मां, करोतु ज्ञातनन्दनः ॥ २

इत्थं चतुर्विंशति-तीर्थपानां, सुबोधपद्यैर्विहितः स्तवोऽयं ।
जिन-प्रणीतामृतधर्मसेवि-क्षमादि-कल्याणविशारदेन ॥ ३

(उपजाति)

महोपाध्यायश्री रत्नशेखरगणिविरचितम्
संस्कृत-प्राकृत-शौरसेनी-भाषात्रयसमम्

## २९. ॥ श्रीचतुर्विंशतिजिनस्तवनम् ॥

(मालिनी)

अमरगिरिगरीयो मारुदेवीयदेहे
कुवलयदलमालाकोमला कुन्तलाली ।
सजलजलदपाली किं नु सन्नीलकण्ठी
धवनिवहममन्दं नन्दयन्ती जयाय ॥ १

असमसमरलीलालालसाभावभाव-
च्छलपरबलहेलाभङ्गरङ्गङ्गमीव ।
करिवरपरिधारी वो विमोहावहारी
भवजयिविजयाभू रङ्गभूमी रमासु ॥ २

भविविभुमभिवन्दे सम्भवं सम्भवन्तं
निबिडजडिमभङ्गेऽभङ्गरङ्गेण गेयम् ।
तरणिहयवरेणाबद्धसेवं विबोधो-
दयरयविरलाहङ्कारभारेण किं तु ॥ ३

समसमयमिवाऽलं चञ्चलं चित्तमङ्का-
हरणहरिवरं वाऽचञ्चलीभावयन्तम् ।
उरसि विरसभावं हन्त ! हन्तुं तुरीयं
तमरिहरमणीयं धारणीयं धरेऽहम् ॥ ४

असमसमयपारावारपारीणरीण-
च्छलचरणधुरीणच्छन्नमच्छिन्नमीडे ।
महिमभरनिरुद्धामङ्गलं मङ्गलाभू-
विभुमिदमसुबद्धं मङ्गलाकारणं तु ॥ ५

तमुदयगिरिचूलाचुम्बि भूच्छायभूरि-
च्छिदुरतरणि बिम्बाभङ्गधामाभिरामम् ।
सहभवमिव रागं कुङ्कुमाभं वहन्तं
वहविदुरसुसीमासम्भवं देवदेवम् ॥ ६

अवममवहरन्तु च्छन्दसञ्चारिपञ्चाऽ
नणुसमणिफणा मे देवदेवोरुदेहे ।
रणभुवि किल भङ्गे मारवीरेण दूरे
सममिह परिहीणा पञ्चबाणी रयेण ॥ ७

सममिव हिमभाजिद्देहदन्तोरुकूल-
न्धयधवलकरालं सारिभावारिणेदम् ।
समलममलयन्तं भूविहायोऽहिगेहं
हिमकरधरमङ्के देवदेवं नुवामि ॥ ८

नरवर ! कुरु रामानामरामालिचूडा-
मणिभुवमभवन्तं चित्तवासे वसन्तम् ।
नवममवलकराभा सङ्करेणेव विद्धम् ॥ ९

निरवमतमनन्दासुन्दरोदारतुन्दि-
स्थ(च्छ)लसलिलरुहाली केवली केवलाय ।
नवमरसनिलिम्पाहारसाराभिरामं
नवमचरमकुण्डं किन्तु भूखण्डमण्डि ? ॥ १०

भवभयजयिनन्दाभूपुरोगामिदन्त-
च्छविनिवहभवाभा भूरिभद्रङ्करा मे ।
इह किल कलयन्ती भाववन्दारुदेवा-
सुरनरवरभाले काममुत्तंसकेलिम् ॥ ११

दुरवमपरमोहं हन्तु मोहं जयाभू-
रविनववसुहासी कासरेणावभासी ।
सहजलजलवाहालिङ्गिभागाभिरामो-
दयगिरिगरिमाणं हन्त ! धत्ते किलाऽयम् ॥ १२

स गिरिधरणिभाराधारलीलाधुरीणं
किरवरममुमङ्के धारयन्तं निरन्तम् ।
परमगरिमलाभं लम्भयन्तं किमेवं
विमलममलदेहं चित्तगेहं नयेऽहम् ॥ १३

विभुविमलपुरोगाभङ्गरागावलीभि-
च्चरणकररुहालीभासमूहा जयन्ति ।
नमिपरसुरबाला भालभागे सरागं
किल परमललामाडम्बरं धारयन्ति ॥ १४

चरणसरसि सारे किन्नु निस्सीमधामाऽ-
मलसलिलसमूहे हेमपङ्केरुहाणि ।
पविधरविभुवङ्गासङ्गिभापिङ्गरङ्गा
कररुहवरमाला वो विरुद्धं रुणद्धु ॥ १५

दिवि भुवि चिरकालं चन्द्रभिद्राहुकण्ठी-
रवभवभयभूयोरीणरङ्गं कुरङ्गम् ।
तरुणकरुणमङ्के लालयन्तं किलाऽमुं
भविवर ! भगवन्तं धेहि हे धीर ! चित्ते ॥ १६

नर ! नम परपङ्कावासहिंसाधुरीणा-
खिलभविभयभीरुं दूरभीपङ्कमङ्कम् ।

छगवरमवगाढं पालयन्तं सुगूढं
सदयमनयमन्थं कुन्थुदेवं सुसेवम् ॥ १७

तमरममरदत्तामन्दमन्दारमाला-
परिमलरसबद्धालम्बिरोलम्बमालम् ।
निरवमनवहेमच्छायकायं नमामोऽ-
मरगिरिमिव कण्ठे वारिवाहावगाढम् ॥ १८

बहलमिह वहन्तं कुन्दमन्दारमल्ली-
कुसुममसमवल्लीमञ्जुलं मल्लिदेवम् ।
चिरमुरसि वहामो भूरितारावविरामा-
वलि विमलविहायोमण्डलं किंनु नीलम् ॥ १९

कुवलवलयकायं कुन्दजिद्दन्तपाली-
च्छविभरपरिभोगं देवमल्लीपुरोगम् ।
तमरिहमिह सेवे वारिवाहं सवारिं
किमसमबिसकण्ठीमण्डलीलीढकण्ठम् ॥ २०

जयभुवि विजयन्ते भासुरा भूरिभासो
दमिवरनमिदेहे केलिगेहे कलासु ।
किमहिमकिरणाभा भाववन्तं नयन्ति
सुदिवसमविरामं चण्डभावं विहाय ॥ २१

हरिमुरुधरमाणं कम्बुसम्बन्धबन्धुं
किमु इह बहुमन्ता कम्बुधारी चिरेण ।
नवनवभवकारावासवारी वरीयो-
गवलविमलधामा नेमिनामा ममायम् ॥ २२

फणिगुरुफणमालालम्बिचूडामहीयो-
मणिगणकिरणालीसङ्गरङ्गावगाढम् ।
अरिहमुरुमहेलासिद्धिसम्पन्नरागा-
रुणमिव गुणगेयं चित्तधेयं धरेयम् ॥ २३

गिरिभुवि हरिभावे बाहुलीलाविभिन्ना-
विरलनिबिडपीडासङ्गमे गाढखिन्नम् ।
परिभवपरिहारायेव वोढारमङ्के
हरिवरमरिहन्तं हे नरा ! धत्त चित्ते ॥ २४

इत्थं स्तोत्रपथं कथञ्चन जिना नीता विनीतात्मना
वृत्तैः प्राकृतसंस्कृतैः समुदितैस्तैः शौरसेन्या समैः ।
दद्युः श्रीगुरुसोमसुन्दरमुदास्वादं प्रसादं जवाद्
येनाऽसौ रसिकेव केवलकला लीलायते मय्यपि ॥(शा.वि.)२५

पू.उपा.श्री जयसागरगणिविरचितविज्ञप्तित्रिवेणि-अन्तर्गताः

## ३०. ॥ श्रीचतुर्विंशतिजिनस्तुतयः ॥

जयति लसदनन्तज्ञाननिर्भाससान्द्रो
निरुपममहिमत्वादार्हतः कोऽपि भावः ।
त्रिभुवनजनभाग्यागोचरो यत्र नित्यं
विलसति कृतवासा निर्भरं सा शिवश्रीः ॥ (मालिनी) १

जगन्नित्यं किञ्चित्तदितरदनित्यं च सदियं
यदज्ञानाद् भ्रान्तिः स्फुरति मृगतृष्णेव भुवने ।
क्षणेन क्षीयन्ते दुरितनिवहा यत्परिचया-
त्तदेवाङ्गीकुर्म्मो निरभिविधि जैनेश्वरमहः ॥ (शिखरिणी) २

दौर्गत्यदोषमुच्छेत्तुं विबुधा यामुपासते ।
कल्पवल्लीव सा जैनी चतुर्विंशतिरिष्टदा ॥ (अनुष्टुप्) ३

विश्वाशाः परिपूर्णतामुपगता वाञ्छार्थलाभांशुभि-
र्नष्टा तामसमण्डलीव विलसद्वैरादिवार्त्ताऽपि हि ।
मार्गामार्गविचारचारिमधरा जाता समस्ता मही
यस्यैवाभ्युदये, स शान्तिसविता सुप्रातराविष्क्रियात् ॥ ४
(शादूर्लविक्रीडित)

योऽद्विष्टचित्तोऽपि रिपूञ् जघान
विरक्तचित्तोऽपि भुनक्ति मुक्तिम् ।
सदाऽभिजातोऽपि हि नाभिजातः
स कामितं कामितमातनोतु ॥ (उपजाति) ५

महामृगाङ्कः सततं प्रजानां सन्तापनिर्वापकपादसेवः ।
विस्मेरयन् कौमुदमादरेण जिनेन्द्रचन्द्रोऽजित एष पायात् ॥६
(उपजाति)

यैः क्षिप्तानि जगन्त्यपायकुहरे प्राप्तावकाशैः पुरा
स्थानं नश्य हृतं प्रणेशुरधुना पापाः क्व दोषा इति ।
तानन्वेष्टुमिव भ्रमन्ति भुवने प्राप्तोदया यद्गुणाः
स श्रीमाञ् जिनसम्भवो भवतरुच्छेदे कुठारायताम् ॥(शा.वि.)७

नन्दत्वसौ श्रीजिनपोऽभिनन्दनो यद्दानशौण्डीर्यगुणैकलिप्सया ।
प्रविश्य हेमाद्रिदरीं सुरद्रुमा भृङ्गस्वरेण प्रसभं जपन्ति किम्?॥८
(उपजाति)

भ्रूभङ्गं न बभार भालशिखरे नो शोणिमानं दृशोः
प्रागल्भ्यं हृदये नया शममये नाङ्गे तथोत्सेकताम् ।

हत्वा मोहभटं तथापि युधि यो निर्द्धाटयामासिवान्
भव्यस्वान्तपुराज्जिनः स सुमतिर्द्धर्म्मे मतिं वर्द्धयेत् ॥(शा.वि.)९

शशधरकरैः सायं दूये दिवा तु विहङ्गमै-
र्विदलितमहं स्थानं हेयं तदेतदशर्म्मदम् ।
इति सरसिजं तोयं हित्वा किलाङ्कतयाऽभज-
ज्जगदभयदं पादं पद्मप्रभस्य, स शर्म्मणे ॥ (हरिणी) १०

भक्तिरागनिभृतेषु मुनीनां मानसेषु चिरवासवशात्किम् ? ।
रक्तकोकनदरङ्गदभी(भां?)शुः स्पष्टयत्वभिमतं जिनषष्ठः ॥११
(स्वागता)

अन्तर्दीप्रसुबोधदीपकलिकोद्धुताञ्जनौघा इव
श्रीसंवेगसमुद्रवीचिविलसल्लीलाप्रकारा इव ।
रेजुर्यस्य शिरस्युदंशुमणयः पञ्च स्फुरन्तः स्फुटा
भद्रालीं दृढयेदघं विघटयेद्देवः सुपार्श्वः स वः ॥(शा.वि.)१२

विलसदतुलशुक्लध्यानसद्दुग्धसिन्धो-
रविरललहरीभिः प्रोद्गताभिः प्रकर्षात् ।
हिमहिमकरगौरा यत्तनुः प्लावितेवाऽ-
शुभदशुभभिदे स्याद्देवचन्द्रप्रभोऽसौ ॥ (मालिनी) १३

कृपामृताब्धिः सुविधिः समाधिं
सन्धातुमुत्साहयतां मनो वः ।
यस्माद् बुधाश्चिन्तितवस्त्ववाप्य
तृणाय चिन्तामणिमप्यमंसत ॥ (उपजाति) १४

अभ्रान्तवृत्तिमधुरो हरिणाश्रितोऽयं
भव्याञ् जनानवतु शीतलशीतलांशुः ।

यद्बिम्बमुज्ज्वलकलं भृशमीक्षमाणा
लोकत्रयी प्रमदतः कुमुदांबभूव ॥ (वसन्ततिलका) १५

श्रेयांसः श्रितवत्सलः सृजतु वो नित्यं श्रियं श्रायसीं
पञ्चाङ्गप्रणिपातनिर्म्मितिवशाद्यत्पादपीठाग्रतः ।
रेजुर्मञ्जुरजोऽवगुण्ठननिभाद्भालेषु भव्यात्मना-
मेते योग्यतमा इतीव तिलकाः पुण्यश्रिया निर्म्मिताः ॥ १६
(शा.वि.)

स्वभूर्भुवः स्थायुकलोकपूज्यः
श्रीवासुपूज्यो जयताज्जगत्याम् ।
सस्पर्द्धयेव श्रमणत्वलक्ष्म्या
यस्मिंस्तनुश्रीरपि भाति रक्ता ॥ (उपजाति) १७

कलियुगतया भीष्मग्रीष्मे प्रसर्प्पति भूतले-
ऽजनिषत कृशा आशानद्यो मदीयमनोभुवि ।
विमल ! तदलं वर्षत्वेषा प्रसादपयोभरं
तव पदपरीष्टिस्तत्पूरं सुवृष्टिरिवोच्चकैः ॥ (हरिणी) १८

सभाजनप्रीणनकृत्सभाजनो
महोदयस्थो विलसन्महोदयः ।
यकः सदाऽनन्तगुणालिनिर्मलो
मनःकपिं पातु नताननन्तजित् (गूढैकक्रियम् ।) ॥ १९
(वंशस्थ)

त्रैलोक्यलोकतिलकोऽस्ति जिनो गुणद्ध्या
तस्याऽप्युपर्यहमिति प्रमदादिवोच्चैः ।

नृत्यत्यशोकविटपी चटुलैर्दलैः किं ?
यद्धर्म्मसद्मनि स धर्म्मजिनः शिवाय ॥ (वसन्ततिलका) २०

भवाभ्यन्तरे कर्म्मधर्म्माकुलत्वाद्
गुणश्रेणिनिश्रेणिमालम्ब्य योऽलम् ।
सुखं मुक्तिवातायनं प्राप्य शेते
सदा निर्वृतः शान्तये स्तात्स शान्तिः ॥ (भुजङ्गप्रयात) २१

कुन्थुं कान्त ! नमस्कुरु, प्रियतमे ! कः क्षुद्रजन्तुं नमेत् ?
भर्त्तः ! श्रीतनयं वदामि, मदनः किं ? नैष सूरात्मजः ।
किं मन्दोऽयमयि प्रभो ! नहि जगत्प्रद्योतकस्तीर्थकृत्,
दम्पत्योरिति वक्रवाक्यविषयः पुष्यात्सुखान्येष वः ॥ २२
(शा.वि.)

पूर्वोपार्जितपापकर्मपटलान्येधन्ति यत्राङ्गिनां
खद्योतन्ति मृगाङ्कचण्डकिरणाद्या यत्र तेजस्विनः ।
विश्वव्यापकमप्यनक्षविषयं यद्भासते सर्वतः
तज्ज्योतिः प्रणिदध्महे भयभिदे देवारतो नापरम् ॥(शा.वि.) २३

देवो वाङ्मनसातिगोचरगुणोऽर्वाचीनदृग्देहिनां
मल्लिः पल्लवयेन्मतिव्रततिकां सोऽयं वसन्तोपमः ।
यस्माद्विश्वजनप्रमोदजननीमासाद्य रम्यां रमां
भव्यारामगणा इह प्रतिदिनं सेव्या न कस्याभवत् ॥(शा.वि.) २४

यो ध्यायमानोऽपि हि कृष्णवर्णस्तनोति सद्धर्म्मधियं बुधानाम्।
सुश्यामलश्रीजलदायमानो जयत्यधीशो मुनिसुव्रताख्यः ॥ २५
(उपजाति)

(शार्दूलविक्रीडित)

तापं तापमपारदुस्तपतपः सद्ध्यानशातासिना
छिन्दानं तरसात्मकर्म्मगहनं दृष्ट्वेनमादीक्षणात् ।
आत्मोच्छेदभियेव नो ववृधिरे केशा नखा यस्य वै
श्रामण्ये विहरन्नमिर्जिनपतिः सम्पत्तये जायताम् ॥ २६

मोहाख्यो नृपतिर्विकीर्णहृदधिष्ठानाद्विनिर्द्धाटितो
देवेनेति ततो विभग्नसकलोपायान्तरोऽयं किल ।
स्थानप्राप्तिकृते दिवानिशमसौ रागच्छलात्पिच्छलं
यत्पादाब्जयुगं भजत्यभिमतं दत्तां स नेमीश्वरः ॥ २७

किं भाद्राम्बुधरा अमी समुदिता आश्वासयन्तो जगत् ?
किं वैताः फलभारभुग्नतनवः प्राप्ता भुवं स्वर्लताः ।
श्रीवामेयशिरस्ययत्नजनितां छत्रश्रियं बिभ्रत
इत्थं भ्रान्तिकराः स्फुटाः सुमनसां कुर्वन्तु वो मङ्गलम् ॥ २८

कीदृक्षे हि विधौ भवन्ति विफलाः पुंसा प्रयासाः कृताः ?
भानोरुत्तरदक्षिणोभयगतौ के कारणं वर्णिते ? ।
का विश्वं निजसङ्गमात्प्रकुरुते सौभाग्यभाग्योज्ज्वलं ?
को वा सेवकसत्फलः कलियुगे वामेयनेता जयी ॥ २९

(प्रश्नोत्तरम् ।)

श्रीवीरः पुरुषोत्तमः क्षपयतात्पापं नृपश्रेणिका-
सेव्यांह्रिद्वितयः क्षमाभरधरः कल्याणकायं दधत् ।
यः सत्त्यागदयान्वितः प्रविलसत्सद्दर्शनोत्सर्प्पणा-
त्तं क्षिप्त्वा नरकं समाधिमुदितं स्वस्थं जगत् संव्यधात् ॥ ३०

अर्हन् सिद्धः प्रबुद्धः प्रकटगुणगणः पारगोऽनङ्गभेदी
वीरो विश्वाधिनाथः किशलयतु स वोऽतुल्यमाङ्गल्यमालाम् ।
व्योमेवाद्यापि यस्य प्रविदितमहिमोल्लासनं शासनं त-
च्चित्रं सूर्याढ्यमप्युज्ज्वलसुशशिकुलं भाति निस्तारकं यत् ॥३१
(स्रग्धरा)

वर्द्धमानजिनेशस्य वचनाय नमो नमः ।
अज्ञानध्वान्तविध्वंसाद् तदेव दिवसायते ॥ (अनुष्टुप्) ३२

दिन्नादितापसहितोऽपि हि तापहारी
रुद्धप्रमादविसरोऽप्यमितप्रमादः ।
यो निर्द्धनोऽपि धनधान्यसमृद्धिहेतु-
नामस्मृतिर्नमत तं गुरुमिन्द्रभूतिम् ॥ (वसन्ततिलका) ३३

नमः क्षमाधरोद्घाय श्रीसुधर्म्महिमाद्रये ।
जज्ञे गौरीदृशी यस्मान् महाव्रतिमनःप्रिया ॥ (अनुष्टुप्) ३४

श्रीमद्वीरजिनेशवंशविशदप्रासादशृङ्गाङ्गणे
रङ्गच्चारुसिताम्बरप्रविलसत्कीर्तिध्वजाबन्धुरे ।
सद्वृत्तः कलधौतकुम्भतुलनामुच्चैर्दधे यश्चिरं
प्रज्ञां पल्लवयत्वसौ गणधरः श्रीमान् सुधर्म्मा मम ॥(शा.वि.)३५

जयति जगन्ति पुनाना वाङ्मालाभिः सरस्वती देवी ।
करकृतमणिमिव कवयो विश्वं पश्यन्ति यदनुभवात् ॥ ३६
(आर्या)

सदुक्तिमुक्ताफलताम्रपर्ण्यै नमो नमः श्रीगुरुराजवाण्यै ।
जडस्वभावोऽपि हि यत्प्रसङ्गात्
सिन्धुः स रत्नाकरतामवाप ॥ (उपजाति) ३७

(अनुष्टुप्)

यदीयवागञ्जनस्य मनोदृशि निवेशनासत् ।
विन्दन्ति गूढमप्यर्थं जनास्तं गुरुमर्थये ॥ ३८

तदेव सम्यगाराध्याऽऽराध्यपादान्महादरात् ।
लेखोऽयं लिख्यते किञ्चिद्गद्यपद्यमयो मया ॥ ३९

क्व मे तुच्छतमा बुद्धिर्महान् क्वायमुपक्रमः ? ।
तदहं मातुमिच्छामि कुम्भैरम्भोऽम्बुधेरपि ॥ ४०

गुरुप्रसादतो यद्वा ममाप्यत्रास्ति योग्यता ।
भेकोऽपि हि भुजङ्गास्यं चुम्बेन्मान्त्रिकयोगतः ॥ ४१

विश्वाम्ब ! मे हृदि सरस्वति ! सन्निधेहि
स्या (द् येन) सम्प्रति फलेग्रहिरुद्यमोऽयम् ।
यद्वा चकास्ति गुरुभक्तिरचिन्त्यशक्तिः
सैव प्रमाणमखिलार्थविधौ ममास्तु ॥ (वसन्ततिलका) ४२

पू.उपा.श्री मेघराजगणिकृतम्
श्रीपांसठा-यन्त्र-उद्धारमय-

## ३१. ॥ श्रीचतुर्विंशतिजिनस्तोत्रम् ॥

(अनुष्टुप्)

आदिनाथं जगन्नाथं अरनाथं तथा नमिम् ।
अजितं जितमोहारिं पार्श्वं वन्दे गुणागरम् ॥ १

नेमिनाथं त्रिलोकीशं शान्तिञ्च सुविधिं तथा ।
अनन्तनतदेवेन्द्रं स्तुवेऽहमभिनन्दनम् ॥ २

सुव्रतं सुव्रतं नौमि श्रेयांसं सुखदायकम् ।
विमलं विमलाचारं धर्मं पद्मप्रभञ्जिनम् ॥ ३

मल्लिनाथं जिनेशं च वासुपूज्यं जगद्गुरुम् ।
कुन्थुं च शीतलं वन्दे सुपार्श्वं परमेश्वरम् ॥ ४

संभवं जगदानन्दं चन्द्रप्रभं नमाम्यहम् ।
सुमतिं वीरमर्हन्तं संघं चापि चतुर्विधम् ॥ ५

यन्त्रोऽयं जिनसंज्ञाभिः पञ्चषष्ट्यङ्क निर्म्मितम् ।
पूज्यते यस्य युक्तास्य मन्दिरे सततं खलु ॥ ६

तद्गृहे कोटि कल्याणं श्रीर्विलसती लीलया ।
क्षुद्रोपद्रवभूतादि नंश्यते व्याधिवेदनाः ॥ ७

भवति सुखमनेकं तस्य यो मानवश्च
विमलमतिरनिन्द्यं स्तोत्रमेतद्वितन्द्रः ।
पठति परमभक्त्या प्रातरुत्थाय शश्वत्
मुनिरभिकृतभक्तिर्मेघराजो बभाण ॥ (मालिनी) ८

पू.मु.श्री मेघविजयगणिकृतः

## ३२. ॥ श्रीचतुर्विंशतिजिनस्तवः ॥

(इन्द्रवज्रा)

देवाधिदेवाधिकभाग्यलक्ष्मी नाभेयनाभेयरुचस्तनोस्ते ।
भावेन भावे न विभावयेत केनाधिकेनाधिजगत्सतानो ॥ १

राजीव-राजीवनमेव शोभा मा याति मायातिगवक्रजां ते ।
ताराजिताराजितदेव सैषा सांके शशाङ्के शरदोऽपि न स्यात् ॥२

यूनां मयूनां महितालिरस्य मत्तानमत्ता न यशोभ्यगासीत् ।
गेयं न गेयं नरशंभवोऽर्हन् देयान् मुदेऽयान्मुनिचितसीमम् ॥३

मानादिमानादिकषायपङ्क्तिर्मोटाबभोहावशिनां ययास्ता ।
सातान्यसातान्यभिनन्दनाज्ञा कामान्त्रिकामान्त्रिरिता क्षणोतु ॥४

मारादमारादमरेश्वरेऽपि तेनाहतेनाह कृता त्वयाऽस्मिन् ।
देवापि देवापि यशः शिवाग्रधाम्ना सुधाम्ना सुमतीश ! विश्वे॥५

सौसीम सौसीमयुतं वचस्ते तापोपतापोपशमे समर्थम् ।
वन्दे शिवं देशितसर्वभावं मानोपमानोपचितं हितं मे ॥ ६

का मोद कामोदनशोषधर्म पार्श्वः सुपार्श्वः सुमनोमनस्थः ।
पृथ्वीज पृथ्वीजनितोष्मनाशः शोभा यशोभायकरो ममाऽस्तु॥७

राज्ञा नराज्ञानहरांह्रिपद्मे सल्लक्ष्म सल्लक्ष्मणया प्रसूतः ।
देहोभदेहो मनसाभिधार्यः सुस्थाम सुस्था महसेनसूनोः ॥ ८

रामाज ! रामाजनविभ्रमाद्या जेया भजे याऽभयदा निजं त्वाम् ।
योगाभियोगाभिगमेन येनाऽनाबाधना बाधत एष मोहः ॥ ९

यस्याऽभयस्याभवमेव दत्तानन्दासु नन्दासुतपूजनासु ।
रागोनुरागोनुदमुष्यमुष्यः शोभारसौ भारतिकृद् विभाति ॥ १०

दुःखान्यदुःखान्यवशान्यपारं कामे न कामेन कदर्थनाऽभूत् ।
तेनाथ ते नाथ समीपमागा मारक्षमा रक्षक विष्णुजन्म ! ॥११

देवो मुदे वो मुनयस्त्रिलोकीदीपो नदीपो नयनिम्नगानाम् ।
सद्भाव सद्भा वसुपूज्यराजजन्मारजन्मा रजविक्रियासु ॥१२

कारांप्रकारा प्रसभं निगोदमध्ये यमध्येयजने न सेहे ।
बाधानबाधानतयाथ साङ्गे-लीना विलीना विमलाथ नत्या ॥१३

का नामकानामभवन्न लक्ष्मी
राज्यादिराज्यादितशास्त्रवाया(चा?) ।
दानं तदानन्तपदोरवर्णि-ना केन नाके नरमण्डले ना ॥ १४

चारित्रचारित्रयके तमिस्त्रहीना महीनाम बभूव यस्याः ।
भानुप्रभानु प्रभुधर्मनाथ सातत्त्व सा तत्त्वदनन्तकान्तेः ॥ १५

शान्ते निशान्तेऽनिशमंह्रिपद्म नत्या जिन त्याजितमेव मेंऽहः ।
मन्येहमन्येह विधास्यते मां सेवा स्वसेवाश्वपुनर्भवस्थम् ॥१६

भावस्वभाव स्ववधूकटाक्षां ताक्षोभिताक्षो भिदुरास्त्रवन्द्यः ।
विद्यामविद्यामह कुन्थुनाथ शर्मा सशर्मा सततं प्रदेयात् ॥ १७

कायो निकायो निवसद् गुणी(णा?) नां
दानं निदानं नितमां सुखानाम् ।
मानं विमानं विगदागमाना-मानन्दमानन्दयतोरभर्त्तुः ॥ १८

विश्वस्य विश्वस्य हृतं सुखस्वं येनानयेनानतयोगभाजः ।
तेनापितेनापि मनोऽत्र मोहमल्ले नमल्ले नरकान्तकारिन् ॥ १९

मायारमाया रमणीसुखाद्या मुक्ता हि मुक्ताहितसौहृदेन ।
पायादपायादयि ! सुव्रतोऽर्हन् मामुत्तमामुत्तमसां विभेत्ता ॥२०

दायं विदायं विजयस्य सूनो देहीश देही शरणे तवास्मि ।
भावादभावादव संप्रसीद पातः कृपातः कृतिवन्द्यकार्या ॥२१

योषाभयोषाभर सूर्य नेमे रागादरागादमृते तवाग्रे ।
तां मेदुतां मेदुरतां प्रयच्छ यन्नोभयन्नो भवजं प्रदुष्यात् ॥ २२

सद्भूवसद्भूवलयेशसेव्य नामाङ्ग वामाङ्गजसेवितस्त्वम् ।
यातो मयातो मननप्रकाशः शंभावि सम्भावितमप्यवश्यम् ॥२३

भावित्रिभावि त्रिशलाङ्गजन्म देवस्तु देवस्तुतपादपद्म ! ।
सा भोगसाभोग शिवाप्तये मे कल्पद्रुकल्प द्रुतमेव भूयाः ॥२४

तेनावृतेना वृषभादिदेवाः सन्मानि सन्मानितशासना नः ।
सातानसातानयना दिशन्तु,
सिद्ध्या यसिद्ध्यायतबोधभावम् ॥ २५

को हेतुको हेतुरसः कुशास्त्रे तद्भाव तद्भावय जैनवाक्यम् ।
सम्पद्य सम्पद्यशसी यतस्ते मोक्षागमोक्षागणितश्रिये स्यात् ॥२६

भारत्यभारत्यसुखानि हत्वा वीणाप्रवीणा प्रतनोतु बुद्धिम् ।
तीर्थेशतीर्थे सततानुरक्ता मेधाविमेधाविधिसिद्धिहेतुः ॥ २७

एवं श्रीजिननायकाः स्तुतिपथं नीताश्चतुर्विंशतिः
श्री नाभेयमुखाः सुखाय सुमुखा देवार्यदेवान्तिमाः ।
सूरिश्रीविजयप्रभप्रभुपदप्रासोदये सन्त्वमी
मेघाख्ये सकृपाः कृपादिविजयप्राज्ञेन्दुशिष्ये मयि ॥ २८

पण्डितवरश्री धर्मशेखरगणिविरचितः

## ३३. ॥ श्रीचतुर्विंशतिजिनस्तवः ॥

(स्रग्धरा)

श्रीनाभेयोपमानोन रहित तमसा नन्द दारामनोऽजः
श्रीनाभेयोऽपमानो नरहिततम सानन्ददारामनोज ! ।
न त्वा नातारधीरा सम वृषभजिन ब्रह्मचारित्रसारं
नत्वा नातारधीरा सम वृषभजिन ब्रह्मचारित्रसारम् ॥ १

श्रीकान्तेहाममोहासममजिततमो रङ्गदेनासमानः
श्रीकान्तेहाममोहा सममजिततमोरङ्गदेनासमानः ।
रत्या हीनो विनोदो नयपर विजयाजात नो नाशयामा
रत्याहीनो विनोदो नयपरविजयाजाऽतनो नाशयामा ॥ २

राजावामाजमायाहर शमद महानङ्गजन्माजितारे
राजावामाज मायाहर शमदमहा नङ्गजन्माजितारे ।
कल्याणच्छाय तत्त्वादर सुभग जरानाशनः शम्भवेनः
कल्याणच्छायतत्त्वादरसुभगजरानाशनः शम्भवेनः ॥ ३

सिद्धार्थासंवराङ्गप्रभवभवमदो नाऽरताऽकाऽयितारः
सिद्धार्थाऽऽसंवराङ्गप्रभव भवमदोऽनारताऽकायितारः ।
सद्राज्यानाशयागोऽसमभयमपरः सापदे नो समाधिः
सद्राज्यानाशयागो समभयमपरः सापदेनोऽसमाधिः ॥ ४

नव्याश्रीमङ्गलाजा नयमव सुमतेतापदं मावराऽकं
नव्या श्रीमङ्गलाजा नयमवसुमते तापदम्मावराकम् ।
हन्तारन्ता सदोमाभव नवरविभोऽव्याधिरुर्व्यामनीतेऽ
हन्ता रं ता सदोमा भव नवरविभो व्याधिरुर्व्यामनीते ॥ ५

विश्वांशो ! रुच्यपद्माङ्क लसदय सदा देव नव्यामरीणां
विश्वांशोऽरुच्य पद्माङ्कल सदय सदादेव नव्यामरीणाम् ।
तारायानामद त्वाप्त समयमतमारक्त पद्मप्रभोमा-
ताराया नाम दत्वाप्तसमयमतमा रक्तपद्मप्रभो मा ॥ ६

सातं का श्रीसुपार्श्वाऽर ततम जनताऽमानस त्वासमा ना
सातङ्का श्रीसुपार्श्वारततम ज नता मान सत्त्वासमाना ।

श्रीपृथ्वीजं तुरक्षाकरणकुशल तादावदाताज्ञ मोह-
श्रीपृथ्वीजन्तुरक्षाकरणकुशलतादाव दाता ज्ञ ! मोह ॥ ७

स श्रीचन्द्रप्रभेशामर ! गुरुसुमनो मह्य यस्यारताशं
सश्रीचन्द्रप्रभेशामरगुरुसुमनोमह्य यस्यारताशम् ।
भास्वच्चित्तं सुसारातनु भवन मतोदार तत्त्वासमानं
भास्वच्चित्तं सुसारा तनु भव नमतो दारतत्त्वा समानम् ॥ ८

माया रामासुतं कोकलकल सुविधेऽनारतं धीर नत्वाऽ-
माया रामासु तं को कलकलसुविधे नाऽरतं धीर न त्वा ।
शम्भोऽगेहाप हीनं गुरुरुचिरतनुं भासमानं श्रियोर्व्या
शं भोगेहापहीनं गुरु रुचिरतनुं भासमानं श्रियोर्व्याम् ॥ ९

शुद्धो नन्दाज ! विश्वाहित ! रहिततमः शीतलामन्दसारः
शुद्धो नन्दाऽज ! विश्वाहितरहिततमः शीतलामन्दसारः ।
सूद्युत्ताराय शोभामय नरकमला भोगदातापरागः
सूद्युत्तारायशोभामयनरकमला भोगदाताऽपरागः ॥ १०

श्रेयःश्रेयांस मारापद घनगदहं सर्वदाकान्तमाप्त
श्रेयः श्रेयांसमारापदघनगदहं सर्वदाकान्तमाप्त ! ।
सौम्यो मायाहसत्वा समदमपरमाज्ञ स्तु वेगेन धीरं
सौम्योमायाहस त्वा समदमपरमाः ज्ञ स्तुवे गेन धीरम् ॥ ११

साराव्याधीरसेनासमरदसमताभास्वरश्रीजयाऽज
साराव्या धीरसेनासमरद समताभास्वर श्रीजयाज ।
सद्मानो वासुपूज्याऽमदनरम महाचित्ततोहासमाया
सद्मा नो वा सुपूज्यामद नरममहा चित्ततोऽहास मा या ॥ १२

सोमा श्यामा भवस्याऽनिधुवन सुधृतेऽनाश भावारसूर
सोमाऽश्यामाऽभव स्याऽनिधुवन सुधृतेऽनाश भावार सूर ।
व्यापद्विश्वान्यमाना शिव विमलत मोहा समज्ञानते न-
व्यापद्विश्वान्यमानाशिव विमलतमोहासमज्ञान तेन ॥ १३

केऽनन्तज्ञानरुच्याऽऽशु भवति सुगते तेन तारागदाराः
केऽनन्त ज्ञान रुच्या शुभवति सुगतेतेनता रागदाराः ।
सातङ्कामन्ददानेऽरत परमदमासत्तमाः कामदेहा-
ऽसातङ्कामन्द ! दाने रत पर मदमासत्तमाः कामदेहा ॥ १४

जाताऽपारप्रभावा दरमरण सदा सुव्रताप्ताघनाशो
जातापार प्रभावादरमरणसदा सुव्रताप्ताघनाशो ।
सज्जाया धामभानोऽरतनुतरम ते धर्म रक्ताधरेश
सज्जाया धाम भानोरतनुतमते धर्मरक्ता धरेश ॥ १५

सन्मानासाङ्गजन्माऽदरमलम चिरादार साराङ्गताराऽ-
सन्माना साङ्गजन्मादरमलमचिरा दारसाराङ्गतारा ।
प्रायादुर्व्यामनाशाच्छमपर भवतो विश्वसेनस्य राज-
प्रायादुर्व्यामनाशाच्छमपरभवतो विश्वसेनस्य राज ॥ १६

श्रीमत्यायासमानामरहितऽसदया सत्यसाराज हर्ष-
श्रीमत्यायासमानाऽमर हित सदया सत्यसारा जहर्ष ।
देवी वामा सुरुच्या शिवपदजनने तेऽरमातारनव्या
देवीवामासुरुच्या शिवपद जननेते रमातार नव्या ॥ १७

श्रीश्रीजातापनाशं नयद जगदरं तेन कामं समायं
श्रीश्रीजातापनाशं नयदज गदरं तेनकामं समायम् ।

श्रेयो नाऽऽपत् प्रजापं जयदमद सदादे हि नामाप्तरूप
श्रेयो नापत् प्रजापं जयदमद सदा देहिनामाप्तरूप ॥ १८

श्रीमल्लेखेनमह्याऽपदघनरुचिमाराऽज मानासमाऽरं
श्रीमल्ले ! खेन मह्यामद घनरुचिमा राजमानासमारम् ।
नाकम्पापेन न त्वाऽजितम हस मताकारसौम्यं सुदृष्टि
ना कं पापेन नत्वाऽऽजितमह समाताकारसौम्यं सुदृष्टिम् ॥१९

श्रेयोऽनेनोऽभवाना रदरमघवतोऽनाशयामाऽसम ह्यः
श्रेयोनेनो भवानाऽरदर मघवतो नाशयामास मह्यः ।
श्रीपद्माभूरतापाऽयमरण हततं सुव्रताऽकोऽपमान-
श्रीपद्माभू रतापायमरणहऽततं सुव्रताऽकोपमान ॥ २०

सूरो ! मायाहृदोजोविजयभवन मे भव्यकल्याणदेह
सूरो मा या हृदोऽजो विजयभव नमे ! भव्यकल्याणदेह ।
नारेडेऽनोदरागानल सततमहं सारधीराम हत्वा
नारेडे नोदरागानलस ततमहं सार धीरामहत्वा ॥ २१

सद्भावाऽराग नेमे ! समयमहि महोरो समानायतेन
सद्भावारागनेमे ! ऽसम यमहिम हो रोसमानायतेन ।
नाशज्ञो देवराजस्तुतवचन रसासार भूयादनन्ता-
ऽनाश ! ज्ञो देव राजस्तुतवचनरसासार भूयाद नन्ता ॥ २२

श्रीमत्पार्श्व प्रभोमालय समितिमनोऽजन्मनाशोऽहताशः
श्रीमत्पार्श्वप्रभो मालय समितिमनो जन्मनाशोहताशः ।
नापायासः सदानो विभव परमतीराज ते शस्तयोगी
नापायासः सदा नो विभवपरमती राजते शस्तयोगी ॥ २३

मुक्तोमन्दोदयोर्वी शमद कलकलाऽऽसातमोहारिदोऽश्री-
मुक्तोमन्दोदयोर्वीश मदकलकलासाऽतमो हारिदोश्रीः ।
नीरागो वर्धमानाऽयमहजयभयासामहीनः सुधीरा-
नीरागो वर्धमानाऽयमहजयभया साम हीनः सुधीरा ॥ २४

एवं श्रीनाभिसूनुप्रभृतिजिनवराः षोडशाऽष्टौ च विश्वे
विख्याताः सम्पुटाख्याऽसमतमयमकैः संस्तुता भूरिभक्त्या ।
मह्यं मह्यक्रमाब्जारविशशिभवनव्यन्तरस्वर्गिराजां
सिद्धिश्रीकार्मणं श्रागतिगुरुददतां दुर्लभं बोधिरत्नम् ॥ २५

मुनिप्रवर श्री विनयहंसगणिविरचितम्

## ३४. ॥ श्रीजिनराजचतुर्विंशतिकास्तोत्रम् ॥

(शार्दूलविक्रीडित)

मेरोः किं शिखरस्थकल्पलतिकासर्वव्रताणुव्रतो-
द्घाटे वोद्भटकुञ्चिकोज्झितमहाराज्यश्रियोऽत्र च्छटाः ।
किं मुक्तेर्वरणस्रजेव सुजटां दृष्टेति शीर्षांसगां,
यस्योत्प्रेक्षककावदादिशतु मे श्रीआदिदेवः श्रियम् ॥ १

यत् पूर्वं वृषभं क्षमाभरधरं सर्वंसहं सर्वतः,
स्वप्नेऽपश्यदसौ प्रसूरथ जिनोर्वङ्केकगोब्रूद्वृषः ।
यः स्वस्मिंस्तदलञ्चकार वृषभेत्याख्यां क्षितौ सार्थकां,
स श्रीआदिजिनस्तनोतु नमतां शिष्टेष्टतुष्टिप्रथाम् ॥ २

यस्मिन् गर्भगते जितैव विजया मित्रैस्तथाऽक्षादिक,-
क्रीडायां जितशत्रुणाऽथ युवताराज्यव्रतावस्थया ।

यस्तिष्ठन् विषयैर्द्विषद्भिरजितो घोरोपसर्गैः क्रमा-
ज्जज्ञे श्रीअजितः शिवाय स जिनः सान्वर्थनामा स्वयम् ॥ ३

पूर्णाशा जननी समस्तजनता शङ्कानिरारामभूः
कल्पानल्परमानिधिः प्रतिपदं सत्सन्निधिः सद्विधिः ।
आसीत् सत्यतमार्थनाम दधतो यस्यावतारेऽवनौ,
भूयाच्छं भवनाय शम्भवजिनः सद्भावभव्यात्मनाम् ॥ ४

मुक्तात्माऽप्यविमुक्तकोऽक्षरमयव्यक्तिर्न लिप्यालयः,
शश्वत् संवरजोऽपि संवरकरः श्रीदोऽप्यहोऽकिञ्चनः ।
विद्वानप्यगुरुर्हताहितपदः शान्तोऽपि यः सौस्तवो,
दिव्यामन्दमुदेऽभिनन्दनजिनः सुत्रामदत्ताह्वयः ॥ ५

निःशेषार्थविनिश्चयेषु सुमतिर्नो केवलं मङ्गला,-
ऽज्ञानम्लानितया नु विश्वजनता यस्यावतारेऽभवत् ।
न प्राच्येव यथार्कभाभिरमला शेषा अभि स्युर्दिशः,
किन्तु श्रीसुमतिस्तनोतु सुमतिं वोऽसौ यथार्थाह्वयः ॥ ६

भावी स्वामिवरोऽयमुत्तमपदं लक्ष्म्या अमात्रैर्वृतः,
पात्रैः पद्ममिवोपकारनिरतस्तापापनोदैरिति ।
किं प्रज्ञापयितुं यदीयजननी दध्रेऽब्जशय्योपरि,
स्वापे दोहदमर्थगाह्वयवहः पद्मप्रभः स श्रिये ॥ ७

आरोग्याभ्युदयेन रूपमहिमेनैश्वर्यचातुर्यते,
यस्मिन् गर्भगते न केवलमभूत् पृथ्वी सुपार्श्वाप्रसूः ।
नानादानदयादमोदयपथः पृथ्वी तु सर्वंसहा,-
ऽपीष्टं पुष्यतु नः सुपार्श्वभगवान् सान्वर्थनामान्वयः ॥ ८

देवोऽयं कुमुदादरोऽखिलकलात्सालङ्किलाह्लादक,-
स्तापव्यापतमोहरोऽमृतपदं सा वा शशीवेति किम् ।
शंसन्ती विधुपानदोहदमधाद् यस्यागमे लक्ष्मणा,
सल्लक्ष्म्यै सुयथार्थनामरचनश्चन्द्रप्रभः सोऽस्तु नः ॥ ९

अर्हत्सेवनभावनेन शिवदश्रीधर्ममर्मज्ञता,-
विज्ञाः स्युर्न परोपक्लृप्तकुमताधीशाद्यथाहं मता ।
एवं ज्ञप्तिकृतेऽखिलेषु विधिषु व्यक्तैव गर्भागतौ,
रामा यस्य बभूव सोऽस्तु सुविधिः सिद्ध्यै यथार्थाभिधः ॥१०

गर्भस्थं निशि यं दधार जननी नन्दा मुदा यावता.
तावद्गर्भगतेश ! सातिशयतामाहात्म्यतोऽङ्गे पितुः ।
दाहैः सादर्धमशेषविष्टपमहातापोपशान्तिः क्षणा-
ज्जाता शीतलता च शीतलजिनः सत्याभिधः स श्रिये ॥ ११

एतद्देवनिषेवणेन भविनः सम्भाविनोऽनन्तशं,-
भाजः संवरसत्समाधिसुखभृच्छय्याश्चतस्त्रः श्रिताः ।
आरुह्यामृतशेयमित्यति वदन् किं यत् प्रसूदोहदो,
दिव्यार्हे शयनेऽयनाय समभूच्छ्रेयांससार्वोऽस्ति सः ॥ १२

यद्गर्भागमनावधेर्भवरिपूञ्जित्वा जयायां तथा,
स्वर्णादिद्रविणोदयेन वसुपूज्येशे च सौवात्मनि ।
पौनःपुन्यसुरेशपूजननयैः सान्वर्थगोत्रत्रयं,
यश्चक्रे विदधातु वाञ्छितफलं श्रीवासुपूज्यः स वः ॥ १३

यस्मिन् गर्भगतेऽपि सौवपदवीसौभाग्यदे संस्मृते,-
रप्यासीद्विमला न केवलमियं श्यामा धियाङ्गेन च ।

विश्वस्थस्तु जनोऽपि पावनपदज्ञानादिसौन्दर्यतः,
श्रीमन्तं विमलं नमामि तमहं सत्यीकृताह्वोदयम् ॥ १४

देवोऽयं भविनामनन्तसुखविद्वीर्यैकदृष्ट्यात्मकं,
दिव्यं दास्यति दुर्लभं पदमितीवाशंसनायावनौ ।
स्वप्ने पश्यदनन्तमुज्ज्वलमणीन् यद्दाम गर्भागमे
यस्यां वा सुयशाः स गच्छतु जिनोऽनन्तः सदाख्यः श्रियम्॥१५

सत्यार्थप्रभवप्रभावविभुताहो दृश्यतां येन यद्-
गर्भस्थेन जगत्त्रयेऽपि सुकृतोद्द्योतस्थितिं तन्वता ।
चक्रेऽम्बैव न सुव्रताखिलजनोऽप्येवं परं धर्मभाक्
स श्रीधर्मजिनश्चिनोतु नमतां धर्मं यथार्थाभिधः ॥ १६

नानाजातिकुयोनिदुर्गतिगतं दुःखं मयाऽनन्तशः,
सोढं तच्छ्रितवत्सलः शिवपदं देहीश ! मे शं पदम् ।
विज्ञप्तिं प्रथयन्निवीव भजते लक्ष्मोपधेयं मृगो,
गर्भस्थो शिवशान्तिकृत्सदभिधः शान्तिः स शान्तिप्रदः ॥१७

तीर्णस्तारकमुक्तमोचकपदं बुद्धः स्वयम्बोधको,
दर्शी दर्शक इत्यनन्तसुगुणी देवोऽयमेवास्ति भूः ।
नान्यः शंसक इत्यनुत्तरमणी कुन्थुः श्रियादर्शि यद्,
गर्भे स्वप्ननिशीव सोऽस्तु शिवदः कुन्थुः पृथुस्वाह्वयः ॥ १८

एकद्रव्यमनेकपर्यवचये नानन्तधर्मात्मकं,
तत्स्थानेऽत्र निदर्शनं द्विपदयुक् देवोऽयमध्यक्षतः ।
ज्ञप्तिं कर्तुमितीव चक्रिजिनतार्हं देव्यरन्दीप्रभं,
स्वप्नेऽपश्यदरः स्फुरत्वुरसि(?) मे सान्वर्थनामा जिनः ॥१९

देवोऽयं विविधाऽतिशायिसुगुणैः सूनस्त्रजेवासृजन्,
वासं सर्वदिशामयीह भवितेऽतीवाभवद्दोहदः ।
सौगन्ध्यातिशयैकमाल्यशयने यस्यावतारेऽवनौ,
मातुर्मल्लिजिनः श्रियं दिशतु वः सोऽर्हन्निहार्हाह्वयः ॥ २०

कूर्मोऽहं त्वमिव क्षमाभरधरो गुप्तेन्द्रियोऽप्यन्वहं,
तिर्यग्दुर्गतिदुःखदुर्गतहृदस्मीशेति शं मे चिनु ।
देहि श्रेय इतीव सोङ्कनिभतो विज्ञप्तिकां यं मुदा,
कुर्यान्मातरि सुव्रतत्वकृदिति स्वाख्यः श्रिये सुव्रतः ॥ २१

यन्नामाऽपि समागतं हृदि सकृद्बाह्यान्तरारिक्षयं,
चेत् कुर्यादथ मूर्तिदर्शनमिदं यत्तन्न विघ्नो महत् ।
भीत्येतीव यदङ्गवीक्षणकृतः प्रत्यन्तभूपा नता,
यत्पित्रोः स सुखाय मे सफलिताभिख्यो नमिर्नायकः ॥ २२

जिग्ये येन महोर्जितं रणमुखे लक्षाङ्ककं राजकं,
यश्चक्रे जितवीर्यकं सुरगणं वज्रिप्रशंसाऽसहम् ।
विष्णोरस्त्रगणं नय स्वकबलैर्मेने तृणायाप्यभूद्,
यस्यारिष्टमणी जनेस्यनुभविन्यम्बा स नेमिः श्रिये ॥ २३

यस्याम्बा शयनीयपार्श्वसदहिध्वान्तेऽप्यपश्यच्च यः,
पार्श्वाद्‌र्ध्वज्वलदग्निदग्धफणिनोऽदादैन्द्रराज्यं तु यः ।
पार्श्वोपासितपार्श्वभाग् भविकदः पार्श्वं च यस्येष्टदं,
सान्वर्थाभिधयान्वितः श्रितहितश्रीदः स पार्श्वप्रभुः ॥ २४

यश्चक्रे भुवि वर्द्धमानकलया सर्वोपधाभिर्यथा,
पूर्णं ज्ञातकुलं निजावतरणैः सिद्‌ध्यापि विश्वं तथा ।

यः सिद्धार्थमपि व्यधादधिकलं मानेन मेरोरपि,
श्रीभ्यः सोऽस्तु यथान्वयाऽह्वयवरः श्रीवर्द्धमानप्रभुः ॥ २५

ये पिण्डस्थपदस्थसिद्धपदगावस्थात्रिकध्येयता,-
निष्ठाः प्रष्ठपदस्थहर्षविनयश्रीसूरिराजार्चिताः ।
धर्माधर्मपथप्रहर्षविनयश्रीसूरितादेशना,
भूमौ श्रीऋषभादयोऽखिलजिनास्ते सन्तु भद्रङ्कराः ॥ २६

एवं श्रीगुरुराजहर्षविनयश्रीसूरितः सम्पदं,
भक्तिव्यक्तिसुयुक्तितः स्तुतिपथं नीतो मया मायया ।
सर्वः सार्वकदम्बकः क्रमकजोपास्तिस्तदीयाऽस्तु मे,
तन्नित्या गुरुधर्महंससरसक्रीडाब्जिनीश्रीपदम् ॥ २७

पू.मु.श्री गुणविजयगणिविरचितः

## ३५. ॥ श्रीचतुर्विंशतिजिनभवस्तवः ॥

(शार्दुलविक्रीडित)

नत्वाऽऽदौ विधिवद्गुरोः क्रमकजद्वन्द्वं गरीयः श्रियो-
गेहस्य प्रकटप्रभावकलितस्याधारमूर्त्तेर्मुदा ।
श्रीमन्नाभिनरेन्द्रनन्दनमुखस्याद्वादिनामादरा-
द्दिग्मातङ्गजगन्निशाकरमितान् वक्ष्ये भवान् भक्तितः ॥ १

पूर्वं यो धनसार्थराट् युगलिकः सौधर्मवृन्दारको
विद्याभृच्च महाबलो नरपतिः कल्पे द्वितीये मरुत् ।
भूपालो युगलीसुरः प्रथमके कल्पे भिषक् द्वादशे
देवश्चक्रधरः समग्रविबुधोत्तंसो वृषाङ्कः श्रिये ॥ २

जम्बूद्वीपविदेहवच्छ(त्स)विजयाभूभामिनीभूषणं
भूपश्रीविमलादिवाहन इति प्रौढप्रतिष्ठाऽस्पदम् ।
गीर्वाणो विजयाभिधानविपुलस्फूर्ज्जद्विमानेऽभवत्
भूयाद्भूरिविभूतयेऽजितजिनः सोऽयं सतामन्वहम् ॥ ३

विश्वेशो विपुलाद्बलो बलवतामाद्योऽनवद्यो भुवि
प्रख्यातः प्रथितोदयः सुरवरो ग्रैवेयके सप्तमे ।
श्रीसेनाङ्गभवो भवोद्भवमहाकष्टैकविध्वंसको
जीयाज्जन्मजरादिदुःखरहितो भास्वद्यशा जन्मिनाम् ॥ ४

रत्नं रत्नपुरेश उज्ज्वलतरश्रेयःश्रियामाश्रयो
विश्वव्यापिमहामहाबलनृपो वर्यावदातो महान् ।
लब्धाऽनेकजयो जयन्तविबुधः श्रीसंवरक्ष्मापतेः
सूनुः श्रीअभिनन्दनो मतिमतामानन्दतात् मानसम् ॥ ५

उर्वीशोऽतिबलो विदेहवसुधासारङ्गसीमन्तिनी-
सारङ्गः सकलार्थसिद्धिकलितो लीलाविलासालयः ।
आराध्य व्रतमद्भुतं च दिविषज्जातो जयन्ते श्रियं
चेषीष्टाङ्गिततिप्रदत्तसुमतिः श्रीमङ्गलानन्दनः ॥ ६

यो नीरेश्वरमेखलाप्रियतमो गाम्भीर्यनीरेश्वर-
स्तेजस्विन्नपराजितेत्यभिधया धीधाम धामोल्बणः ।
शान्ताह्वानरसं विभाव्य नवमे ग्रैवेयके निर्जरः
सञ्जातो जयताज्जयर्द्धिनिवहः श्रीसुप्रभः केवली ॥ ७

श्रीनन्दिर्वसुधाधवो नयनिधिर्मुख्येभवेऽत्यद्भुतः
प्र(ष)ष्ठे श्रेष्ठमतिः परर्द्धिविजुषि ग्रैवेयको दैवतः ।

संसाराम्बुनिधौ पतन्तममिते स्वं किङ्करं तीर्थराट्
पायात्पावनकीर्त्तिकान्तिनिचितः स श्रीसुपार्श्वप्रभुः ॥ ८

श्रीवर्मक्षितिपोऽथ निर्जरवरः सौधर्मवासी ततः
सञ्जज्ञे जितसेननामनिपुणः श्रीसार्वभौमोत्तमः ।
देवेन्द्रोऽच्युतगश्च पद्मनृपतिः श्रीवैजयन्ते मरुत्
चन्द्राङ्कः कुरुतात् शिवानि
शिवकृत् स प्रीतिमान् प्राणिनाम् ॥ ९

श्रीमत्पुष्करपुण्यभूमिषु महापद्माभिधक्ष्माधवः
स्वं राज्यं चिरकालमुज्ज्वलयशा योऽपालयद्धीधनः ।
गीर्वाणस्त्रिदिवेऽजनिष्ट दशमे निर्वाणशर्मस्पृहः
सुग्रीवक्षितिपात्मभूर्भवभिदे श्रीपुष्पदन्तो जिनः ॥ १०

विद्वद्वर्ण्यविदेहवच्छ(त्स)विजयाविश्वम्भराविश्रुतः
पद्माक्षः क्षितिपालमौलिमुकुटः श्रीपद्मपृथ्वीपतिः ।
श्रीमत्प्राणतवासिनाकिनिकरालङ्कारचूडामणि-
र्लेखोऽथ प्रभुशीतलः प्रथयतात् सिद्धिं सुवर्णप्रभः ॥ ११

आसीन्न्यायशुभानगर्यधिपतिर्दासीकृतारिव्रजो
नीतिज्ञो नलिनादिगुल्मनृपतिश्चञ्चन्मतिः सद्ग(द्र)तिः ।
आदाय व्रतमच्युतेऽमृतभुजां मुख्यो गुरुः श्रेयसे
श्रीश्रेयांसजिनादितेयरमणः स्वर्धेनुतुल्यः सताम् ॥ १२

पद्माभक्रमपाणिरिन्दुवदनः पद्मोत्तरक्ष्मापतिः
पुंरत्नं विमलादिबोधसचिवः प्रोद्दामधामा स्फुटम् ।
कल्पे प्राणतनाम्नि चारुधिषणो देवाधिराजस्ततो
देयाद्वासवपूज्यपादकमलः श्रीवासुपूज्यः शिवम् ॥ १३

भूभूषासुमहापुरीनरपतिः श्रीपद्मसेनाभिधो
निःशेषाऽवनिपालपालितयशा सामन्तवन्द्यक्रमः ।
लात्वा दैक्ष्यमवातरद्दमयुतो देवः सहस्रारके
श्यामायास्तनुजस्तनोतु नियतं सौख्यानि भव्याङ्गिनाम् ॥ १४

राजा पद्मरथः स्वकीयधिषणागीर्वाणभट्टारकः
सञ्जातः सकलार्थसाधनपटुर्व्यावर्ण्यमुख्ये भवे ।
देवः प्राणतकल्पगः सुरवधूनेत्रत्रिभागातिथि-
र्दिश्याद्वः कुशलं सुकृत्यकुशलः श्रीमाननन्तोऽन्वहम् ॥ १५

भूभर्त्ता भरताऽवनौ दृढरथः श्रीभद्दिलाधीश्वरो
दुर्नीतिस्थितिभिज्जयी च विजये स्वाहाऽशनः सुन्दरः ।
स्तादस्ताघभवाब्धितारणविधौ सत्कर्णधारः प्रभु-
र्मच्चेतोजलबालकाचलविलासी धर्मदन्ताबलः ॥ १६

श्रीषेणाभिधभूपतिर्मिथुनिकः सौधर्म्मकल्पे मरुत्
खेटेशोऽमिततेज इन्दुविमलः श्रीप्राणते निर्जरः ।
सीरी द्वादशकल्पदैवतपतिवज्रायुधश्चक्रभृद्
ग्रैवेये त्रिदशो नृपश्च विबुधः शान्त्यै स शान्तिर्जिनः ॥ १७

सिंहो द्विस्ततिकुम्भिकुम्भदलने सिंहावहः काश्यपी-
कान्तः कान्तगुणौघरत्नजलधिः सर्वार्थसिद्धौ सुरः ।
श्रीसूरक्षितिपालवंशतिलकः श्रेयोऽम्बुजाहर्मणिः
मच्चेतः सदने विशत्वविरतं श्रीकुन्थुतीर्थाधिपः ॥ १८

लब्धश्लोकधनो नृपो धनपतिर्विद्वेषिदन्तिव्रजे
बिभ्राणः स्फुटपाटवं पटुगतिर्मातङ्गविद्वेषिणः ।

धर्माराधनतत्परः श्रुतिमतिः सर्वार्थसिद्धौ मरुद्
यो जातः शिवतातिरस्तु भविनः स्याद्वादिसौदर्शनः ॥ १९

षण्मात्रैर्मुदितो महाबल इति क्षोणीरमामाधवः
क्षोणीशस्त्रिदशाधिराजसदृशः श्रीयुग् जयन्ते सुरः ।
कर्मौघद्रुमहस्तिमल्लकरणिः श्रीमल्लिरिष्टाप्तये
सेव्यः सज्जनचारुचित्तजलधौ स्पष्टं मृगाङ्कोपमः ॥ २०

भूपालः शिवकेतुकः सुरवरः कल्पेऽथ सौधर्मके
च्युत्वाऽभूच्च कुबेरदत्त उदितस्तुर्ये सुपर्वाऽग्रणीः ।
पश्चाद्भूपतिवज्रकुण्डल इति श्रीब्रह्मकल्पे मरुद्
वर्माह्वक्षितिपः सुधाऽशनवरः श्रीसुव्रतः पातु वः ॥ २१

कौशाम्बीललनाऽऽस्यमण्डनमलं कारुण्यपाथोनिधिः
सिद्धार्थक्षितिभुक् सुपर्वमुकुटः श्रीप्राणते प्रीतिभाक् ।
वप्राकुक्षिसरोमरालविलसल्लीलायितं योऽधर-
द्भूत्यै वो भगवाननङ्गरहितः श्रीतीर्थनाथो नमिः ॥ २२

जम्बूद्वीपगते पुरेऽचलपुरे श्रीमद्धनक्षोणिराट्
सौधर्मे त्रिदशोऽथ चित्रगतिकः खेटश्चतुर्थे मरुत् ।
भूनेता रणनिर्जरो नरवरः शङ्खश्च लेखस्ततः
प्रालेयाचलचन्द्रनिर्मलयशा नेमिर्मनोमोदकृत् ॥ २३

भूदेवो मरुभूतिकश्च करटी देवोऽष्टमे खेचरो
मर्त्यः क्षोणिपतिः सुरः समजनि श्रीसार्वभौमे महान् ।
अस्वप्नस्त्रिदिवे बभूव दशमे प्रोद्यत्प्रभापेशलः
श्रीपार्श्वो भुजगेन्द्रचर्चितपदः पुण्यानि पुष्णातु वः ॥ २४

ग्रामस्वाम्यमरो मरीचिरमृताहार: परिव्राजक:
षोढा चामृतभुग् भवोऽतिबहुल: श्रीविश्वभूतिर्मरुत् ।
विष्णुर्नैरयिको हरिश्च नरके भ्रान्तिर्भवान्तर्बहु-
श्चक्री नाकिवरोऽथ नन्दननृप: स्वर्गेऽवतात्त्रैशल: ॥ २५

इत्थं श्रीवृषभाङ्कचन्द्रजिनपश्रीशान्तिकूर्मध्वज-
श्रीकम्बुध्वजपार्श्ववीरविजयाजातप्रभृत्यर्हताम् ।
विश्वक्ष्मामुनिभानुनन्दनिधिदिग्द्वीपाक्षधूमध्वजा:
प्रौढप्रीतिमतां भवन्तु भवतां प्रोक्ता भवा: सिद्धये ॥ २६

वर्षे व्योममतङ्गजर्तुकुमिते राजादनीबन्दिरे
नाभेयादिजिना इति स्तुतिपथं नीताश्चतुर्विंशति: ।
प्राग्भारेण मुदो गुणादिविजये प्रोद्भूतसद्भावतो
देयासुर्विविधश्रिय: सुभगतामानन्दकन्दाम्बुदा: ॥ २७

पू. वाचकश्री वल्लभगणिप्रणीता

## ३६. ॥ श्रीमातृका-श्लोकमाला ॥

(चतुर्विंशतिजिनवर्णनो नाम प्रथम: परिच्छेद: ।)

श्रीशान्तिं प्रणिपत्य नित्यमनघं सन्नम्रकम्रामरा-
धीशाभ्यर्चितपूजनीयचरणाम्भोजं जनानन्दनम् ।
विद्वद्बुद्धिसरोजसूर्यसदृशीं श्रीश्लोकमालामहं,
वक्ष्ये काव्यकलाशुसिद्धय इमां श्रीमातृकाया: शुभम् ॥ १
(शार्दूलविक्रीडीतम्)

चतुर्विंशतिसार्वाणां प्रथमे ह्यत्राऽस्ति वर्णना ।
भिन्नभिन्नपदार्थानां परिच्छेदे द्वितीयके ॥ २

तद्यथा–

अनेकदेवासुरपूजनीया, अहर्निशं रान्तु सुखानि सार्वाः ।
अगण्यपुण्याम्बुधयः शरण्या,
अनिष्टदुष्कर्महरा वरेण्याः ॥ (उपेन्द्रवज्रा) ३

आतङ्कदोषक्षयकारिधर्मम्, आदीश्वरो यच्छतु मङ्गलानि ।
आश्चर्यकारी भविनां जिनेश, आभासिता येन महोदयश्रीः ॥४
(इन्द्रवज्रा)

इलातलख्यातयशा वरौजा, इतामयः श्रीअजिताह्वसार्वः ।
इतो भवात् पातु जगत्प्रतीत, इभाङ्कशाली गुणरत्नमाली ॥ ५
(उपेन्द्रवज्रा)

ईष्टे त्रिलोक्यां किल तीर्थराज, ईशो मुनीनां स हि शम्भवाख्यः।
ईर्ष्यालुतामुक्तविशुद्धचेता, ईड्यस्सतां वैरिगणस्य जेता ॥ ६
(इन्द्रवज्रा)

उदारतारञ्जितसाधुचेता, उपास्यतां भव्यजना जिनेशः ।
उपासना यस्य ददाति पद्मां, उपासकानामभिनन्दनाह्वः ? ॥७
(उपेन्द्रवज्रा)

ऊर्ज्जेन बुद्धेर्विदितप्रतिष्ठ–
ऊर्ज्जस्वि धीमत्प्रतिवादिगोष्ठ्याम् ।
ऊर्ध्वं गतं यद्यश एधते वै,
ऊर्ग्वान् क्रियाच्छं सुमतिर्जिनस्सः ॥ (इन्द्रवज्रा) ८

ऋद्धिप्रदाता सततं त्रिलोक्या, ऋध्यन्महासंयमरम्यलक्ष्म्या ।
ऋञ्जस्व पुण्यानि विशां वरश्रीः ऋश्येङ्ग पद्मप्रभतीर्थनाथ ॥९
(उपेन्द्रवज्रा)

ॠकारमन्त्रेण सुजप्त एष, ॠदायकः स्यान्नितरां जनानाम् ।
ॠभूत्करैरर्क्कितपादपद्म, ॠतामृतश्रीश्च सुपार्श्वसार्वः ॥ १०
(इन्द्रवज्रा)

लृतकनतजनानां मङ्गलानि प्रदेयाः
लृफिडकपटहारी सार्वचन्द्रप्रभ त्वम् ।
लृतनययतिराज्या गीतविख्यातकीर्त्ति-
र्लृरिव विशदतेजाः केवलज्ञानभास्वान् ॥ (मालिनी) ११

ॡभ्विन्द्रभूमीन्द्रकृतोपचर्य, ॡकारमन्त्रोपमनामधेयः ।
ॡलोकचक्रस्य ददातु बुद्धी-
र्ॡजातसेव्यः सुविधिः स्वयम्भूः ॥ (इन्द्रवज्रा) १२

एधित्वगम्भीर उदारचेता, एनांसि नाशं नयतान्मुनीनाम् ।
एषोऽब्जसौम्याननशीतलेश, एकाग्रसद्ध्यानमना जिनेशः ॥१३
(इन्द्रवज्रा)

ऐश्वर्यवृद्ध्यै भवताद्धतांहा, ऐरावताङ्गोपमवर्ण्यवर्णः ।
ऐन्द्रीं श्रियं योऽनुचकार सद्य,
ऐश्यश्रियैकादशतीर्थपः सः ॥ (इन्द्रवज्रा) १४

ओघं मघानां विदधातु देवा ओजोयुता यस्य यशः स्तुवन्ति ।
ओकः कलानां च लसद्गुणाल्या,
ओर्ज्जाप्रदः श्रीजिनवासुपूज्यः ॥ (इन्द्रवज्रा) १५

औदार्यगाम्भीर्यगुणैर्गरिष्ठः, औन्नत्ययुक्तो विमलः स सार्वः ।
औद्धत्यहृद् रातु सुखं त्रिलोक्या
औचित्यमर्च्चां धरतीह यस्य ॥ (इन्द्रवज्रा) १६

अंतकनाशक चञ्चुरचेता, अञ्चति ना तव यश्चरणौ वै ।
अंकत आशु सुखानि गतागा,
अंयुगऽनन्त ! जगद्धितकारिन् ! ॥ (दोधक) १७

अःसम कामहतौ विहतैना अःस्थितमानस नाशय दुःखम् ।
अस्त कुवादिमतप्रतिमौजा अस्तुलभायुत तीर्थपधर्मः ॥ १८
(दोधक)

कनककान्तिसमानशरीररुक्, कलुषमेष निरस्यतु मामकम् ।
करणवारणवारणसद्धरिः कलगुणः किल शान्तिजिनेश्वरः ॥१९
(द्रु.वि.)

खनतु पापखनिं करुणानिधिः, खलकलाम्बुजनाशनचन्द्रमाः ।
खरतरा अथ कुन्थुजिनेश्वरः खचरनिर्ज्जरकिन्नरसंस्तुतः ॥२०
(द्रु.वि.)

गगनमणिरिवेदं ज्ञानमाविष्करोति,
गणधरवरराजो वस्तुजातं हि यस्य ।
गज इव तरुवृन्दं नाशयैनो मदीयं,
गतिजितकरिराजोऽराऽऽप्त स त्वं प्रसद्य ॥ (मालिनी) २१

घोरचोररिपुभीतिविनाशी, घट्टितामृतरसः शुभदायी ।
घट्टयाश्वनिशमिष्टसमृद्धिं, घर्षिताऽकुशल मल्लिजिन ! त्वम् ॥२२
(स्वागता)

ङक्षरवक्रकुकर्मविनाशिन् !, ङचयमाशु विधेहि विधातः ।
ङगत सुव्रततीर्थप ! नित्यं
ङमदरोगसुखेतरहारिन् ! ॥ (दोधक) २३

चक्र्कर्तु भर्ता वरमुक्तिलक्ष्म्या श्चञ्चच्छुभं भक्तजनस्य नित्यम् ।
चन्ददूगुणो यो नमिनाथसार्व-
श्चन्द्रोपमक्षान्तिरसाम्बुधिस्सः ॥ (इन्द्रवज्रा) २४

छिन्नच्छलो नेमिजिनेश्वरस्सः, छिन्द्यात्तमां कर्ममलानि सद्यः ।
छेकाललोकाः स्तवनं यदीयं,
छिन्दन्त एनो रचयन्ति दिष्ट्या ॥ (इन्द्रवज्रा) २५

जयतु पार्श्वजिनस्स विधीयते, जनतया नतया च यदर्च्चनम् ।
जलदकान्तिसमानशरीररुग्,
जगति दीप्तयशा जयवानहो ! ॥ (द्रुत.वि.) २६

झषध्वजस्थाममहीध्रवज्रो, झरां नयत्वाऽऽश्वऽशुभानि मेऽद्य ।
झट्यन्त एनांसि च यत्प्रसत्त्या,
झगित्यथो वीरजिनेश्वरस्सः ॥ (उपजाति) २७

इति श्रीमातृकाश्लोकमालायां चतुर्विंशतिजिनवर्णनो नाम प्रथमः परिच्छेदः ॥

अथ भिन्नभिन्नपदार्थवर्णनो नाम द्वितीयः परिच्छेदः

ञमाप्रदः पातु भवाज्जनानां, ञमन्त्रजप्तो हितकारकश्च ।
ञउत्तरश्रीश्च नरायणस्स, ञतुल्यभालः कमलाभनेत्रः ॥ १
(उपेन्द्रवज्रा)

टङ्कोपमो व्याजदृषद्विनाशे, टङ्कोज्झितः शर्म्मयुतो महेशः ।
टङ्गायुधेनाऽऽह तदानव त्वं,
टङ्क्या जनानां दुरितानि शीघ्रम् ॥ (इन्द्रवज्रा) २

ठत्वं विधाता मम सेवकस्य, ठग्यात्तमामक्षरमन्त्रकर्त्ता ।
ठेत्यक्षरं यो वलयेति नाम्ना, ठादेषु मन्त्रेषु समाचचक्षे ॥ ३
(इन्द्रवज्रा)

डिण्डीरपिण्डसमपाण्डुरशीलसेवी,
डीनाऽमलाऽनल्पसुकल्पकल्पः ।
डिम्बं सुराणां शिखिवाहनोऽसौ,
डिम्भ्यात्तरामाऽऽहतदानवोघः ॥ (व.ति.) ४

ढक्कादिवाद्यानि च यत्पुरस्तात्, ढौकन्त ऋद्धा मनुजाः स्मरन्तः।
ढुंढी सुदेवी प्रददातु बुद्धी-ढौक्या नितान्तं बुधलोकचक्रैः ॥५
(इन्द्रवज्रा)

णकारमन्त्राक्षरजप्तनामा, णमानवव्राजसभाजिताङ्घ्रिः ।
णमां प्रदद्यात् सकलां गणेशो, णदायकः शान्तिविधायकश्च ॥६
(उपेन्द्रवज्रा)

ततसुदीधितिराऽऽशु तमस्ततिं, तरणिरेष विनाशयतु प्रगे ।
तरुणसत्किरणैररुणैररं, तमसनाशकरः कृतपद्ममुत् ॥ ७
(द्रु.वि.)

थं देहि सद्यो लसदुत्पलानां, थट्टैः कलानां कलितो दिनेशात् ।
थे चोदयस्योदिततः सुकान्ते !,
थोरोहिणीनायक चन्द्रमस्त्वम् ॥ (इन्द्रवज्रा) ८

दिक्पालमुख्यो दयितो जनानां, दक्षक्षमानाथमनःप्रमोदी ।
दिष्टिं विशिष्टां हि सुभिक्षकारी,
दद्यात्तमां सोमसुदैवतोऽसौ ॥ (इन्द्रवज्रा) ९

धनपतिः सुरनायकसेवको, धवलरूप्यमहीध्रकृताश्रयः ।
धनद एव समृद्धिविधायको,
धरतु शर्म्म च यच्छतु सुश्रियम् ॥ (द्रु.वि.) १०

नलिनमोहनशोभनलोचनो, नरवरार्चितपश्चिमदिक्पतिः ।
नयतु भद्रशतान्यमिताग्न्यऽसौ, नयमयोर्णवमन्दिरऋद्धिदः ॥११
(द्रु.वि.)

परमपुण्यपवित्रविचित्ररुक्, पटुगुणः प्रवणः करुणाविधौ ।
पविपतिस्त्रिदशाननिशं नतान्, पदमसौ प्रददातु पुरन्दरः ॥१२
(द्रु.वि.)

फटपदिष्ठवराङ्गवराङ्गरुक्, फणिपतिर्धरणीं धरतात्तराम् ।
फणितकिल्बिषकिल्बिषकल्मषः,
फलितपेशलकोमललोचनः ॥ (द्रु.वि.) १३

बहुलपुष्कलमङ्गलमण्डलीं, बलवतां बलतां परमेश्वरः ।
बत सतां यतिनां नमतां सदा,
बहुकलाकलितः कुशलाशयः ॥ (द्रु.वि.) १४

भगवतोऽभ्युपपत्तिवशाच्छुभं, भवतु पुण्यवतः परमात्मनः ।
भवत एधित विश्वलसद्यशो,
भयभरोज्झित भूमिपते ! प्रभो ! ॥ (द्रु.वि.) १५

मुनिपतिर्नयवान्नयतादसौ, मतशुभानि शुभानि जनस्य वै ।
मनुजपूजितसच्चरणाम्बुजो, मथितमन्मथदुस्सहदर्परुक् ॥ १६
(द्रु.वि.)

यमो हि दिक्पालवरो विभाति, यथार्हदण्डं प्रददान एषः ।
यथा पतिः पूर्वदिशः सुरेन्द्रो,
यशोयुगीशश्च तथा ह्यपाच्याः ॥ (उपेन्द्रवज्रा) १७

रामो नृपेन्द्रः प्रणताङ्गभाजां, रम्यां रमां रातु मनः प्रसन्नः ।
राजव्रजैस्सेवित एधितद्र्धी, रत्नाकरः सद्गुणरत्नराज्याः ॥१८
(इन्द्रवज्रा)

लुलितमिलितपृथ्वीपालभालाभिसेव्यो,
ललितचतुरराज्या रञ्जितः स्पष्टवाग्भिः ।
लसितसितगुणौघो लक्ष्मणाख्यः कुमारो,
लयनयचययुक्तस्तुष्टिपुष्ट्यै समस्तु ॥ (मालिनी) १९

वनमिदं प्रतिभाति महत्तरं, वरफलालियुतैस्तरुभिः शुभम् ।
विजितनन्दननन्दनसत्प्रभं, विविधपक्षिमधुव्रतसेवितम् ॥ २०
(द्रु.वि.)

शमयतु जनतायाः पातकानां प्रतानं,
शमरसऋतियुक्तैर्योगिभिः सेवनीयः ।
शमनशमनकामोत्तुङ्गमातङ्गसिंहः,
शिशिरकिरणचञ्चच्छुक्लिमा नष्टकष्टः ॥ (मालिनी) २१

षण्ढत्ववल्लीपरशुः सुधर्मः, षड्वर्गसंसर्गवियुक्त एषः ।
षण्डालिका सङ्गमदोषवादी, षिड्गेतरै राजति पुम्भिरर्च्यः ॥२२
(इन्द्रवज्रा)

समुद्र एष प्रतिभाति नित्यं, सरित्स्फुरन्नीरसुसङ्गमाढ्यः ।
सदा निशानाथसुवृद्धवेलः सतां जनानां स्तवनीय इष्टः ॥२३
(उपेन्द्रवज्रा)

हतकुतीर्थिमतं भगवन्मतं, हरतु दुर्गतिपातकपातकम् ।
हरिहरादिसुरैरजितप्रभं, हसितचन्द्रसुचन्द्रगुणैर्युतम् ॥ २४
(द्रु.वि.)

ळख्यात कीर्त्तिर्गुरुरेष जीया-
ळब्धप्रतिष्ठः प्रतिवादिगोष्ठ्याम् ।

ज्ञानाथ शौक्ल्योपम यत्प्रसादा-
ल्लष्टप्रतिज्ञो भवतीह मूर्खः ॥ (इन्द्रवज्रा) २५

क्षेमङ्करैस्तीर्थकरैर्य उक्तः, क्षामः कुतीर्थ्यालुदितैः कलङ्कैः ।
क्षिप्यात्तमामागम एष पापं, क्षेत्रं गुणानामथ चिन्मयस्सः ॥२६
(इन्द्रवज्रा)

इति श्रीमातृकाश्लोकमालायां भिन्नभिन्नपदार्थवर्णनो नाम
द्वितीयः परिच्छेदः ।

## ( प्रशस्तिः )

श्रीमद्विक्रमनगरे प्रवरे द्रव्याढ्यसभ्यजनवृन्दैः ।
इषुशरषोडशसङ्ख्ये (१६५५) वर्षे मासे च चैत्राख्ये ॥ १

येषां प्रथते पृथिव्यां कीर्त्तिः कर्पूरपूरसङ्काशा ।
पाठकमुख्या नन्द्युर्ज्ञानविमलपाठकाधीशाः ॥ २

शिष्येण निर्म्ममे येषां मातृकाश्लोकमालिका ।
वाचकश्रीवल्लभाह्वेनाऽऽत्मीयज्ञानस्य वृद्धये ॥ ३

यं वर्णं यश्च बुधः कथयत्यादौ विधाय तं विद्वान् ।
कुर्यात् सद्यः पद्यं चतुर्षु पादेषु निश्शङ्कः ॥ ४

यस्यैषा याति मुखे सुखेन लभतां स सत्वरं सभ्यः ।
विद्वज्जनेषु विद्वान् सौभाग्यौघं कवित्वञ्च ॥ ५

यस्मिन् काव्येऽस्ति यन्नाम व्यत्ययात्तस्य सत्वरम् ।
यथोक्तवर्ण्यस्य सद्व्याख्या तदा ज्ञायेत भो बुधाः ॥ ६

इति श्रीमातृकाश्लोकमालाप्रशस्तिः समाप्ता ॥

पू.पं. श्री शान्तिसुन्दरगणिविरचितः

# ३७. ॥ श्रीचतुर्विंशतिजिनस्तुतिः ॥

(वंशस्थ)

स मङ्गलान्यातनुतां सुमङ्गला-पतिः सतामिन्द्रनरेन्द्रसेवितः ।
यदंसपीठे चिकुरावली बभौ,
सुमेरुशृङ्गे किल कल्पमण्डली ॥ १

अनन्तकालादपि भाववैरिणो, जनान् घ्नतो वीक्ष्य दयार्द्रमानसः।
इभं समारुह्य किलाङ्कदम्भतो,
जघान यः स्तादजितः स वः श्रिये ॥ २

ऋभुप्रभुभक्तिभरेण भूरिणा, भजन् पदौ यस्य विभाविभासुरौ ।
बभार खद्योततुलां दिवाऽप्यहो,
स शंभवो वो भवताद् विभूतये ॥ ३

जनुर्महे यस्य सुमेरुभूभृतः, प्रमोदभाजः शुचिमज्जनाम्बुभिः ।
सुराः स्फुरन्तः पुलका इवाऽऽबभुः,
शिवश्रिये स्तादभिनन्दनः स वः ॥ ४

नमन्नरेन्द्रामरराजशेखर-स्फुरन्मणिश्रेणिमरीचिवीचिभिः ।
अहर्निशं क्षालितपादयामलः,
शुभां मतिं श्रीसुमतिस्तनोतु वः ॥ ५

प्रवालशोणच्छविकायकान्तिभि-
र्दिशो दशाऽपि प्रतिपूरयन् बुधैः ।
अलक्षि साक्षादिव यः सरागतां,
बहिः क्षिपन् श्रीधरभूः स शर्मणे ॥ ६

विजित्य पञ्चेन्द्रियगोचरोरगान्, स्वसेवकीभावमचीकरत्तराम् ।
य उच्चचञ्चत्फणपञ्चकच्छलात्,
सुपार्श्वनेता स शिवङ्करोऽस्तु वः ॥ ७

अजीहिठच्चन्द्रमरीचिसञ्चयं, य आत्मभासां पटलैः प्रसृत्वरैः ।
सदा सदालोकपदप्रसादतः,
शशाङ्कलक्ष्मा स जिनो धिनोतु वः ॥ ८

अवेक्ष्य यस्याऽङ्गरुचः सुधोज्ज्वला-
श्चिरं विचारं चतुरा इति श्रिताः ।
अनन्तविज्ञानविधोः परिस्फुटाः,
प्रभाः किमेताः सुविधिः स वो मुदे ॥ ९

महीतले यं विहरन्तमन्वहं, नमोचरीकारिषुरंह्रिपा अपि ।
विहातुमेकेन्द्रियतामिवाऽऽत्मनो,
ददातु वः शाश्वतशं स शीतलः ॥ १०

विनम्रवृन्दारकमानवप्रभू-तमाङ्गसंलालितमालतीस्त्रजः ।
अबूभुषन् यत्पदपीठमुच्चकैः,
स विष्णुसूनुर्जिनराट् शिवाय वः ॥ ११

निरस्तनिःशेषमलात्मकत्वतः
किलाऽङ्गिनां भक्त्यनुरागसङ्क्रमैः ।
बभार यो विद्रुमकान्तिसोदरं,
वपुः स जीयाद् वसुपूज्यनन्दनः ॥ १२

समीहितं यत्र ददत्यनारतं, सुरद्रुवद्दानमृणध्वनिर्गतः ।
अनाथतां वाच्यमृते जगत्त्रये,
स वो वितन्याद् विमलो मलोज्झितान् ॥ १३

अनन्तनेता स शिवाय देहिना-मनन्तधर्मात्मकवस्तुदेशकः ।
वशीकृतानन्तचतुष्टयान्वितो,
निरास योऽनन्तसुतोर्जितं क्षणात् ॥ १४

य आदिशद्धर्ममधर्मभिच्चतु-र्विधं परब्रह्मवशत्वकार्मणम् ।
स कर्मनिर्मन्थकधर्मतीर्थकृद्
विनिर्मिमीतां शिवशर्म देहिनाम् ॥ १५

मृगोऽपि यत्पादयुगस्य सेवनं, वितन्तनद्धर्मवतां धुरि स्थितः ।
अवापिवान् श्रीभृतराजमण्डलं,
स आचिरेयोऽद्भुतभूतयेऽस्तु वः ॥ १६

य उद्भटाभोगवतीः सभूषणा, मुमोच षट्खण्डभुवो वधूरिव ।
स कुन्थुतीर्थाधिपतिः पवित्रये-
ज्जगत्त्रयं त्रासितभावशात्रवः ॥ १७

तृणाय मत्वा ननु चक्रवर्त्तिनः, श्रियं शिवश्रीपुरतो य आददे ।
महातपस्यां तदवाप्तये स वो,
व्यपाकरोत्वारमरो जिनाधिपः ॥ १८

अचीकरद् यो निजपादसेवनं, जवान्नृदेवासुरराजराजिभिः ।
तमप्यजैषीन्मदनं य आदरात्,
स मल्लिनाथः प्रथयेत् सुखानि वः ॥ १९

जडप्रियः क्षुद्रतया समाश्रितो-ऽप्युपक्रमं यस्य निषेव्य कूर्मकः।
क्षमोऽभवन् क्ष्मामपि धर्तुमुच्चकैः,
स सुव्रतोऽर्हन् व्रतसम्पदेऽस्तु वः ॥ २०

अनीनमद् यो द्विषतो महीभुजो, भुजालवद् गर्भगतोऽपि हि प्रभुः।
नमिर्जिनेन्द्रो जगतामुपद्रवान्,
द्रुतं स विद्रावयताज्जितेन्द्रियः ॥ २१

कुमारतां यः कलयन्नपि स्वयं, कुमारभावं निरमूलयत्तराम् ।
अरिष्टनेमिर्भगवान् स देहिनां, पिनष्टु कष्टानि वरिष्ठचेष्टितः ॥२२

अलूलुठद् यः कमठं शठाशयं,
स्मयाचलात् तुङ्गतरादपि क्षणात् ।
जिनोऽश्वसेनाङ्गभवो भवक्षयं, क्षमावतामातनुतांतरामयम् ॥२३

सुराङ्गनानां वदनेषु कुङ्कुमा-वलेपलीलां कलयन्त्य उच्चकैः ।
प्रभा जयन्तु त्रिशलाङ्गजन्मनो,
द्विधाऽपि धर्मं प्रकटीचरीक्रतः ॥ २४

विधाय येषां स्मरणं शरीरिणो,
ययुः प्रयास्यन्त्यपि यान्ति निर्वृतिम् ।
जगन्ति नामाकृतिमुख्यभेदत-
श्चतुर्विधास्तीर्थकृतः पुनन्तु ते ॥ २५

अधिष्ठिता हंसवरं तनोति या, विलासमन्तःसविशुद्धमानसम् ।
सरस्वती सा परमेष्ठिसम्भवा,
पराञ्चितं सञ्चिनुतां सतां तताम् ॥ २६

पू.मु.श्री धर्मवर्द्धनगणि विरचितम्

## ३८. ॥ श्रीचतुर्विंशतिजिनस्तवनम् ॥

स्वस्तिश्रिये श्रीऋषभादिदेवं, निर्दम्भदेवं जिनदेवदेवम्,
चारुप्रकाशं किल मारुदेवं, स्तौमीह सम्पत्तिलतैकदेवम् ॥ १
(इन्द्रवज्रा)

अमरासुर पुंस्पशुपक्षिकृत–मदवारनिवारक ईश जितः ।
भवता मदनोऽपि मदौघयुतः प्रवदन्ति बुधा अजितं हि ततः॥२
(तोटक)

लसद्यशः पूरितसद्दिशं भवंत एतमर्च्चन्तु जनाश्च शंभवम् ।
जिनं सदिक्ष्वाकु कुलाब्जसंभवं, स्फुरत्तपोधाम वितीर्णसम्भवम्॥३
(वंशस्थं)

जिनमहं प्रणमाम्यभिनन्दनं,
सुभगसंवरभूपतिनन्दनम् ।
सकलसद्गुणपादपनन्दनं,
जिनवरं जनलोचननन्दनम् ॥ (द्रुतविलम्बित) ४

त्रिजगत्पतिरेषजिनः सुमति–
र्वितनोतु मतिं किल मे सुमतिः ।
शुभबोधपयोधिरनेकनुतिः,
क्रमणद्युतिरञ्जितदेवपतिः ॥ (तोटकं) ५

पद्मप्रभोऽर्हन् वरपद्मलोचनः,
पद्माननश्चाश्रितपद्मलाञ्छनः ।

सच्चित्तपद्मामलपद्मलाञ्छनः,
पद्माकरः स्याच्छिवपद्मलाञ्छनः ॥ (इन्द्रवंशा) ६

भजन्तां प्रभुं चित्प्रदं श्रीसुपार्श्वं,
भवन्तो नरा नूनमानन्दपार्श्वम् ।
जिनं तप्तहेमस्फुरत्कान्तिपार्श्वं,
सतां सातदं दम्भवल्ल्यग्रपार्श्वम् ॥ (भुजङ्गप्रयात) ७

चन्द्रप्रभं जिन वदन्ति यके मनुष्या-
स्त्वां सेवकेन्दुसदृशीकरणान्न दक्षाः
भो चन्द्रसेवितपदाब्ज परम्मयोक्तः,
स्वामिन्वत स्तवभकार-उकारयुक्तः ॥ (वसन्ततिलका) ८

विबुधा प्रणुवन्ति जिनं सुविधिं,
विविधप्रकटीकृतधर्मविधिम् ।
शिवमार्गविधानत एव विधिं,
गुणनीरनिधिं शिवदायिविधिम् ॥ (तोटकं) ९

विभुं भजस्व शीतलं, सदृक्षशस्त्रशीतलम् ?
दराग्निवारिशीतलं, जिनं विभिन्नशीतलम् ॥(प्रमाणिका) १०

अर्हन्तं मूर्ध्ना श्रेयांसं, वन्देऽहं देवश्रेयांसम् ।
श्रेयः सत्कासारे हंसं, हिंसैनोध्वान्तौघे हंसम् ॥(विद्युन्माला)११

त्वां प्राप्य सर्वभुवनत्रयवासिपूज्य-
मन्यान् क इच्छति सुराञ्जिन ! वासुपूज्य ! ।
किं कोऽपि कल्पतरुमीहितदं विहाय,
ह्युच्छूलपर्णिन इहेसति सत्सुखाय ? ॥ (वसन्ततिलका) १२

विमलनाथमशेषगुणाकरं, विमलकीर्तिधरं च भजेवरम् ।
विमलचन्द्रमुखं जिननायकं, विजयहर्षयशःसुखदायकम् ॥१३
(द्रुतविलम्बित)

कीदृक्संसार एषः प्रमितिकृतितया कीदृशः सिद्धिजीवः,
कीदृक्षो राजशब्दः सुरनरनिचये जिष्णुनामाऽपि कीदृक्
बाह्यार्थो वर्णबंधाद्विधिहरिगिरीशप्रस्तुतश्चारुधर्मा
धर्माद्यः सर्वदर्शी स हि विशदगुणःपातु चातुर्दशो वः ॥ १४
(स्रग्धरा)

यः सर्वेषाममित सुखदो यं सदेच्छन्ति सर्वे,
तुल्यं येनान्यदिह न हि च प्राणिनां यः पितेव ।
तस्यापि स्वाम्यसि जिनपते ! धर्मनाथाभिधाना-,
न्मन्ये तेनाहमिति हि भवच्छद्दृशो नास्ति कोऽपि ॥ १५
(मन्दाक्रान्ताः)

शान्तिः शान्तिमनाः स नाहितकरः सेवन्ति शान्तिं बुधा-
स्तायन्ते मम शान्तिना सुमतयस्तस्मै नमः शान्तये ।
शान्तेः कान्तिधरो परो न हि सुरः शान्तेरहं सेवकः
शान्तौ तिष्ठति मन्मनश्च सततं शान्ते ! सुसातं कुरु ॥ १६
(शार्दूलविक्रीडितं)

चिन्मयं मद्रदं कुंथुतीर्थङ्करं विश्वविश्वेशमीडे मुदा शङ्करम् ।
दुष्टकर्मौघघूकाम्बकाहस्करं, पुण्यकृत्पुण्यसद्रत्न-रत्नाकरम् ॥१७
(स्रग्विणी)

नाम्नीह यद्यरजिनस्य सदा श्रुते च,
नश्यन्ति लध्वरिजना हि किमत्र चित्रम् ।
आकर्णिते बत निनादभरे मृगारे-
स्तिष्ठन्ति किं मृगगणा बलिनोऽपि बाढ़म् ॥ १९
(वसन्ततिलका)

द्विजपतिदलभालं मल्लिनाथं सुभालं
प्रहतविषयजालं छिन्नदुःखाब्जनालम् ।
अमितसुगुणशालं प्राप्तनिर्वाणशालं,
भविक-पिक-रसालं स्तौमि नित्यं त्रिकालम् ॥ १९
(मालिनी)

राकेन्दुकान्तिमुनिसुव्रत वै त्वदास्यं,
दृष्ट्वा हि दृग्विकचपद्ममनोहरं च ।
संभावयन्ति मनसीति शुभा मनुष्याः,
सद्राजतेऽब्जयुगलं विधुमध्यभागे ॥ (वसन्ततिलका) २०

नमत भव्यजनाः सततं नमिं, नमित निर्जरमद्भुतकामदम् ।
मदनपञ्जरभञ्जनद्विद्विजं, द्विजपतिप्रवराननमीश्वरम् ॥ २१
(द्रुतविलम्बित)

यस्त्वं नित्यं किल रमयसे मुक्तिसीमन्तिनीञ्च,
तस्याः सङ्गं क्षणमपि समुन्मुञ्चसि त्वं न नेमे ! ।
सत्त्वं सर्वैः सुरनृभुजगैः कथ्यसे योगिनाथ-
स्तेषां वाक्यं बत जिन ! कथं त्वां च संजाघटीति॥(मन्दाक्रान्ता)२२

वामापुत्रं तेजोमित्रं दुःखौघागे मातङ्गं,
सच्छ्रीकोषं चेतस्तोषं शोभावल्ली सारङ्गम् ।

दत्तानन्दं विद्यावृन्दं प्राण्याशायां कल्पागं,
नित्योत्साहं वन्दे चाहं श्रीपार्श्वेशं पुण्यागम् ॥(कामक्रीडा) २३

प्रवादिसर्वगर्वपर्वप्रभङ्ग भूरिरुट्,
सुपर्वनाथ हैतिमीतिभीतिवार-वारकम् ।
जिनेश-वर्द्धमान वर्द्धमान शासनं वरं,
नमामि मामकीनमानसांबुजन्मषट्पदम् ॥ (पञ्चचामर)२४

इत्थं संवदुरोजदृष्टिनगभूसंज्ञे च दीपालिका-
घस्त्रे गुम्फित एष सातभरदस्तीर्थङ्कराणां स्तवः ।
सद्विद्याविजयादिहर्षकमलाकल्याण शोभाभरं,
तन्याद्वो बहुधर्मवर्द्धनवतां सन्मानसानां सदा ॥ (शा.वि.)२५
(कलशः)

पं.श्री हर्षवर्द्धनगणिविरचितम्

## ३९. ॥ श्रीसर्वजिनविशेषनामाविशेषित-स्वेच्छाचिन्तितजिनस्तवनम् ॥

श्रीनाभिजात ! सुमते ! जिनसम्भवेश !,
श्रेयाननन्तगुणराजित ! वासुपूज्य !
सम्मोहकृल्लवणिमास्पदसत्कुरङ्गः -
नेत्राजिताऽर ! सुविधे ! वरधर्मनाथ ! ॥ १

शान्तेहितावलिकरोत्तरचित्समुद्र-
चन्द्रप्रभ ! प्रविलसद्वचनामृतौघः ।
सादृश्यतः समवितेभ-पतङ्ग-कुन्थो !,
साम्यामृतस्नपनशीतल ! सुव्रतेश ॥ २

विघ्नावलीवनविखण्डनपार्श्व ! नेत-
र्दुवारभावरिपुदारणचक्रनेमे ! ।
श्रीवर्द्धमान ! सुरसेव्यसुपार्श्व !,
विश्वा-लोकाभिनन्दन ! नतामरनाथसार्थ ! ॥ ३

विस्फारिभा विमलमञ्जुलसौरभश्री-
मल्ले ! ऽनमेर ! तरसाऽखिलदोषमुक्त ! ।
लोकोत्तरप्रवरभाग्यरमानिवासा (स) -
पद्मप्रभ ! प्रकुरुतात् (च्छि) शिवशर्म मे त्वम् ॥ (च.क.) ४

एवं समग्रजिननामविशेषितश्री-
स्तीर्थङ्करप्रकर एकतरोऽथवाऽस्मिन् ।
श्रीसोमसुन्दर ! उदारगुणो विधेया-
दानन्दमेदुरमहोदयसम्पदं मे ॥ ५

पू.पण्डितश्री हर्षकल्लोलगणिरचितम्

## ४०. ॥ श्रीत्रिंशत्तीर्थङ्करस्तोत्रम् ॥

सुदर्शननराधीश-वंशमाणिक्यसंनिभम् ।
श्रीअरं सर्वकल्याण-कारणं संस्तुमो जिनम् ॥ १

गङ्गापानीयशुद्धान्तः-करणं करुणालयम् ।
श्रीमद्गाङ्गिकतीर्थेशं नमत प्रभुतापदम् ॥ २

धर्मोपदेशनिष्णातं तन्द्रातिमिरभास्करम् ।
......................श्री अयोगं सदा स्तुवे ॥ ३

विश्वत्रयीजनाम्भोज-प्रकाशननभोमणिम् ।
प्रासादनाथतीर्थेशं नमामि गुणसागरम् ॥ ४

केवलज्ञानसल्लक्ष्मी-निकेतनं गतस्पृहम् ।
सेवे सर्वश्रियो वासं मलसिंहं जिनेश्वरम् ॥ ५

मुक्तिपुर्या महासार्थं सर्वार्थसाधने परम् ।
अतिपार्श्वं जिनाधीशं मथितानर्थमानम् ॥ ६

व्यवायवल्लिसङ्घात-च्छेदने घनसोदरम् ।
विवेकनाथमस्ताघं श्रये सौख्यावहं मुदा ॥ ७

निन्दानिदानरहितं नरमहितं नन्दकेशसर्वज्ञम् ।
निर्जितमोहकरेणुं निर्भयमिह नौम्यनन्तगुणम् ॥ ८

तमस्तोमजगच्चक्षुः सोदरं परमोदरम् ।
क्षेमन्तनाथमक्षेम-सरःशोषे रविं स्तुवे ॥ ९

कामनाकामकुम्भाभं कामनामविनाशकम् ।
कामनाथं जिनवृत्त-श्रीयुतं स्तौमि भक्तितः ॥ १०

त्रिंशत्(द्)धनुस्तनुमानं मानमायाजयक्षमम् ।
क्षमागुणमणीसिन्धुं श्रीमल्लिं स्तुतितां नये ॥ ११

देवीकुक्षिसरोरत्ना-करणीरमणीयकः ।
भवतो भवतः पातु श्रीमल्लिः परमेश्वरः ॥ १२

कल्याणकत्रयं यस्यै कादश्यां च तमोऽपहम् ।
प्राणिनां सुखदं जज्ञे स श्रीमल्लिर्जिनः श्रिये ॥ १३

कलिन्दिकामणीमाला-कूलंकषापतिप्रभः ।
प्रभावकमलावासो गुणनाथो गुणाय मे ॥ १४

जितक्रोधमदोन्मत्त-मतङ्गजमहाबलः ।
बलबुद्धिरमागारो गुणनाथं (थो) श्रियेऽस्तु वः ॥ १५

कल्याणकत्रयं यस्यै-कादश्यां च तमोऽपहम् ।
प्राणिनां सुखदं जज्ञे गुणनाथः स बोधिदः ॥ १६

भयविध्वंसने दक्षो दक्षजारमणाननः ।
नवीननीतिकान्तार-घनो योगजिनोऽवतु ॥ १७

क्षमानायकसंसेव्य-पदद्वयसरोरुहः ।
तनोतु योगनाथोऽयं बोधिबीजं नताङ्गिनाम् ॥ १८

कल्याणकत्रयं यस्यै-कादश्यां च तमोऽपहम् ।
प्राणिनां सुखदं जज्ञे तं योगजिनपं नुवे ॥ १९

भवाम्भोधितरीतुल्य-स्तरुणारुणरुग्महः ।
महासत्त्वोदधिर्देव-विपरीतो विराजते ॥ २०

महोदययशःस्फूर्ति - शौर्यमुख्यगुणैर्युतः ।
विपरीतो जिनाधीशो देयान्मङ्गलमालिकाम् ॥ २१

कल्याणकत्रयं यस्यै-कादश्यां च तमोऽपहम् ।
प्राणिनां सुखदं जज्ञे विपरीतः श्रियेऽस्तु सः ॥ २२

हावभावप्रधानाभी(भि)-रक्षोभ्यं यस्य मानसम् ।
सुरीभिर्यस्य देवस्य सोऽक्षोभः सम्पदे जिनः ॥ २३

पद्माक्षीरोधने दक्षः कतकक्षोदसत्(द्)यशाः ।
दक्षयक्षेशसंसेव्यः श्रीअक्षोभो हरेदघम् ॥ २४

कल्याणकत्रयं यस्यै-कादश्यां च तमोऽपहम् ।
प्राणिनां सुखदं जज्ञे तमक्षोभं वयं स्तुमः ॥ २५

संसारमरुदेशान्तः पद्मकासारसंनिभः ।
मरुत्पतिस्तुतो देवो मरुदेवो ददाति शम् ॥ २६

भव्याङ्गिकामितार्थाली-विश्राणनमरुत्तरुः ।
मरुदेवः क्षमागारो बोधिदोऽस्तु भवे भवे ॥ २७

कल्याणकत्रयं यस्यै-कादश्यां च तमोऽपहम् ।
प्राणिनां सुखदं जज्ञे मरुदेवं नमामि तम् ॥ २८

शारदेन्दुकलाकान्त-तथ्यधर्मप्रकाशकः ।
धर्मचन्द्रजिनाधीशः कामिताय शरीरिणाम् ॥ २९

............पशमराजीव-वनबोधन........नः ।
वासं तनोतु मच्चित्ते धर्मचन्द्राभिधो जिनः ॥ ३०

कल्याणकत्रयं यस्यै- कादश्यां च तमोऽषहम् ।
प्राणिनां सुखदं जज्ञे श्रीधर्मं संस्तुवे मुदा ॥ ३१

सुरासुरहरैः सेव्य-पदपङ्कजयामलः ।
दुष्कर्मपङ्कराजीव-बोधनोऽस्तु श्रिये हरः ॥ ३२

योगक्षेमङ्करो देवः सेवाकारिपुरन्दरः ।
हरनाथजिनाधीशः पापं हरतु मामकम् ॥ ३३

कल्याणकत्रयं यस्यै - कादश्यां च तमोऽपहम् ।
प्राणिनां सुखदं जज्ञे स हरि(रः) पातु वो जिनः ॥ ३४

कन्दर्पमदपाथोज-सङ्कोचनकलाधरः ।
सायकाक्षजगन्नाथः श्रियं पुष्णातु वो मनः ॥ ३५

कन्दर्पमदपाथोज-सङ्कोचनकलाधरः .
सायकाक्षाभिधो देव-श्चितं प्रीणातु मेऽन्तरम् ॥ ३६

कल्याणकत्रयं यस्यै-कादश्यां च तमोऽपहम् ।
प्राणिनां सुखदं जज्ञे सायकाक्षः स नन्दतु ॥ ३७

सन्तोषकमलादित्यं सन्तोषितजगत्त्रयम् ।
बोधिरत्नप्रदानेन सन्तोषितं स्तुमो वयम् ॥ ३८

असन्तोषपयोराशि-सेतवे बोधिहेतवे ।
सन्तोषितजिनेशाय नमोऽस्तु मुक्तिकेतवे ॥ ३९

कल्याणकत्रयं यस्यै-कादश्यां च तमोऽपहम् ।
प्राणिनां सुखदं जज्ञे तं श्रीसन्तोषितं नुवे ॥ ४०

यस्मिन् गर्भस्थिते देवे शत्रवो मातरं नताः ।
नमामि तं नमिं नाथं भावावनाममानवम् ॥ ४१

परमब्रह्मकान्तार-स्फुरद्वारा(रां)धरोपमः ।
श्रीब्रह्मेन्द्रश्चिरं जीयात् हरिब्रह्महरस्तुतः ॥ ४२

भीतजन्तुभवारण्यो-त्तारणे तुरगोपमः ।
श्रीअरण्यजिनाधीशः शरण्याय भवेन्मम ॥ ४३

जन्तुजाततमःपूर-गोस्वामिसंनिभप्रभः ।
विश्वासभूर्भवात्पायात् स्वामिनाथो दयानिधिः ॥ ४४

चिन्तामणीव यन्नाम कामितानि प्रयच्छति ।
श्रीप्रयच्छजिनः स्वच्छा-तुच्छकीर्तिर्जयाय मे ॥ ४५

दुःकृ(दुष्कृ)तश्यामतामुक्तं वश्यामरनरेश्वरम् ।
अनन्तसंविदां कोष्ठं श्यामकोष्ठमभिष्टुमः ॥ ४६

अमन्दानन्दसन्दर्भ-दायिनं ताचिनं सताम् ।
नन्दिघोषं श्रिया युक्तं घनघोषं स्तुतिं नये ॥ ४७

शिवतातिर्मनस्तान्तिः प्रशान्तिकरणक्षमः ।
तन्तनीति सुशान्तीशः शान्तिं शान्तिनिशान्तकम् ॥ ४८

प्राणतप्राणिकल्याण–कन्दकन्दलनाम्बुदम् ।
वन्देऽहं श्रीतमोकन्दं लक्ष्मीकन्दं दयालयम् ॥ ४९

अक्षेमदावपानीयः क्षीणकर्मभरो जिनः ।
क्षेमन्तो भव्यजन्तूनां क्षेमं दि(वि)तनुते सदा ॥ ५०

सञ्जाता पञ्चकल्याणी यस्यां मङ्गलकारिणी ।
सैकादशी तिथिर्मौन–व्रतपौषधपोषिनी(णी) ॥ ५१

पञ्चाशज्जिननाथानां कल्याणकानि रेजिरे ।
यस्यां सैकादशी मार्ग–शीर्षजा सा श्रिये सिता ॥ ५२

एवं........गुरोर्लं........–श्रीहेमविमलप्रभोः ।
त्रिंशत्तीर्थाधिराज(जा)स्ते स्तुता नाम्ना मया जिनाः ॥ ५३

एवं नव्यनमस्कारा रचितागममण्डनाः .
त्रिंशत्तीर्थकरा मह्यं सृजन्तु सुखसम्पदः ॥ ५४

पू. वाचकवरश्री वच्छराजमुनिकृताः

## ४१. ॥ श्रीचतुर्विंशतिजिननमस्काराः ॥

(द्रुतविलम्बित)

वसुविरोकमनोरमसंवरं, प्रथमभूमिपतिं प्रथमं जिनम् ।
प्रथमसाधुमघौघनिवारकं, नमत तं भविनां शिवशर्मदम् ॥ १

द्विविधधर्मविबोधनकारकं,
सकलपेशललक्षणधारकम् ।
अजितमाचरणात्तमहोदयं, नमत तं भविनां शिवशर्मदम् ॥ २

समसुरासुरमानवपूजितं, समयविष्णुपदीहिमपर्वतम् ।
भविकपर्णिघनं जिनसंभवं, नमत तं भविनां शिवशर्मदम् ॥३

निखिलविश्वगजीवहितं प्रभुं, परगतिं त्वभिनन्दनमाश्रितम् ।
प्लवगसेवितपादसरोरुहं, नमत तं भविनां शिवशर्मदम् ॥ ४

सवननीरदगर्जितनिस्वन-वचनरञ्जितलेखनरेश्वरम् ।
सुमतिनाथममानरमास्पदं, नमत तं भविनां शिवशर्मदम् ॥ ५

धरनृपान्वयदेवमहीरुहं, भवनिबन्धनकर्मविमोचकम् ।
जलरुहाङ्कममायमलोभनं, नमत तं भविनां शिवशर्मदम् ॥ ६

मुखमहोजितपूर्णनिशाकरं, वरयशोधवलीकृतविष्टपम् ।
युगभुजं च सुपार्श्वजगत्प्रभुं, नमत तं भविनां शिवशर्मदम् ॥७

भवनदीनिपतज्जनतारकं, शमरसामृतलीनकनीनिकम् ।
विकटतापहरं च शशिप्रभं, नमत तं भविनां शिवशर्मदम् ॥८

सुजनमानसचारुसितच्छदं, प्रणतलोकमहोत्पलभास्करम् ।
सुविधिमभ्रमकेवलतान्वितं, नमत तं भविनां शिवशर्मदम् ॥९

शरधनञ्जयवाग्गुणसंयुतं, मदनवीरतरो रयनाशकम् ।
गदविवर्जितपुद्गलशीतलं नमत तं भविनां शिवशर्मदम् ॥१०

प्रथमवार्षिकदानमदात्ततः, शुभमहाव्रतभारमलाच्च यः ।
नृपतिविष्णुसुतः शिवमाययौ, नमत तं भविनां शिवशर्मदम्॥११

विकचकोकनदोत्तमभाननं, करतलोदकभावविकाशकम् ।
महिषलाञ्छनमीहितदायकं, नमत तं भविनां शिवशर्मदम् ॥१२

कुमुदबान्धवमण्डलवारिज,-सितगुणावलिराजितमादरात् ।
विमलबोधिदमाततशासनं, नमत तं भविनां शिवशर्मदम् ॥१३

परविवादिगजोरुमृगाधिपं, जनमनश्चलचञ्चुनिशाधिपम् ।
विभुमनन्तमनन्तसुखश्रियं, नमत तं भविनां शिवशर्मदम् ॥१४

वृषधुराधरणोद्धरधूर्वहं, वरगभीरगुणाधरितोदधिम् ।
गतमदं किल धर्मजिनेश्वरं, नमत तं भविनां शिवशर्मदम् ॥१५

मरककाननभेदनपार्श्वधं, लसदजन्यबलाहकमारुतम् ।
अभयदं जिनशांतिममत्सरं, नमत तं भविनां शिवशर्मदम् ॥१६

कुमतघूकतिरस्करणारुणं, सुकृतसिंधुविवर्धनभाधिपम् ।
गजगतिं खलु सूरनृपाङ्गजं, नमत तं भविनां शिवशर्मदम् ॥१७

दुरितसाध्वसशैलशिरोऽशनिं, विमलदर्शनदर्पणशोभिनम् ।
अमररागमदोषमनीहकं, नमत तं भविनां शिवशर्मदम् ॥ १८

छलफलं कटुकं त्वभिधाय यः, छलमलं समितौ खलु वर्ज्जयन् ।
जनगणैरिति मल्लिजिनोऽप्यभूत्, नमत तं भविनां शिवशर्मदम्॥ १९

विषयमुक्तमनोमुनिसंस्तुतं, शिवपदस्य हि दर्शितसत्पथम् ।
परमहर्षभृतं मुनिसुव्रतं नमत तं भविनां शिवशर्मदम् ॥ २०

विजितमोहविकारमनञ्जनं, नमिमनन्तपराक्रममुत्तमम् ।
प्रथमसंहननं जगदीश्वरं, नमत तं भविनां शिवशर्मदम् ॥ २१

शिवरमाहृदयामलभूषणं, नतसुगीतगुणं गतदूषणम् ।
दशधनुस्तनुमानमनाविलं, नमत तं भविनां शिवशर्मदम् ॥२२

भुवनबन्धुमनर्जुनभूघनं, जलजकोमलशोणकरक्रमम् ।
उदितपार्श्वमुदारमतिप्रदं नमत तं भविनां शिवशर्मदम् ॥ २३

शुभफलोदयदं महिमालयं, परविलासनिधिं प्रमदाश्रयम् ।
सुजननं सुविधिं त्रिशलात्मजं, नमत तं भविनां शिवशर्मदम्॥२४

सौभाग्योदयसंभृतास्त्रिभुवने ग्राह्याभिधानोत्तमा,
एवं राजधनाभिधे पुरवरे तीर्थाधिपाः संस्तुताः ।
प्रीत्यावासितवत्सराजमुनिना श्रेयोर्थिना भावतः,
पक्षाम्भोधिरसेंदुगे मुनिजगर्त्सिहोक्तितोऽब्दे शुभाः ॥ २५
(शार्दुलविक्रीडित)

पू.मु.श्री दीप्तिविजयप्रणीतम्

## ४२. ॥ श्रीचतुर्विंशतिजिनस्तोत्रम् ॥

(उपजाति)

श्रीशारदां सद्वरदां प्रणम्य, नत्वा गुरूणां चरणारविन्दम् ।
स्तवीमि नाभेयजिनेन्द्रमुख्यान्, संसारपाथोनिधिपोततुल्यान् ॥१

चेतो दृढं मेऽभिलषत्यजस्त्रं, त्वद्दर्शनं चन्द्रसुदर्शनीयम् ।
वरेण्यमर्हन्निव वाञ्छितार्थं, नाभेय ! नेतः ! कमनीयकान्ते ! ॥२

एषैकस्मिन् तव सुरुचिरा रूपलक्ष्मी(ः) त्वयीव,
पौलोमीशेषु न बहुषु सद्धाम ! मातङ्गलक्ष्म ! ।
चन्द्रे ज्योत्स्ना जगति हि यका चक्षुरानन्दकारी,
प्रोद्यज्ज्योतिर्जितखग ! न सा वर्तते तारकेषु ॥ (म.क्रा.) ३

श्रीसम्भवाप्तः सुखसम्भवः सः
शिवाय नित्यं जगतां त्रयाणाम् ।
यत्पादपद्मेऽङ्कमिषाद्धयेनो-द्यमः
कृतः त्यक्तुमिवाशु गौ(गो)त्वम् ॥ ४

सर्वज्ञनामस्मरणाज्जनानां,
प्रयान्ति मिथ्यात्वविषाणि नाशम् ।
शाखामृगाङ्काऽधिककायकान्ते,
मन्त्रात् पराज्जाङ्गुलिकादिवाऽहेः ॥ ५

सिंहासने हेममये स्थितः सन्, विभ्राजते श्रीसुमतिर्जिनेन्द्रः ।
शृङ्गे प्रबर्हे स्म यथोदयायो-दयाचलस्यागत उष्णरश्मिः ॥ ६

पद्मप्रभस्तीर्थकरः स भूयात्(द्)
मोक्षस्य सौख्याय सतां जनानाम् ।
सहस्रनेत्रोऽपि बभूव वज्री, द्रष्टुं क्षमो यस्य न रूपमाप्तम् ॥७

ध्यानं प्रति स्वान्तमलं त्वदीयं, संलीनतां यातितरां मदीयम् ।
सुपार्श्व ! सर्वज्ञ ! नतेन्द्रवृन्दाऽ-
यः प्रत्ययस्कान्त इव प्रकामम् ॥ ८

चन्द्रप्रभश्चन्द्रमरीचिवर्णः, चिरं स जीयाद् भुवि वर्णनीयः ।
प्रकामितं कल्पलतेव दत्ते, भव्याङ्गिनां यः प्रकटप्रभावः ॥ ९

ध्यानेन नश्यन्ति तमांसि नृणां,
कृतानि सम्यक् तनुवान(ङ्)मनोभिः ।
शम्भो ! तव श्रीसुविधीश ! लोक-
नाथोदयेनेव तमांसि भानोः ॥ १०

शुभ्रत्वमेव सुयशः प्रकटीकरोति,
येनेयी (यि)वान् सह विधुर्निबिडं सखी(खि)त्वम् ।
आह्लादकार्ययमतो भृशमेव मन्ये,
नेत्रेषु शीतलविभो ! जगतां कलङ्की ॥ (व.ति.) ११

पश्यामि पीयूषमयं भवन्त-
मेवं न चेत्(द्) मेऽम्बकयोः कथं स्यात् ।
सुधाञ्जनं शर्मकरं नितान्तं,
श्रेयांस ! दृष्टे त्वयि सर्वदर्शी(र्शिन् !) १२

विलोकय त्वं प्रिय-सौम्यदृष्ट्या,
कामं त्वदेकोच्चलवृत्तिमर्हन् ।
कृत्वेत्ययं चेतसि मामकीनः
स्वतर्णकं गौरिव वासुपूज्य ! ॥ १३

मयेहितं यन्मनसि प्रभो ! तत्,
त्वद्दर्शनाज्जातमतस्त्वमेव ।
कल्पद्रुमः कामघटश्च चिन्ता-
रत्नं जगत्यां विमलस्वयम्भूः ॥ १४

कर्मारयो येन हता(:) क्षणेन,
मदोद्धताती(स्ती)क्ष्णमुखैस्तपोस्त्रैः ।
मत्ता महान्तोऽपि कृतापकारा
अनन्तनाथः स सतां शिवाय ॥ १५

धर्मेन ! गम्भीरतया त्वयोच्चै-
र्निच्चै(र्नीचै)ष्कृतोऽपां पतिरेव शीघ्रम् ।
नश्यन्ति दृष्टे भवतः कषायाः
सूर्यप्रकाशादिव दुष्टचौराः ॥ (इ.व.) १६

शान्तिः स भव्यानवतान्निकृष्टात्,
पुत्रान् पिता स्वानिव चारुभक्त्या ।

गर्भस्थिते शान्तिरभूज्जगत्स्व-
तो शान्तिनामेति पिता विचक्रे (?) ॥ (इ.व.) १७

वप्रत्रयी सा शुशुभे ददौ सद्-
धर्मोपदेशं जिनकुन्थुराशु ।
यस्यां दधत्यां कुसुमानि देवैः
क्षिप्तानि जानुप्रमितानि चारु ॥ (इन्द्रवज्रा) १८

त्वमेक एव त्रिजगत्स्वरार्हन् ! (?)
कोऽप्यस्ति नाऽन्योऽद्भुतदृग् विना त्वाम् ।
सिंहो गुहायामिव चित्रभानु-रिवान्तरिक्षेऽसिरिवाऽग्रकोशे ॥१९

तत्ते यशो भाति भुवीति पिण्डी-
भूयाऽन्वहं यच्चरतीव भोः खे ।
मृगाङ्कदम्भाज्जनं(न) पावनार्थं,
मल्लीश ! निश्शङ्कतया सनाथम् ॥ २०

सुराङ्गनानां वचनानिलैस्ते, मनोलता सुव्रत ! कम्पिता न ।
अन्यैरसह्यैरिव देव-शैलो मनागपि श्यामलकायकान्ते ! ॥२१

ज्ञानं विभाति त्वयि तद्विशुद्धं,
मुक्ताफलं हस्त इव स्थितं सत् ।
रज्वात्मको लोक इ ईश ! दृष्ट-
श्चतुर्दशो येन नमे ! समस्तः ॥ २२

कुर्यात् स्थिति मे हृदये सदैव,
शङ्खाङ्क ! नेमे ! प्रकटप्रभावः ! ।
आलम्ब्य यां ति(ती)र्यत आ भवाब्धि-
राश्रित्य पोतं जलधिर्यथान्यै(:) ॥ (इ.व.) २३

दृष्टौ रसष्कोऽपि तवाद्भुतः सो-
ऽन्येषां न भूतो न भविष्यतीह ।
यथैव माकन्दफले रसो यः,
पार्श्वप्रभो ! नाऽर्कफले कदाचित् ॥ २४

श्रीवर्द्धमानो भगवान् विदध्यात्,
चिरं स मे हृत्कमलेंऽशुभावम् ।
सच्छर्मभव्यान् भुवि येन नीतं,
दत्त्वोपदेशं रुचिरं शिवस्य ॥ २५

एते वाचकचक्रवासवसभारामाललाटस्थलो(ले),
भ्राजच्छित्त(त्र)समानतेजविजयप्रौढप्रभावोद्भवात् ।
विद्वत्श्रेणी(णि) किरीटमानविजयाङ्घ्रीद्वैत(?) पद्मालिना,
दीप्त्याह्वेन जिना(:) स्तुता इति भृशं शिष्येण संसिद्धये ॥२६
(शा.वि.)

पू.मु.श्री हंसविजयकृता

## ४३. ॥ श्रीचतुर्विंशतिजिनेन्द्रस्तुतिः ॥

(अनुष्टुप्)

स नाभेयो जिनो जीया-, दूरुस्थवृषलक्षणः ।
श्रीशत्रुञ्जयतीर्थस्य, मस्तके मुकुटोपमः ॥ १

वन्देऽहमजितं देवं, लीलया जितमन्मथम् ।
कर्मवल्लीविनाशाय, कुठारसदृशं विभुम् ॥ २

श्रीमत्सम्भवनाथाय, भुवनार्त्तिहराय च ।
तृतीय योगिनाथाय, नमो विश्वैकभानवे ॥ ३

तुर्यकं जिननाथं च, अभिनन्दननामकम् ।
स्वजन्मावसरे मेरौ, प्राप्तं नौमि सुनिर्मलम् ॥ ४

सुमतिं सुमतिर्देया-,त्पञ्चमः परमेश्वरः ।
तनोतु वः सुखान्येष, संसाराम्बुद्धिपारगः ॥ ५

पद्मप्रभप्रभुर्नाम, तनोतु विमलां श्रियम् ।
मोहमल्लजयेनेव, भाति यः कमलद्युतिः ॥ ६

जीयाः सुपार्श्वदेव ! त्वं, सुवर्णद्युतिधारकः ।
मोहान्धानां जडानां च, तमोनाशाय भास्करः ॥ ७

समुल्लसितशोभाढ्य-,श्चन्द्रास्यश्चन्द्रलाञ्छनः ।
चन्द्रचारुस्फुरच्छायः, पातु चन्द्रप्रभः प्रभुः ॥ ८

स्फुरद्रम्यतमश्रीकः, सर्वदर्शी जिनोत्तमः ।
आन्तरारिविघाताय, ददातु सुविधिर्विधिम् ॥ ९

श्रीभद्दिलपुरीवासी, शीतलः शीतलो जिनः ।
विभासम्भारसंशोभी, शीतलान्नः करोतु सः ॥ १०

दिश्याच्छ्रेयांसि सः श्रीमान्, जिनःश्रेयांस उच्चकैः ॥
चमत्कारकरस्फारः, प्रभाप्राग्भारभासुरः ॥ ११

भ्राजिष्णुचञ्चद्वरपद्मवर्णः, प्रोत्फुल्लसर्पत्स्फुटपद्मनेत्रः ।
सत्पद्मसंशोभिनखारुणश्रीः, श्रीवासुपूज्यः किल मां पुनातु ॥१२

(इन्द्रवज्रा)

लसत्प्रकृष्टोज्ज्वलवज्रतुल्य-,रदप्रभोद्भासितसभ्यवर्गः ।
प्रभावरम्यं विमलं करोतु, जिनाधिनाथो विमलाभिधो माम्॥१३

(उपेन्द्रवज्रा)

अनन्तविज्ञानमनन्तनाथं, नमामि भक्त्या कृतपापमाथम् ।
वरोदयं श्रीजगदेकनाथ-,मनन्तसारातिशयाधिनाथम् ॥ १४
(उपेन्द्रवज्रा)

स्तौमि सक्थिवरवज्रलाञ्छनं, मूर्त्तधर्ममिव धर्मनामकम् ।
पर्वते हरिमिवाशनिश्रितं, गर्वपर्वतचयप्रणाशकम् ॥ १५
(रथोद्धता)

शान्तिकान्तिधृतिमुक्तिदं वरं, सान्द्रशं वितर मे तु सत्वरम् ।
शान्तिनाथ ! जिन ! शान्तिकारक !, रोगशोकभयमोहवारक! ॥ १६
(रथोद्धता)

ज्योतिषान्ततिषु राजति सूर्य,-स्तारकेषु च यथा ननु चन्द्रः ।
वेगिनां मरुदिवाप्तजनेषु, कुन्थुनाथजिनराड्ढि तथाऽसौ ॥ १७
(स्वागता)

आलम्बयष्टय इवारजिनेश्वरस्यां-
गुल्यो दशापि पदपद्मयुगस्य यस्य ।
पापौघकर्दमनिमज्जदशेषजन्तु,
निष्कासनाय हि बभुर्बलवत्तरास्ताः ॥ (वसन्ततिलका) १८

नयनकुमुदचन्द्रः कीरवर्णाभकायो,
बहुलसुखजयन्ताद्देवलोकाच्च्युतो यः ।
स जयति जगदीशो मल्लिनाथो जिनेन्द्रो,
जनशमसुखकारः कर्मवल्लीकुठारः ॥ (मालिनी) १९

मुनिसुव्रतनाथ ! तव क्रमयो, र्नखचन्द्रमसो दश भाति विभोः ।
रचिता इव रत्नचयैर्मुकुराः, शुभमुक्तिवधूबहुकेलिकराः ॥ २०
(तोटक)

स्फुटश्रीरोचिष्णुं, शमरसनिमग्नेक्षणयुगं,
प्रसन्नास्याम्भोजं, प्रहरणसमूहोज्झितकरम् ।
विरक्तं रामाया, निखिलजनसन्तोषजनकं,
भजे तं विश्वेशं, नमिजिनवरं कल्मषहरम् ॥(शिखरिणी) २१

प्रणमत जनाः ! श्रीमन्नेमिं विकस्वरवैभवं,
प्रवणहृदयं प्राणित्राणे मनोहरतायुतम् ।
भवजलनिधौ द्वीपप्रायं श्रितं गिरिरैवतं,
परिजनजनैः सार्धं त्यक्तस्वराजिमतीप्रियम् ॥ (हरिणी) २२

वन्दे पार्श्वं प्रवरविभवं पार्श्वसंसेव्यपार्श्वं,
कल्याणानां विपुलसदनं राजमानप्रभावम् ।
सत्कल्पद्रुं त्रिभुवनमनः कल्पनातुल्यदानात्,
वामाकुक्षिप्रवरसरसीराजहंसोपमानम् ॥ (मन्दाक्रान्ता) २३

विभ्राजिष्णुकलाकलापकलितग्लावर्क युग्मेन च,
सद्भक्त्या विनयान्वितेन विहिता पूजा हि यस्य प्रभोः ।
स श्रीवीरजिनः प्रभावभवनं श्रेयांसि दिश्यात्सदा-,
नन्तज्ञानविशुद्धरूपकलितः कामेभपञ्चाननः ॥ (शा.वि.) २४

पू.मु.श्री आनन्दचन्द्रविरचितम्

## ४४. ॥ श्रीचतुर्विंशतिजिनस्तवनम् ॥

(पादाकुलक)

सकलविमलमङ्गलदातारः,
शोभाभरजिनमतकर्त्तारः ।
भवत भवत जिनराजास्तुष्टाः,
सुरवरनरवरयतिगणजुष्टाः ॥ (भवत०) १

ऋषभादयः प्रवरजगदीशा,
गम्भीरिमजितचरमनदीशाः ॥ (भवत०) २

भविजनकमलविकाशनसूरा,
वाणीरुचिरसुधाभरपूराः ॥ (भवत०) ३

मुक्तिमहामानसवरहंसा,-
स्त्रिभुवनविदितविशदतरवंशाः ॥ (भवत०) ४

भवजलतारणपोतसमानाः,
सेवापरजनकृतशुभतानाः ॥ (भवत०) ५

करुणावलीप्रवरपयोदा,
दत्तजन्तुचयबन्धुरमोदाः ॥ (भवत०) ६

श्रीजयदायकजिनवरदेवा,
आनन्दाभिधभावितसेवाः ॥ (भवत०) ७

पू.मु. आनन्दचन्द्रविरचितम्

## ४५. ॥ श्रीचतुर्विंशतिजिनस्तवनम् ॥

(पादाकुलक)

शुभशुभसागरशारदचन्द्राः,
वारितभविकलोकघनतन्द्राः ।
जयत जयत सततं जिनदेवा,-
स्त्रिभुवनविहितपदाम्बुजसेवाः ॥ १

आदीश्वरप्रभृतिवीरान्ताः
सज्जनमनःप्रवरतरकान्ताः ॥ जयत० २

सुरवरपूज्याः सुरगिरिधीरा,
अंतिमजलनिधिवरगम्भीराः ॥ जयत० ३

शंखनिरञ्जनसिंधुरसुघटाः
परदर्शनिगजकेशरिसुभटाः ॥ जयत० ४

पुण्डरिकवारिजवन्निर्ल्लेपाः,
दूरीकृतपाखण्डाक्षेपाः ॥ जयत० ५

कच्छपगुप्तबाणमितकरणाः,
पालितगङ्गाजलसितचरणाः ॥ जयत० ६

प्राप्तज्ञानचरणजयकमला,
आनन्दाश्रितशुभपदकमलाः ॥ जयत० ७

पू.मु.श्री गुणभद्रविरचितम्
चित्रबन्धस्तोत्रम् ।

## ४६. ॥ श्रीचतुर्विंशतिस्तोत्रम् ॥

(अनुष्टुप्)

ये तीर्थरथनेतारः सन्त्यत्र वृषभादयः ।
चित्रबन्धेन तान् स्तौमि हारिणा चित्रकारिणा ॥ १

वृषभो वः सतां कान्तां वृद्धिं देयादनिन्दिताम् ।
भावयामास यः स्वीयां भासं दमितदुर्नयाम् ॥ छत्रम् । २

न जितस्त्वं जिनाधीश ! कर्मौघैरजितो वरः ।
रसरक्तैरसारं मां रक्षं रक्षरतेऽरतः ॥ चमरं । ३

संभवो वोऽस्तु सौख्याय शंभवैधानलोऽभयः ।
सद्धर्मं कर्ममोक्षाय समवीवददत्र यः ॥ बीजपूरः । ४

नक्षरश्रीश ! वादीननदीवार्द्धेऽभिनन्दन ! ।
नन्द नन्द धनादाननदानाद्रक्ष रक्ष नः ॥ चतुरारचकं । ५

सुमते ! मतिमन्नाम त्वमकाम यमद्रुम ।
नमस्याम इमं धाम शमस्य महमक्रमं ॥ षोडशदलकमलं । ६

पद्माभेन धृतो येन समयो नयपावनः ।
स्वर्लोकेन कृतामानः पूयाज्जिनः स नो मनः ॥अष्टदलकमलं॥७

सुपार्श्वो मम निःकामः सुमतिं ददतां प्रभुः ।
सुखायाशु शुभं येन सुप्रोक्तममलं जने ॥ स्वस्तिकं । ८

सतः कुवलयानन्दं दृष्ट्वा बिम्बं विधोरिव ।
वन्द्य चन्द्राभ ते प्रापुः केऽमृतं न शुभौकसः ॥ धनुः । ९

पुष्याच्छ्रीपुष्पदन्तोऽयं भोक्ता मुक्तेरनेकशः ।
शंखकुन्देन्दुमुक्ताभो यमध्यानाय नो वपुः ॥ मुशलं । १०

श्रीवृक्षाङ्कस्तु सश्रीक ईडितो वलिभिर्जनैः ।
शीतलः शीततां नेयात्कामवह्निं मम प्रभुः ॥ श्रीवृक्षः । ११

योजिनासससामान श्रेयसे सुररञ्जन ।
तव ज्ञानाधनानस तत्र सिद्धं वरं रसम् ॥ नालिकेरः । १२

वासुपूज्यः सुरैः स्नात्वा मेरौ जन्मनि यो नुतः ।
तं जिनं न जितं वन्दे देवतर्पिततर्पितम् ॥ त्रिशूलं । १३

विमल ! त्वामहं चायेऽनन्तसन्मतये जिनम् ।
नवानन्दद विख्यात तथ्यं तव वचोधनम् ॥ श्रीकरी । १४

अनन्तज्ञानसंयुक्त त्यक्तमण्डन पावन ।
नमाम्यनन्तनामानं त्वां जिनं जन्मभञ्जनम् ॥ हलः । १५

धर्मनाथ कुवादीश सर्वपक्षक्षयङ्कर ।
रसं पीत्वात्र ते वाचः प्राप मोक्षक्षितिं बुधः ॥ वज्रं । १६

नयशक्त्योद्धृतो येन नरकाज्जनकोऽनयः ।
शमास्पदः स वः शान्तिः शान्तिं कुर्याद्यमाशयः ॥शक्तिः ।१७

कुन्थुनाथ ! कुरूद्भूत ! कुन्थुमुख्यदयास्पद ! ।
ददस्व धर्मचक्रेश ! शं नित्यं मम सद्यशः ॥ भालः । १८

त्वयार ! रविसंकाशतपसा साधितः स्मरः ।
तथारिचक्रं चक्रेण मां त्रायस्व यतीश्वर ! ॥ शरः । १९

कन्दर्पदर्पकालीन ! मल्ले ! त्वं मलजिद्भुवि ।
विवेककन्दविद्यां नः संप्रयच्छ प्रभाधिकाम् ॥ कलशः । २०

हित्वा मोहं य आत्मनं तरभावं बभार तम् ।
जिनं सुव्रतकं नौमि वर्णसाररसार्णवम् ॥ रथः । २१

कमलाङ्कः कलानेककलितः कङ्करो यकः ।
कं नमिकः करोत्त्वेकं कस्यास्माकं कलं सकः ॥कमलं । २२

पापान्मुक्ताव मां देव ! मादेशस्थिर धीवर ।
रवधीरं जिनं मेने नेमे ! त्वां शङ्खशङ्करम् ॥ शंखः । २३

पादसेवनया तापान्निर्वृतास्तव भूमिपाः ।
पार्श्वाहं न कथं कष्टान्नमस्तुभ्यं तु कः स्तुतः ॥खड्गमुष्टिः।२४

पाहि मां भवतो वीर ! रवीतोऽधिकसत्प्रभ ! ।
भणन्ति सन्मतित्वेन नत्वेति घ्नाऽत्र सत्त पाः ॥ २५

द्वाभ्यां खड्गश्च ।

पाहि मां भवतो वीर ! रवीतोऽधिकसत्प्रभ ! ।
भणन्ति सन्मतित्वेन नत्वेति घ्नाऽत्र सत्त पाः ॥मुरजबन्धोऽपि।२६

छत्रौघाकृतिभिर्मृदङ्गनिधनैश्चित्रैर्विचित्रार्थिनीं
श्रीमन्मङ्गलकारिणां सुवृषभादीनां जिनानां स्तुतिम् ।
यो नाधीत इमां स्तुतिं विनयतो मेधाविना संस्कृतां
पुन्नागः कवितां स यातिं नृपतिः स्वर्गश्रियं चाश्नुते ॥ २७

(शा.वि.)

पञ्चमङ्गलयुक्तानां पदान् वन्दे जिनेशिनाम् ।
भागं देवादिबन्धानां भालजित्यवृतेशिनाम् ॥ छत्रबन्धः । १

सर्वसद्गुणसंवासः सदाचारस्त्वनालसः ।
सद्धर्मो गुणभद्रः स संपायाद्वो महीनसः ॥ चमरं । २

मतिमन्तं नमस्यामः मलेनास्पृष्टमुत्तमम् ।
मङ्गलाप मुनिं चेमं महामित्रद्विषोः समम् ॥ चमरं । ३

तर्काद्यर्थविशेषसार्थगणने दक्षः सतामग्रणीः
नन्द्याच्छ्रीगुणभद्रकीर्तिरमदो मोहान्धकारोप्लगौः ।
बालत्वेऽप्यजडं कविं यतिगुणश्रीशं जगुर्यं बुधाः
शुंभत्कीर्तिममुष्य कामदमिनं बौद्धादिमिथ्याहरं ॥ कलशः। ४

(शा.वि.)

पू.मु.श्री संघविजयविरचितः

## ४७. ॥ चतुर्विंशतिजिन १३८ पूर्वभववर्णनस्तवः ॥

(शार्दूलविक्रिडित)

श्रीशङ्खेश्वरपार्श्वनाथमनघं नत्वा जगत्स्वामिनं,
स्मृत्वा च स्वगुरुं समीहितकृतौ स्वाहाभुजां शाखिनम् ।
वाग्देवीचरणारविन्दयुगलं ध्यात्वा मनोजाड्यभिद्,
वक्ष्ये सम्प्रति तीर्थकृद्भवततिं संवित्तये मादृशाम् ॥ १

सार्थेशो युगलं सुरो नरपतिः स्वर्गे द्वितीये सुरः,
षष्ठे जन्मनि मेदिनीपरिवृढः श्रीवज्रजङ्घाभिधः ।
युग्मी देवकुरौ सुरोऽष्टमभवे वैद्योऽच्युते निर्जरः,
षट्खण्डाधिपतिस्त्वनुत्तरसुरः श्रीमारुदेवोऽवतात् ॥ २

जम्बूपूर्वविदेहवत्सविजये श्रीमत्सुसीमापुरे,
क्ष्मापालः प्रथमे भवेऽरिदमनाचार्यान्तिकात्तव्रतः ।
सञ्जातो विजये ततः सुरवरः श्रीमान् द्वितीये भवे,
तीर्थेशो जितशत्रुभूपतनयश्च्युत्वा ततोऽनुत्तरात् ॥ ३

पूर्वे जन्मनि नीति-रीतिनिपुणो विश्वम्भरायाः प्रभुः,
सञ्जातो रमणीयनाम्नि विजये प्रव्रज्य पार्श्वे गुरोः ।
आराध्यानशनं च दानवरिपुर्ग्रैवेयके सप्तमे,
सेनायास्तनयस्तृतीयजनुषि श्री(श)सम्भवः स्तात् श्रिये ॥ ४

जातो रत्नपुरे महाबल इति ख्यातः क्षितीशो भवे,
पौरस्त्ये विमलाख्यसूरिनिकटोपात्तव्रतो जीविता(त?)म् ।

पूर्णीकृत्य जयन्तनामनि महावर्ये विमाने सुरः,
स्वामी श्रीअभिनन्दनस्तनुमतां देयादमेयं सुखम् ॥ ५

आद्ये जन्मनि कीर्त्तिमानतिबलः क्ष्मापालचूडामणिः,
श्रीसीमन्धरसूरिपादसविधे लात्वा तपस्यां पुनः ।
निर्मायानशनं द्वितीयजनने जातो जयन्ते सुर-
स्तीर्थेशः सुमतिः समस्तजगतां भूयाद् विपत्तिच्छिदे ॥ ६

पूर्वं श्रीअपराजिताभिधमहीभुग् धातकीखण्डके,
जातः पूर्वविदेहवत्सविजयालङ्कारही(हा?)रोपमः ।
आदाय व्रतमादरेण नवमे ग्रैवेयके निर्जरः,
श्रीपद्मप्रभनामधेयजिनराट् श्रेयः सतां यच्छतु ॥ ७

आद्ये जन्मनि नन्दिराजनृपतिः श्रीधातकीद्वीपगः,
श्रीमत्पूर्वविदेहमध्यगशुभापुर्याः प्रभुतान्वितः ।
निर्दोषव्रतधारकोऽरिदमनाचार्यस्य पादान्तिके,
गीर्वाणः प्रवरो भवत् सुमनसे सार्वः सुपार्श्वस्ततः ॥ ८

श्रीब्रह्माभिधभूपतिः सुरवरः सौधर्मकल्पे ततो,
जातश्चक्रधरोऽच्युते सुरपतिर्भूपश्च पद्माभिधः ।
दीक्षां तत्र ललौ युगन्धरगुरोः पार्श्वे सुरोऽनुत्तरे,
श्रीचन्द्रप्रभतीर्थपस्त्रिजगतां चक्रे मनस्सु स्थितिम् ॥ ९

निश्शेषावनिपालमस्तकमणिद्वीपे तृतीये भवे,
पूर्वे पूर्णगुणान्वितोऽजनि महापद्माभिधो भूपति-
श्चारित्रं प्रतिपाल्य सर्वजगदानन्दान्तिके त्वानते,
गीर्वाणस्तदनन्तरं जिनपतिः सुग्रीवभूपात्मजः ॥ १०

पद्माख्योऽजनि मेदिनीपरिवृढः शास्ता सुसीमापुरः,
प्रव्रज्यां प्रतिपद्य दैवतवरः कल्पे पुनः प्राणते ।
नन्दाकुक्षिसरोजिनीमधुकरस्तीर्थाधिपः शीतलः,
पाथोजन्मसहोदरो दृढरथक्ष्मापालवंशाम्बरे ॥ ११

द्वीपे पुष्करसञ्ज्ञके च नलिनीगुल्माख्यभूमीप्रभुः,
जातः सारशुभापुरीपरिवृढः श्रीवज्रदन्तान्तिके ।
त्यक्त्वा सर्वपरिग्रहं सुरवरः कल्पे पुनर्द्वादशे,
सूनुर्विष्णुमहीपतेर्विजयते श्रेयांसनामा जिनः ॥ १२

स्वामी रत्नपुरस्य पुष्करवरप्राचीविदेहेऽभवत्,
श्रीपद्मोत्तरनामभूपतिवरः श्रीवज्रनाभं गुरुम् ।
साक्षीकृत्य तपस्वितस्त्रिदशतां प्राप्तः पुनः प्राणते,
सर्वेषां विदधातु वाञ्छितफलं श्रीवासुपूज्यो जिनः ॥ १३

क्षेत्रे भारतनामनि क्षितिपतिः श्रीपद्मसेनाभिधः,
पूर्वस्मिन् जनने किलाऽजनि महा-पूर्या नगर्याः प्रभुः ।
प्रव्रज्याऽष्टमदेवलोकविबुधः श्रीसर्वगुप्त्य(प्त)न्तिके,
श्यामायास्तनयस्त्रयोदश जिनश्च्युत्वा ततः स्वर्गतः ॥ १४

श्रीमान् पद्मरथाभिधाननृपतिः पौरस्त्यजन्मन्यभूत्,
सुरेश्चित्ररथाभिधस्य निकटे दीक्षां विशुद्धां श्रितः ।
पश्चात् प्राणतकल्पवासि विबुधो निर्माय शुद्धं तप-
स्तार्तीयीकभवे चतुर्दशजिनः श्रीसिंहसेनाङ्गजः ॥ १५

मर्त्यानामधिनायको दृढरथः श्रीभद्दिलाख्ये पुरे,
पार्श्वे श्रीविमलादिवाहनगुरोरादाय शुद्धं व्रतम् ।

सम्पूर्णे निजजीविते च विजये जातः सुराणां वरः,
पुण्याम्भोजविबोधवासरमणिः श्रीधर्मनाथस्ततः ॥ १६

श्रीषेणाभिधभूपतिर्युगलकं सौधर्मकल्पे सुरो,
वैताढ्ये च नभश्चरः सुरवरः कल्पेऽभवत् प्राणते ।
सीरास्त्रस्त्वपराजितोऽच्युतधरो वज्रायुधश्चक्रभृद्,
देवोऽभूत् सुजये नृपो घनरथो देवो जिनः षोडशः ॥ १७

आद्ये(द्य)-द्वीपविदेहसत्कविलसत्खड्गीपुराधीश्वरो,
भूपश्रेणिशिरोवतंससदृशः सिंहावहाख्यो नृपः ।
श्रीमत्संवरपार्श्वसंयमधरः सर्वार्थसिद्धौ सुरः,
श्रीसूरक्षितिपालसूनुरजनि श्रीकुन्थुनाथो जिनः ॥ १८

जम्बूपूर्वविदेहवत्सविजये भास्वत्सुसीमापुरी-
सुस्वामी वसुधाधवो धनपतिः श्रीसंवरस्याऽन्तिके ।
प्रान्ते प्रव्रजितो बभूव विबुधः सर्वार्थसिद्धौ ततः(तो),
देवीकुक्षिसरोजशोणचरणः श्रीमानरस्तीर्थकृत् ॥ १९

धारिण्यास्तनुजो महाबलनृपः श्रीवीतशोकापुरीं,
त्यक्त्वा पञ्चनितम्बिनीश्च जनने पूर्वं प्रपेदे व्रतम् ।
षण्मित्रैः सह निर्जरोऽजनि जयन्ताख्ये विमाने पुनः,
श्रीमत्कुम्भनराधिनाथतनयः श्रीमल्लिनाथः प्रभुः ॥ २०

राजा श्रीशिवकेतुरादिमभवे सौधर्मवृन्दारको,
न्यायोपेतकुबेरदत्तनृपतिर्देवस्तृतीये दिवे ।
सञ्जातः किल वज्रकुण्डलनृपः षष्ठे सुरस्ताविषे,
श्रीवर्मा त्वपराजितेऽमरवरः श्रीसुव्रतस्तीर्थपः ॥ २१

कौशाम्बीनगरीप्रभुः प्रणयवान् सिद्धार्थनामा नृपो,
दीक्षां प्राप्य तरीं भवोदधिजले नन्दाख्यगुर्वन्तिके ।
कल्पे प्राणतनामनि त्रिदिव(वि?)षज्जन्मा द्वितीये ततः,
सूनुः श्रीविजयाभिधाननृपतेस्तीर्थङ्करः श्रीनमिः ॥ २२

विख्यातो धनभूपतिर्धनवतीप्राणाधिनाथः सुरः,
सौधर्मे च बभूव चित्रगतिको माहेन्द्रकल्पे सुरः ।
भूपः श्रीअपराजितस्त्रिदिविषत्त्वेकादशे ताविषे,
शङ्खो नाम नृपोऽपराजितसुरः श्रीनेमिनाथस्ततः ॥ २३

भूदेवोऽमरभूतिराद्यजनुषि स्तम्बेरमश्चाष्टमे,
स्वर्गेऽभूत् त्रिदशः खगोऽच्युतसुरः श्रीवज्रनाभो नृपः ।
देवो राज्यधरोष्टमे च जनने स्वर्गी पुनः प्राणते,
श्रीवामेयजिनेश्वरः सृजतु मे श्रेयांसि भूयांसि सः ॥ २४

ग्रामस्याधिपति(तिः) सुरो भरतसूर्देवस्त्रिदण्डी तथा,
षट्वारं[?] तथैव दानवरिपुर्भूपः सुरश्चाजनि ।
विष्णुर्नैरयिको हरि र्नरकगश्चक्री सुरो भूपति-
र्देवः प्राणतताविषेऽन्तिमजिनः सोऽस्तु श्रिये प्राणिनाम् ॥२५

सप्तश्रीशशिनस्त्रयोदश भवाः श्रीमारुदेवप्रभोः
शान्तेर्द्वादश नेमिनो नव नव श्रीसुव्रतस्वामिनः ।
श्रीवीरस्य जिनेशितुर्भगवतः सप्ताधिका विंशतिः
श्रीपार्श्वस्य दश स्मृताः कविवरैः शेषार्हतां च त्रयः ॥ २६

इत्थं स्मृता विजयसेनमुनीन्द्रचन्द्र-शिष्येण सङ्घविजयेन मुदां
भरेण श्रीवर्त्तमानजिनपुङ्गवपूर्वजन्म-
पङ्क्तिः समीहितविधौ सुरशाखिशाखाः ॥ २७

(वसन्ततिलका)

श्रीब्रह्मर्षिप्रणीतः

# ४८. ॥ श्रीचतुर्विंशतिजिननमस्कारः ॥

श्रीवसुभूतितनूजं वन्दे, श्रीगौतमाभिधं (सदा) साधुम् ।
सकललब्ध्येकनिलयं, मलयं गुणचन्दनौघस्य ॥ (आर्या) १

गुणगरिमामेयं श्रीवामेयं नौमि सदा जनसौख्यकरं,
नरसुरगणवन्द्यं नित्यमनिन्द्यं कष्टतरूदयमूलहरम् ।
शशिधरसमवदनं समतासदनं पापदन्तिदलनैकहरिं,
कमठस्मयवारं त्यक्तविकारं भवसमुद्रसंतापहरम् ॥ २

चरणकमलं गुरूणां, प्रसादगेहं निरन्तरं नत्वा ।
स्तौमि जिनेशानित्थं, ललितामलबन्धबन्धेन ॥ (आर्या) ३

बन्धेन विहीनं शिवगतिलीनं वृषभजिनं वन्देऽहं,
कर्मारिभिरजितं श्रीजिनमजितं काञ्चनकोमलदेहम् ।
भवसंभवरहितं त्रिभुवनमहितं करुणापयआधारं,
संभवजिनराजं शिवसुखभाजं प्राप्तभवोदधिपारम् ॥ ४

अभिनन्दनजिनराजं, सुरासुराधीशनुतपदकमलम् ।
सुमतिं सुमतिसमेतं, सेतुं संसारनीरनिधेः ॥ (आर्या) ५

नवनिधिसंदोहं निर्ज्जितमोहं पद्मप्रभमीडेऽहं,
भूषितभूपार्श्वं प्रभु सुपार्श्वं संवरवरनिधिगेहम् ।
चन्द्रप्रभसुविधिं सन्मतिजलधिं शीतलमपि च जिनेशं
मुनिजनतावतंसं श्रीश्रेयांसं परिभूताभिनिवेशम् ॥ ६

विश्वत्रयतापहरं, वन्दे किल वासुपूज्यतीर्थकरम् ।
विमलजिनमनन्तजिनं, धर्मधुराधारकं धर्मम् ॥ (आर्या) ७

धर्मादरवन्तं कृतकर्मान्तं शान्तिं शान्तिनिदानं,
प्रकटितशिवपन्थं, जिनवरकुन्थुं श्रीअरमाहतमानम् ।
कर्मद्रुकरीन्द्रं मल्लिजिनेन्द्रं मुनिसुव्रतमभिवन्दे,
भवभूरिभ्रमणे त्वविहितशरणे कृतमशुभं तन्निन्दे ॥ ८

नमिमानमामि नित्यं, नेमिं गुणशालिनं च पार्श्वजिनम् ।
सकलमहिमानिधानं, सततं प्रणमामि वीरजिनम् ॥(आर्या) ९

जिनजन्मावसरे मन्दरशिखरे चूलोपर्यभिषिक्ता,
गृहवासमुषित्वारम्भं त्यक्त्वा जाता भवाद् विरक्ताः ।
चिरसञ्चितपापं कृतसन्तापं मोहभटं तं भित्वा,
शिवनिलयं याता जिनसंघातास्तनुसंयोगं हित्वा ॥ १०

प्रत्युत्पन्नजिनेन्द्रसङ्घमनिशं ध्यायाम्यहं भावतो,
ये चातीतजिना निरस्तवृजिना ये भाविनो भाविनः ।
एते मङ्गलकारका दिनमुखे संस्तूयमाना मुदा,
सन्तु ब्रह्ममनःसरोवरतटे हंसा इवाशाभृतः ॥ ११
(शार्दूलविक्रिडीत)

श्री ज्ञानचन्द्रकृतम्

## ४९. ॥ अतिशयगर्भश्रीचतुर्विंशतिजिनस्तवनम् ॥

स्वस्तिश्रीसुखदान् सदा भगवतोऽतीताद्यकालस्थितान् ।
सिद्धाचार्यवरांस्तथा श्रुतधरोपाध्यायसाधून् पुनः ।
पञ्चैतान् प्रकटं प्रणम्य च विभून् देवान् चतुर्विंशति-
श्रीमच्छ्रीऋषभादिवीरचरमान् स्तोतुं मुदोपक्रमे ॥(शा.वि.) १

(स्रग्धरा)

ये कर्मोर्वीं खनित्वा सुकृतहलदलैः कीर्तिवल्लिं पुरोपुः
काममद्याऽपि सद्यः प्रसरति दिवि यत् पुष्पपुष्यत्फलौघः ।
यस्याः शस्यप्रशस्यो भशुचिशशिमिषाच्छक्रचक्रार्चनीयाँ-
ल्लोकाऽऽदित्यांश्चतुर्विंशतिमपि सुजिनाँस्तानहं कीर्त्तयिष्ये ॥ २

अस्माभिर्वर्धिता ये विरलकरणतो लुञ्चितास्तेऽपि केशा,
अस्माकं वर्धिता यैः पटुधरणवशाल्लुञ्चितास्तैर्नखैश्च ।
नैधन्ते यस्य देहे त्विति नख-चिकुरा लज्जयाऽन्योन्यमेव
मुक्तद्वेषस्स एषोऽसमसुख ऋषभस्स्तूयते कर्ममुक्त्यै ॥ ३

एकं श्रीसद्मपद्मं तव मुखमनघं द्वे च पद्मे सुनेत्रे
पाणी पद्मे च पद्मेऽनिमिषनतपदौ पद्मवृन्दं सदेदृक् ।
त्वद्देहे दीप्तिगेहे विलसति विकसत्कुन्दवृन्दं च दन्ता
न्यायं श्वासोब्जगन्धोऽजित ! विगतमले मुक्तरोगं च तेऽङ्गम् ॥४

मांसं मुक्त्यङ्गनांशं रुधिरमपि धृतं किं त्वया पूर्वमेव,
यस्माद् गोक्षीरशुक्लं तव तनुविततौ त्यक्तरागं विभाति ।
त्वच्चित्ते रागपङ्क्तिर्विशति, अथ कुतः शुक्ललेश्यापवित्रं,
गात्रं सर्वत्र यत्ते त्विति विशदहृदा सम्भव ! स्तूयसे त्वम् ॥५

आहारोऽग्रत एव यस्य करणेऽदृश्यत्वमाशिश्रिये
शङ्के मांसदृशां ह्रियेति किमु नः पश्चादपि त्यक्ष्यति ।
नीहारश्च तथाऽभिनन्दनजिनस्सोऽयं सुराणां मतः
कारं कारमपारसारविनयं नन्नम्यते शर्म्मदः ॥ (शा.वि.) ६

ते चक्रच्छत्रवालव्यजनघननभःस्वच्छसत्पादपीठ-
पुष्यत्सिंहासनानां दिवि पटुकपटाद् यस्य देवा वहन्ति ।
लोकव्यापिप्रतापस्सुयश उतगुणा ये न मान्ति त्रिलोक्यां,
सद्बोधिज्ञानतुष्ट्यै सुमतिजिनवरं तं सदाऽर्हामि सिद्धम् ।।७

एको दीप्यद्विवेको भवनपतिरयं वक्तुमेवाऽत्र नान्यो,
ह्रस्वाऽन्यत्सत्सहस्रध्वजपरिकलितस्तुङ्ग इन्द्रध्वजस्तु ।
सिद्धत्वेन्द्रत्वदाता त्विति सुमतिजनानग्रतो याति यस्य,
तं श्रीपद्मप्रभं कोकनदवररुचिं पद्मवक्त्रं नुवामि ।। ८

सच्छायः छत्रपत्रध्वजकुसुमयुतो यस्य जागर्त्यशोकः,
स्थानोर्व्यां भव्यलोकानिति न भवति किं ज्ञापयन्नैव शोकः ।
स्वामिच्छायास्थितानां त्रिभुवनतिलकं नम्रकूर्मोन्नतं च
वन्दे पादारविन्दद्वितयमभयदं श्रीसुपार्श्वस्य तस्य ।। ९

पादाब्जेऽङ्कुररूपं नखररुचिमिषात् पल्लवाभं च पाणा-
वीषत्पृष्ठे प्रभामण्डलवलयवशाद् गुच्छरूपं चकास्ति ।
यस्याऽङ्गे वर्धमानं भुवनमपि महो व्याप्तुमेवोत्तमाङ्गे,
चन्द्राभं चन्द्रवक्त्रं तमकलहकलिं नौमि चन्द्रप्रभेन्द्रम् ।। १०

पादाब्जे यस्य लीना शुभमतिजनता जायते चारुचित्ता,
हर्षान्नाश्चर्यमेतद् बहुसमरुचिरो भूमिभागोऽपि यस्मात् ।
निःसङ्गं पक्षिवत् तं गतहसनरसं व्यूढचारित्रभावं,
निर्लेपं पद्मवच्छ्रीसुविधिजिनवरं कीर्त्तयामि स्वकीर्त्या ।। ११

मिथ्यात्वाद्युल्लसत् कण्टककटुकगणा नामिताः स्वामिनेति,
नम्राणां यान्त्यधस्तात् पुनरपि सुनृणां ज्ञापयन्तस्समन्तात् ।

जायन्ते किं सदाऽधःकृतनिजशिरसः कण्टका यस्य मार्गे,
सोऽयं दुष्कर्मदाहं हरतु जिनवरः शीतलस्संस्तुतो मे ॥ १२

षट्कायन्यायमार्गोद्धरणगुणरणत्सौख्यहर्षप्रकर्षाः,
षट्कायाः जीविताऽऽया षड्ऋतु-
कृतमिषाः स्पर्शसौख्या भजन्ते ।
देवत्रा यं पवित्रं तमहमपि शिवं षष्ठकाये स्थितोऽत्र,
सेवे श्रेयांससार्वं शुभशिवसुखदं स्वर्णवर्णं शिवाय ॥ १३

शीतो मन्दस्सुगन्धिर्ह्यनुग इति मरुद् बोधयन्नेव पुंसां,
क्षेत्रं सम्मार्ष्टि किं योजनमितममरै'र्वा' विशेषात् सुपूज्यः ।
इत्येवं वासुपूज्यस्स्ववदनविलसद् 'वा'रवै'र्वा'थवेन्द्रैः,
यस्य श्रीवासुपूज्यं तमहमपि जिनं सुष्ठु सम्पूजयामि ॥ १४

गन्धाम्भोमेघपातात् सुसमवसरणे ध्वस्तजाग्रद्रजस्का,
पञ्चाभाऽऽजानुदघ्न-स्थल-जलजपतत्पुष्पवृष्टिच्छलाच्च ।
नामाङ्के निर्मलस्याऽवनिरपि विमला जायते यस्य सङ्गात्,
सोयं कं संस्तुतस्सन् विमल-
जिनवरो निर्मलं माऽत्र कार्षीत् ॥ १५

शब्दादीनां ब्रुवाणां सुसमवसरणे नाश आशास्वनन्तः,
प्रादुर्भावः प्रियाणां पुनरपि परितः स्थानदेशेऽपि यस्य ।
सङ्गत्या सन्निभं यत् फलमिति च बुधैर्गीयते न्यायमेव,
दत्तात् सोऽनन्तनाथस्त्रिविधविधिनतोऽनन्तचारित्रबोधी ॥१६

व्याख्यानं कुर्वतो योजनमितततगीः सारणिर्यस्य शस्या,
भव्यानां हृद्धरित्र्यां प्रविशति च यदा कर्णकेदारमार्गैः ।

धर्माङ्कूरप्रपूरः प्रभवति च तदा जातरोमोद्गमैः किं,
धर्मं दत्त्वा स धर्मो मम च जिनवरः कर्मशत्रुं तृणेद्धु ॥ १७

यस्याऽर्धा मागधीवाग् जनहृदयकजे षट्पदालीव भातु,
तच्चित्रं शान्तिरूपं सरसरसमसौ लाति नो यत्तु दत्ते ।
मित्रं संसारसत्रे शमदमशिवदः शान्तिदः सत्त्वपङ्क्तेः,
शान्तिस्तीर्थङ्करोऽयं सह इह मयि नते कामशान्तिं तनोतु ॥१८

आर्यानार्यव्रजानां हितशिवसुखदा स्वच्छचित्ते चकास्ति,
कुण्डे कुण्डे नवग्लौरिव विमलजले यस्य गीः स्तुत्यसत्या ।
स्वच्छं क्षीराम्बुवत्तं शुचिरिव सुरुचिं वायुवल्गाद्विहार-
मञ्चाम्यर्हन्तमुच्चैः स्थितहितधृतिदं कुन्थुनाथं जिनेन्द्रम् ॥ १९

प्राग्बद्धद्वेषपोषा अपि असुरसुरायक्ष-रक्षस्समूहा,
वाणीं श्रृण्वन्ति यस्याऽपरिमितधृतिदां शान्तचित्ताः सहर्षम् ।
जन्तूनां जीवदातात्वभय-शरणदो धर्मचक्षुःप्रदश्च,
सोयं क्रुद्-द्रोह-मोहारिररजिनवरो यच्छतु स्वच्छबुद्धिम् ॥२०

यं वन्दन्तेऽन्यतीर्थ्याः स्वसमयसुधियोऽप्यागता नम्रगात्रा,
ज्ञानं द्रष्टुं च निःक्षेप्तुमिव किमु सदाऽज्ञानभारं च दूरे ।
चारित्रे मे परीणाममवतु सुयशाः केवली शुद्धशील-
स्स ध्यातो मल्लिनाथो जिनवरवृषभो मोहमल्लारिभल्लम् ॥ २१

जायन्ते प्रतिभाषणेन विकलास्सन्तस्समेता अपि,
यस्याग्रे परतीर्थिका गगनवत् सर्वाश्रयैर्वर्जिताः ।
सोऽयं श्रीमुनिसुव्रतो जिनवरो गुप्तेन्द्रियः कूर्मवत्
स्वं भृत्यं मुनिवन्नतं प्रकुरुतान्मां सुव्रतं सर्वदा ॥(शा.वि.) २२

नष्टाः कर्मारिवर्णा भुवनपरिणताश्चेद् यतो जातु तस्य (यस्य),
मारीती पञ्चविंशत्यघनतरलसद्योजनक्षेत्रमात्रे ।
नो जायेते किमेतत् कुतकमिह तदा हस्तिशौण्डीरवीरो,
वाग्गीतश्चित्तनीतः स मम नमिजिनो नामयत्वेव मोहम् ॥ २३

यत्र क्षेत्रेऽसुमित्रं विहरति शिवदोऽरिष्टनेमिर्जिनेन्द्र-
स्तत्रोद्यद्धर्मचक्रो भवति कथमहो स्वाऽन्यचक्रस्य भीतिः ।
यस्मात् पूर्वस्य बाधो भवति किल सदा शब्दशास्त्रे परेण,
सोऽयं योगीन्द्रचन्द्रो नयतु नयपथं नेमिरेनं स्वभृत्यम् ॥ २४

सुकालीनो यत्र स्फुरति शिवदो यस्य सुखदः,
सुवाङ् नभ्राड्नादस्तनुरुचितडित् तत्र च कथम् ।
अनावृष्टिर्दुष्टा भवति नो महती वृष्टिरपि भो,
स्तुतस्सोत्यन्तं मां गमयतु शिवं पार्श्वभगवान् ॥(शिखरिणी)२५

दुर्भिक्षोत्पन्नरोगैः स्थितमपि न पुरा यस्य संस्थानदेशे,
किं तच्चित्रं यतोऽस्य स्मरणत इह भो कर्मरोगव्यथाश्चेत् ।
दूरे नश्यन्त्यवश्यं ततनियमतपा वर्धमानो जिनेन्द्र-
स्सोऽयं भक्त्या स्तुतो माऽऽशयतु
अमृतभं स्वागमक्षीरपूरम् ॥ २६

इत्यर्हन्तश्चतुर्विंशतिरपि सुजिनास्संस्तुता वन्दिताश्च,
सद्भक्त्या कीर्तिता ये गतमलमरणाः क्षीणरोगादिशोकाः ।
सज्ज्ञानध्यानधीरा विधुरिव विमलाः सूर्यवत्सत्प्रकाशा,
गम्भीराः सिन्धुवच्च क्षितिरिव भुवने साधुसर्वंसहाश्च ॥ २७

नीरागद्वेषलोभा गतमदमदना धर्मतीर्थंकराश्च,
पूज्या लोकोत्तमाश्च प्रभयदसदयास्ते प्रसीदन्तु सन्तः ।

आरोग्यं बोधिलाभं ददतु धृतिमती सत्समाधिं स्वधर्मं,
सिद्धाः सिद्धिं दिशन्तु स्तुतिविततिरत ज्ञानचन्द्राय सान्द्रम् ॥२८

कविकुलप्रभविरचितः

## ५०. ॥ श्रीचतुर्विंशतिजिनस्तवः ॥

(शार्दूलविक्रीडित)

यन्नामाभिसमापिताखिलविपच्छ्रीसिद्धमन्त्रोपमं
चेतोगोचरचारि चारु रचयत्युच्चैरभीष्टाः श्रियः ।
भूयादद्भुतवैभवा भगवती सा भूयसे श्रेयसे
भो भव्या भवतां भवान्तजननी जैनी चतुर्विंशतिः ॥ १

त्रैलोक्यक्षोभहेतुर्विततगतिचतुर्भेदसेनासनाथो
निस्त्रिंशो दुष्टकर्माष्टकनृपसबलो भैरवोऽसौ भवारिः ।
भव्यास्तस्माद्भयं चेद्विमलगिरिमहादुर्गमाशु श्रयध्वं
यस्मिन् विश्वाधिनाथो निवसति ऋषभः संश्रितानां शरण्यः ॥२

(स्रग्धरा)

कृष्यत्पुण्यवपुर्भ्रमद्विमलदृक्तृष्णातिरेकोच्छल-
न्मूर्च्छाविप्लुतचेतनः कुगतिभूपीठे लुठन्नाकुलः ।
दुःस्थोऽहं भवरोगयोगविवशो विश्वप्रभो ! त्वत्पुरः
सम्प्राप्तोऽजित ! विश्ववैद्य सहसा यत्कृत्यनिष्ठो भव ॥ ३

ध्वस्तज्ञानतटा प्रवाहनिपतन्निःसत्त्वसत्त्वा स्फुर-
त्कुग्राहा पृथुमोहपङ्कपटली भूयिष्ठमज्जज्जना ।
भीमाऽत्यर्थमपारसंसृतिसरित् यस्यामहं मीनवद्
विध्वस्तो बहुकर्मजालपतितः श्रीसम्भव ! त्वां विना ॥ ४

मिथ्याभ्रान्तिमरीचिकाचयचिते क्रोधोष्णवातूलिके
तृष्णानश्यदनन्तजन्तुवितते दुःखौघतापाकुले ।
संसारेऽत्र मरुस्थलेऽतिविषमे भ्रान्त्वा निरीणोऽस्म्यहं
तन्मे विश्वविभो !ऽभिनन्दन ! शिवारामेऽभिरामे नय ॥ ५

मिथ्यात्वप्रबलान्धकारनिचितात् कर्मावलीशृङ्खला-
गाढाबद्धसमस्तजन्तुविसराद्दुष्टैः कषायैर्वृतात् ।
साटोपं विषयस्फुरद्विषधरात् संसारकारागृहा-
न्मुक्तिं वाञ्छसि चेत्तदाशु सुमतिं सेवस्व विश्वेश्वरम् ॥ ६

पात्रैर्यत्र विनिर्गतैर्बहुविधैर्योन्या जवान्यास्ततो
निष्क्रान्तैर्निजकायुरङ्कविगमे स्यात् तत्क्षणं शून्यता ।
तस्मिन्मोहनटप्रपञ्चरहिते संसारनाट्येऽबुधा
नृत्यन्तो यदि लज्जिताः श्रयत तत् पद्मप्रभं स्वामिनम् ॥ ७

कर्माऽम्भःपरिषेकसङ्गविततः सम्मोहमूलो मद-
स्कन्धो विघ्नदलो जरामृतिबृहच्छाखाप्रशाखाकुलः ।
मिथ्यादृङ्नरवानरो भवतरुर्दुष्टस्तदुन्मूलने
जीयादुन्मदहस्तिमल्लसदृशः श्रीमान् सुपार्श्वो जिनः ॥ ८

रागद्वेषविषाणभीषणतरः सम्मूर्च्छदिच्छाकरो
मूर्च्छापुच्छधरश्चतुर्गतिमहाकुक्षिः कषायक्रमः ।
युक्तः कुश्रुतिगर्जितेन भवतां भीत्यै भवेभो भवद्
भो भव्या जिनसिंहमाशु शरणं तद्यात चन्द्रप्रभम् ॥ ९

किम्पाकप्रतिमप्रमादपटले कन्दर्पसर्पाकुले
स्फूर्जद्दुःखदवानले जनिजरादुःखापदैः सङ्कुले ।

निर्विण्णोऽस्मि परिभ्रमन् भववने तन्मे जिनेशात्मनो
निर्बाधे सविधे विधेहि सुविधे ! वासं कृपाया निधे ! ॥ १०

दग्धज्ञानजनाः कषायदहनैर्मिथ्यात्वधूमान्धिताः
स्फारोद्भूततृषाव्यथासमुदयज्ज्वालौघसन्तापिताः ।
आः प्राप्स्यन्ति भवे प्रदीपित इवावस्थां न कां कां जडा
लीयन्ते नहि पादपद्मसरसि श्रीशीतलस्वामिनः ॥ ११

निर्मग्नो विषयाशुचिव्यतिकरे कर्मावलीपङ्किले
रौद्रोपद्रवविद्रुतोऽपि बहुधा तत्रैव कुर्वन् रतिम् ।
गर्तायामिव गर्तशूकरशिशुर्भूयो विगुप्तो भवे
श्रीश्रेयांसविभो ! ऽधुना मम पुनस्त्वत्पादपद्मं गतिः ॥ १२

अज्ञानध्वान्तपूरा कुमतबिलपतज्जन्तुका मोहनिद्रा-
निद्राणास्स्तोकलोकाऽन्धितसकलसदृक् शोकघूकातिघोरा ।
प्रेमप्रेतप्रचारा न भवति भयदा तस्य संसाररात्रिः
पूज्यः श्रीवासुपूज्योऽर्क इव समुदितो यस्य चित्तोदयाद्रौ ॥१३
(स्रग्धरा)

सच्चैतन्यहृता कदाग्रहकृता सौमुख्यशोभावृता
ज्ञानाऽङ्गानि विधुन्वता मतिमतां हास्यत्वमातन्वता ।
प्रेतेनेव भवेन ये विगलिताश्चेद् योग्यता तत् कुरु
तन्मुक्तान् विमलेश ! तान् निजवचोमन्त्राक्षरश्रावणात् ॥ १४

कृत्वा रूपपरम्परां बहुविधां विध्वंसयद्भिः पुन-
र्द्विष्टैः कर्मभिरप्रयोजनतया दुष्टैः कुलालैरिव ।
आरोप्यातिचलाचले भवमहाचक्रेऽहमुच्चैश्चिरं
मृत्स्नावद्भ्रमितोऽस्मि विष्टपपतेऽनन्त ! त्वयोपेक्षितः ॥१५

मत्ताः केचन केचन प्रपतिताः केचित् पुनर्मूर्च्छिताः,
केचिन्मूढतमाश्च केचन पुनर्निश्चेतनाः सर्वथा ।
मूढा यत्र विमोहमद्यवशतस्तस्मिन् भवापानके
श्रीधर्माऽऽपतितोऽस्मि बोधय दयावास ! स्वशक्त्या ततः ॥१६

मिथ्यादर्शनकन्दशालिनि रुषाबीजाचिते मूढता-
नालीभाजि कुवासनाजलभृते कर्माष्टपत्रावृते ।
सौरभ्यभ्रमतो भ्रमद्भ्रमरवल्लीनो भवाम्भोरुहे
बद्धस्तत्र दलैर्विमोचय ततः शान्ते ! जगद्भास्कर ! ॥ १७

कोपाटोपफटोऽप्रवृत्तिरसनः कालुष्यकृष्णाङ्गभृ-
दुर्वारस्मरतीव्ररागगरलोद्गारैर्जगन्मूर्च्छयन् ।
तेषां किं कुरुते भवोरगपतिर्भीष्मोऽपि येषामिदं
चित्ते स्फूर्जति नाम मन्त्रसदृशं श्रीकुन्थुतीर्थेशितुः ॥ १८

अज्ञानोच्छ्रितभस्मकीर्णमभितो लोभस्फुरत्फेरवं
मोहप्रेतमनल्पदुर्गतिचितारौद्रं कषायद्विषम् ।
चेद्भो भीमभवश्मशानमशिवाऽमुक्तं विमोक्तुं मनो
वस्तुं मोक्षपुरे च तज्जिनवरः श्रीमान्नरः सेव्यताम् ॥ १९

सञ्ज्ञाद्वारः समन्तादविरतिसरितामाश्रयोऽसातवात-
प्रक्षोभैर्दुर्निरीक्ष्यः परमतविततावर्तविभ्रान्तजन्तुः ।
तृष्णावेलाकरालो घनरसनिचितो नोकषायोग्रनक्रः
क्रूरोऽयं नाथ ! कुम्भोद्भव !
भवजलधिः शोष्यतां मल्लिदेव ! ॥ (स्रग्धरा) २०

ये मातापितृपुत्रबन्धुदयिताद्यास्तत्त्वबुद्ध्या क्षणं
दृष्टास्तानपि कृत्रिमानिव जवाद् दृष्ट्वा विनष्टानहम् ।

व्यामूढोऽस्मि भवेन्द्रजालपतितो जातो विलक्षः पुन-
स्तन्मे दूरमपास्य सुव्रतविभो ! तत्त्वप्रकाशं कुरु ॥ २१

कालं भ्रान्तोऽस्म्यनन्तं वृषभनिभभवच्चन्द्रसूरप्रयोगात्
प्रभ्राम्यत्कालचक्राच्चलति गतिघटीयन्त्रकेऽस्मिन् घटीवत् ।
सिञ्चन् दुष्कर्मनीरैर्जननमृतिवनं भीष्मसंसारकूपे
तस्मान्मे मोहबन्धं नमिजिन ! विरलीकृत्य मोक्षं कुरुष्व ॥२२
(स्रग्धरा)

अश्रान्तं विगलद्विवेकविभवे श्रेयःकणोपद्रवे
हीनप्राणिपरिस्फुरत्पदि भवे प्रोत्सर्पिदीनारवे ।
दुःखौघप्रभवे भवे गतशिवे दुर्भिक्षवद्भैरवे
भ्रान्तो रोर इवाऽस्मि नीरदनि(मि?)भं नेमे ! भवन्तं विना ॥२३

पित्रादिप्रतिबन्धबन्धुरगुणामुग्रग्रहग्रन्थिकां
स्वेच्छामुक्त्यभियोगजातनिबिडीभावां सुखेच्छामिषाम् ।
मोहव्याधकदर्थ्यमाननिपतत्प्राण्युत्करामेणवत्
प्राप्तोऽहं भववागुरां जिनपते ! वामेय ! मां मोचय ॥ २४

तीव्राकृत्यपरम्पराप्रहरणे क्लीबीकृतप्राणिके
दुर्ध्यानास्थनि विप्लवासृजि दुराचारप्रहारोत्कटे ।
भूरिप्राभवभीमभावरिपुभिर्भूयोऽभिभूतो भव-
द्वन्द्वेऽहं शरणं गतोऽस्मि भवतः श्रीवीर ! रक्ष प्रभो ! ॥ २५

इति जिनवराः सम्यग्भक्त्या मया समभिष्टुता
नवनवभवायासव्यासप्रकाशपुरस्सरम् ।
दलितविपदः सन्तु श्रीमत्कवीन्द्रकुलप्रभ-
स्तुतनतपदाः श्रेयोलक्ष्मीनिवाससुखप्रदाः ॥ (हरिणी) २६

श्रीभूपालकविविरचिता

## ५१. ॥ श्रीजिनचतुर्विंशतिका ॥

श्रीलीलायतनं महीकुलगृहं कीर्तिप्रमोदास्पदं
वाग्देवीरतिकेतनं जयरमाक्रीडानिधानं महत् ।
स स्यात्सर्वमहोत्सवैकभवनं यः प्रार्थितार्थप्रदं
प्रातः पश्यति कल्पपादपदलच्छायं जिनाङ्घ्रिद्वयम् ॥ १
(शा.वि.)

शान्तं वपुः श्रवणहारि वचश्चरित्रं
सर्वोपकारि तव देव ! ततः श्रुतज्ञाः ।
संसारमारवमहास्थलरुन्दसान्द्र-
च्छायामहीरुह ! भवन्तमुपाश्रयन्ते ॥ (वसन्ततिलका) २

स्वामिन्नद्य विनिर्गतोऽस्मि जननीगर्भान्धकूपोदरा-
दद्योद्घाटितदृष्टिरस्मि फलवज्जन्मास्मि चाद्य स्फुटम् ।
त्वामद्राक्षमहं यदक्षयपदानन्दाय लोकत्रयी-
नेत्रेन्दीवरकाननेन्दुममृतस्यन्दिप्रभाचन्द्रिकम् ॥ (शा.वि.) ३

निःशेषत्रिदशेन्द्रशेखरशिखारत्नप्रदीपावली
सान्द्रीभूतमृगेन्द्रविष्टरतटीमाणिक्यदीपावलिः ।
क्वेयं श्रीः क्व च निःस्पृहत्वमिदमित्यूहातिगस्त्वादृशः
सर्वज्ञानदृशश्चरित्रमहिमा लोकेश ! लोकोत्तरः ॥ (शा.वि.) ४

राज्यं शासनकारिनाकपति यत्त्यक्तं तृणावज्ञया
हेलानिर्दलितत्रिलोकमहिमा यन्मोहमल्लो जितः ।
लोकालोकमपि (?) स्वबोधमुकुरस्यान्तः कृतं यत्त्वया
सैषाश्चर्यपरम्परा जिनवर ! क्वान्यत्र सम्भाव्यते ॥(शा.वि.) ५

दानं ज्ञानधनाय दत्तमसकृत्पात्राय सद्वृत्तये
चीर्णान्युग्रतपांसि तेन सुचिरं पूजाश्च बह्व्यः कृताः ।
शीलानां निचयः सहामलगुणैः सर्वः समासादितो
दृष्टस्त्वं जिन ! येन दृष्टिसुभगः श्रद्धापरेण क्षणम् ॥(शा.वि.)६

प्रज्ञापारमितः स एव भगवान्पारं स एव श्रुत-
स्कन्धाब्धेर्गुणरत्नभूषण इति श्लाघ्यः स एव ध्रुवम् ।
नीयन्ते जिन ! येन कर्णहृदयालङ्कारतां त्वद्गुणाः
संसाराहिविषापहारमणयस्त्रैलोक्यचूडामणे ! ॥ (शा.वि.)७

जयति दिविजवृन्दान्दोलितैरिन्दुरोचि-
र्निचयरुचिभिरुच्चैश्चामरैर्वीज्यमानः ।
जिनपतिरनुरज्यन्मुक्तिसाम्राज्यलक्ष्मी-
युवतिनवकटाक्षक्षेपलीलां दधानैः ॥ (मालिनी) ८

देवः श्वेतातपत्रत्रयचमरिरुहाशोकभाश्चक्रभाषा-
पुष्पौघासारसिंहासनसुरपटहैरष्टभिः प्रातिहार्यैः ।
साश्चर्यैर्भ्राजमानः सुरमनुजसभाम्भोजिनीभानुमाली
पायान्नः पादपीठीकृतसकलजगत्पालमौलिर्जिनेन्द्रः ॥ ९
(स्रग्धरा)

नृत्यत्स्वर्दन्तिदन्ताम्बुरुहवननटन्नाकनारीनिकायः
सद्यस्त्रैलोक्ययात्रोत्सवकरनिनदातोद्यमाद्यन्निलिम्पः ।
हस्ताम्भोजातलीलाविनिहितसुमनोद्दामरम्यामरस्त्री-
काम्यः कल्याणपूजाविधिषु विजयते देव ! देवागमस्ते ॥ १०
(स्रग्धरा)

चक्षुष्मानहमेव देव भुवने नेत्रामृतस्यन्दिनं
त्वद्वक्त्रेन्दुमतिप्रसादसुभगैस्तेजोभिरुद्भासितम् ।
येनालोकयता मयानतिचिराच्चक्षुः कृतार्थीकृतं
द्रष्टव्यावधिवीक्षणव्यतिकरव्याजृम्भमाणोत्सवम् ॥(शा.वि.)११

कन्तोः सकान्तमपि मल्लमवैति कश्चि-
न्मुग्धो मुकुन्दमरविन्दजमिन्दुमौलिम् ।
मोघीकृतत्रिदशयोषिदपाङ्गपात-
स्तस्य त्वमेव विजयी जिनराजमल्लः ॥ (व.ति.) १२

किसलयितमनल्पं त्वद्विलोकाभिलाषा-
त्कुसुमितमतिसान्द्रं त्वत्समीपप्रयाणात् ।
मम फलितममन्दं त्वन्मुखेन्दोरिदानीं
नयनपथमवाप्ताद्देव ! पुण्यद्रुमेण ॥ (मालिनी) १३

त्रिभुवनवनपुष्प्यत्पुष्पकोदण्डदर्प-
प्रसरदवनवाम्भोमुक्तिसूक्तिप्रसूतिः ।
स जयति जिनराजव्रातजीमूतसङ्घः
शतमखशिखिनृत्यारम्भनिर्बन्धबन्धुः ॥ (मालिनी) १४

भूपालस्वर्गपालप्रमुखनरसुरश्रेणिनेत्रालिमाला-
लीलाचैत्यस्य चैत्यालयमखिलजगत्कौमुदीन्दोर्जिनस्य ।
उत्तंसीभूतसेवाञ्जलिपुटनलिनीकुड्मलास्त्रिः परीत्य
श्रीपादच्छाययापस्थितभवदवथुः संश्रितोऽस्मीव मुक्तिम् ॥१५
(स्रग्धरा)

देव ! त्वदङ्घ्रिनखमण्डलदर्पणेऽस्मि-
न्नर्घ्ये निसर्गरुचिरे चिरदृष्टवक्त्रः ।

श्रीकीर्तिकान्तिधृतिसङ्गमकारणानि
भव्यो न कानि लभते शुभमङ्गलानि ॥ (व.ति) १६

जयति सुरनरेन्द्रश्रीसुधानिर्झरिण्याः
कुलधरणिधरोऽयं जैनचैत्याभिरामः ।
प्रविपुलफलधर्मानोकहाग्रप्रवाल-
प्रसरशिखरशुम्भत्केतनः श्रीनिकेतः ॥ (मालिनी) १७

विनमदमरकान्ताकुन्तलाक्रान्तकान्ति-
स्फुरितनखमयूखद्योतिताशान्तरालः ।
दिविजमनुजराजव्रातपूज्यक्रमाब्जो
जयति विजितकर्मारातिजालो जिनेन्द्रः ॥ (मालिनी) १८

सुप्तोत्थितेन सुमुखेन सुमङ्गलाय
द्रष्टव्यमस्ति यदि मङ्गलमेव वस्तु ।
अन्येन किं तदिह नाथ ! तवैव वक्त्रं
त्रैलोक्यमङ्गलनिकेतनमीक्षणीयम् ॥ (व.ति.) १९

त्वं धर्मोदयतापसाश्रमशुकस्त्वं काव्यबन्धक्रम-
क्रीडानन्दनकोकिलस्त्वमुचितः श्रीमल्लिकाषट्पदः ।
त्वं पुन्नागकथारविन्दसरसीहंसस्त्वमुत्तंसकैः
कैर्भूपाल न धार्यसे गुणमणिस्रङ्मालिभिर्मौलिभिः ॥ २०
(शा.वि.)

शिवसुखमजरश्रीसङ्गमं चाभिलष्य
स्वमभिनियमयन्ति क्लेशपाशेन केचित् ।
वयमिह तु वचस्ते भूपतेर्भावयन्त-
स्तदुभयमपि शश्वल्लीलया निर्विशामः ॥ (मालिनी) २१

देवेन्द्रास्तव मज्जनानि विदधुर्देवाङ्गना मङ्गला-
न्यापेठुः शरदिन्दुनिर्मलयशो गन्धर्वदेवा जगुः ।
शेषाश्चापि यथानियोगमखिलाः सेवां सुराश्चक्रिरे
तत्किं देव ! वयं विदध्म इति नश्चित्तं तु दोलायते ॥(शा.वि.)२२

देव ! त्वज्जननाभिषेकसमये रोमाञ्चसत्कञ्चुकै-
र्देवेन्द्रैर्यदनर्ति नर्तनविधौ लब्धप्रभावैः स्फुटम् ।
किञ्चान्यत्सुरसुन्दरीकुचतटप्रान्तावनद्धोत्तम-
प्रेङ्खद्वल्लकिनादझङ्कृतमहो तत्केन संवर्ण्यते ॥ (शा.वि.) २३

देव ! त्वत्प्रतिबिम्बमम्बुजदलस्मेरेक्षणं पश्यतां
यत्रास्माकमहो महोत्सवरसो दृष्टेरियान्वर्तते ।
साक्षात्तत्र भवन्तमीक्षितवतां कल्याणकाले तदा
देवानामनिमेषलोचनतया वृत्तः स किं वर्ण्यते ॥(शा.वि.) २४

दृष्टं धाम रसायनस्य महतां दृष्टं निधीनां पदं
दृष्टं सिद्धरसस्य सद्म सदनं दृष्टं च चिन्तामणेः ।
किं दृष्टैरथवानुषङ्गिकफलैरेभिर्मयाद्य ध्रुवं
दृष्टं मुक्तिविवाहमङ्गलगृहं दृष्टे जिनश्रीगृहे ॥ (शा.वि.) २५

दृष्टस्त्वं जिनराजचन्द्र विकसद्भूपेन्द्रनेत्रोत्पले
स्नातं त्वन्नुतिचन्द्रिकाम्भसि भवद् विद्वच्चकोरोत्सवे ।
नीतश्चाद्य निदाघजः क्लमभरः शान्तिं मया गम्यते
देव ! त्वद्गतचेतसैव भवतो भूयात्पुनर्दर्शनम् ॥(शा.वि.) २६

श्रीसिंहकविविरचितम्

# ५२. ॥ पञ्चषष्टियन्त्रगर्भितम् श्रीचतुर्विंशतिजिनस्तोत्रम् ॥

(शार्दुलविक्रीडित)

वन्दे धर्मजिनं सदा सुखकरं चन्द्रप्रभं नाभिजं,
श्रीमद्वीरजिनेश्वरं जयकरं कुन्थुं च शान्तिं जिनम् ।
मुक्तिश्रीफलदाय्यनन्तमुनिपं वन्दे सुपार्श्वं विभुं,
श्रीमन्मेघनृपात्मजं च सुखदं पार्श्वं मनोऽभीष्टदम् ॥ १

श्रीनेमीश्वर-सुव्रतौ च विमलं पद्मप्रभं सांवरं,
सेवे सम्भवशङ्करं नमिजिनं मल्लिं जयानन्दनम् ।
वन्दे श्रीजिनशीतलं च सुविधिं सेवेऽजितं मुक्तिदं,
श्रीसङ्घं बत पञ्चविंशतितमं साक्षादऽरं वैष्णवम् ॥ २

स्तोत्रं सर्वजिनेश्वरैरभिगतं मन्त्रेषु मन्त्रं वरं,
एतत्सङ्गतयन्त्र एव विजयो द्रव्यैर्लिखित्वा शुभैः ।
पार्श्वे सन्ध्रियमाण एव सुखदो माङ्गल्यमालाप्रदो,
वामाङ्गे वनिता नरास्तदितरे कुर्वन्ति ये भावतः ॥ ३

प्रस्थाने स्थितियुद्धवादकरणे राजादिसन्दर्शने,
वश्यार्थे सुतहेतवे धनकृते रक्षन्तु पार्श्वे सदा ।
मार्गे संविषमे दवाग्निज्वलिते चिन्तादिनिर्नाशने,
यन्त्रोऽयं मुनिनेत्र(तृ?)सिंहकविना सङ्ग्रन्थितः सौख्यदः ॥४

## ५३. ॥ श्रीचतुर्विंशतिजिन-नमस्कारस्तोत्रम् ॥

(अनुष्टुप्)

प्रणौमि परया भक्त्या, सिद्धिदं सिद्धमण्डलम् ।
परब्रह्मणि संलीनं, सर्वकल्याणकारणम् ॥ १

नामाकृतिद्रव्यभाव-भेदभिन्नाश्च ये जिनाः ।
पुनन्ति क्षेत्रे काले च, सर्वस्मिंस्तान्नमाम्यहम् ॥ २

अर्हतामादिमं नित्यं, जगदानन्ददायकम् ।
भूभुजामादिमं देवं, नाभेयं प्रणिदध्महे ॥ ३

दयार्द्रचेतसा येन, व्यलिकाद्रक्षितं जगत् ।
तं भवौघविनाशायाऽजितं वन्दामहे वयम् ॥ ४

शक्रराजेन्द्रभोगीन्द्र-गणैः सेव्याय स्वामिने ।
परब्रह्मस्वरूपाय, सम्भवाय नमो नमः ॥ ५

विश्वव्यापी जगत्पूज्यः, चिदानन्दमयः शिवः ।
सदानन्दमयो भव्यान्, नन्दयत्वभिनन्दनः ॥ ६

सुमते ! त्रिजगत्स्वामिन् !, तस्यै ते मतये नमः ।
यया मोहनरेन्द्रस्य, जितं सैन्यं शमामृतैः ॥ ७

प्रभो ! पद्मप्रभस्वामिन् ! नमस्तुभ्यं जगत्पते ! ।
व्यलीकहारिणे विश्व-पूजिताय परमात्मने ॥ ८

रक्षन्तु सर्वकालं वो, भवभीतान् विशेषतः ।
श्रीसुपार्श्वजिनेन्द्रोक्त-देशनावचनोर्मयः ॥ ९

चन्द्रादित्यौ सदा यस्य, यजतः पादपद्मकम् ।
श्रीचन्द्रप्रभनाथं च, तं नौमिं शिवकारणम् ॥ १०

स्तुमः सुविधिनाथस्य, केवलज्ञानसागरम् ।
ज्ञेयोपादेयहेयादि - रत्नानामाकरं भुवि ॥ ११

रागाग्निना भृशं दग्धान्, भूस्पृशान् भुवनेश्वरः ।
दर्शनात् कुरुते शीतान्, शीतलोऽवतु मां सदा ॥ १२

यद्रूपनिर्जितोऽनङ्गः, कन्दर्पोऽभूद्यतः श्रिया ।
सेवितः श्रीविलासोऽयं, श्रेयांसः सिद्धिदोऽस्तु वः ॥ १३

जयन्ति वासुपूज्यस्य, देशनाजलराशयः ।
जनानामघलिप्तानां, निर्मलीकरणोद्यमाः ॥ १४

विमलं हि जगत्सर्वं, केवलज्ञानवारिणा ।
कृतं विमलनाथेन, येन तं प्रणमाम्यहम् ॥ १५

अनन्तगुणसम्पूर्णोऽनन्तनाथः सतां मुदे ।
अनन्तजनसंसेव्योऽनन्तज्ञानमयः शिवः ॥ १६

पान्तु वो धर्मनाथस्य, क्रमाम्भोजनखांशवः ।
सन्नमन्नाकिनाथानां, किरीटमणिरञ्जकाः ॥ १७

यन्नाम भवभीतानां, भव्यानामभयप्रदम् ।
शान्तितुष्टिकरं नित्यं, तस्मै श्रीशान्तये नमः ॥ १८

भवाब्धौ मोहभोगीन्द्र-ग्रस्तानां भव्यप्राणिनाम् ।
सिद्धये कुन्थुनाथस्य, देशनावचनामृतम् ॥ १९

त्यक्त्वा मानुष्यकान् भोगान्, जग्राह व्रतपञ्चकम् ।
वैराग्यरससम्पूर्णोऽरनाथः सिद्धयेऽस्तु वः ॥ २०

स्याद्वादजलदो यस्य, भव्यमोहमहातपम् ।
हरते मल्लिनाथं तं, नमामि शिवकारणम् ॥ २१

यद्वचोऽमृतमासाद्य, जना मोहमहाविषम् ।
उद्वमन्ति क्षणेनैव, तं नौमि मुनिसुव्रतम् ॥ २२

अन्तरङ्गारयो येन, कर्माष्टकसमन्विताः ।
नमिता नमिनाथेन, स मां पातु भवाब्धितः ॥ २३

बन्धनस्थान् पशून् दृष्ट्वा, त्यक्ता येन दयालुना ।
राजिमती राजकन्या, स नेमिः सिद्धयेऽस्तु वः ॥ २४

पार्श्वनाथपदद्वन्द्वं, भूयाद् वः सिद्धिकारकम् ।
किरीटकुसुमैः शक्रैः प्रपूज्यं भक्तिनिर्भरैः ॥ २५

अज्ञानतमसा व्याप्तं, विश्वं विश्वहितैषिणा ।
द्योतितं केवलज्ञेन, श्रीवीरेण शिवाय सः ॥ २६

## ५४. ॥ श्रीजिनचतुर्विंशतिकास्तोत्रम् ॥

(अनुष्टुप्)

श्रीनाभिमरुदेवाङ्गप्रभवं कनकत्विषम् ।
वृषाङ्कं वृषभं वन्दे, पञ्चचापशतीमितम् ॥ १

गजाङ्को रुक्मरुक् सार्धचतुर्धन्वशतोन्नतः ।
श्रिये स्तादजितस्वामी, विजयाजितशत्रुभूः ॥ २

चतुश्चापशतोत्तुङ्गं, हेमाभं वाहवाहनम् ।
जितारिराजसेनाङ्गसम्भवं शम्भवं स्तुवे ॥ ३

निष्कत्विषं प्लवङ्गाङ्कं, सिद्धार्थसंवराऽङ्गजम् ।
सार्धत्रिशतधन्वाङ्गं, सेवेऽहमभिनन्दनम् ॥ ४

कोदण्डत्रिशतीमानः, क्रौञ्चलक्ष्माऽर्जुनद्युतिः ।
मुदे सुमतिनाथोऽस्तु, मङ्गलामेघभूपभूः ॥ ५

सार्द्धत्रिशतचापोच्चं, सुसीमाधरनन्दनम् ।
सरोजलक्षितं शोणप्रभं पद्मप्रभं स्तुवे ॥ ६

पृथ्वीप्रतिष्ठसम्भूतिर्द्विधन्वशतविग्रहः ।
सुपार्श्वनाथ ! रैरोचिः स्वस्ति स्वस्तिकचिह्न ! ते ॥ ७

चन्द्राभं चन्द्रलक्ष्माणं, लक्ष्मणामहसेनजम् ।
सार्द्धचापशतोच्छ्रयं, नौमि चन्द्रप्रभं प्रभुम् ॥ ८

सुग्रीवरामातनयं, मकराङ्कं हिमच्छविम् ।
सुविधिं विधिना वन्दे, धनुःशतसमुच्छ्रयम् ॥ ९

पायान्नवतिधन्वोच्चः, स्वच्छः श्रीवत्सलाञ्छितः ।
नन्दादृढरथोद्भूतः शीतलः कनकद्युतिः ॥ १०

कल्याणकान्तिः श्रीविष्णुविष्णुदेवीतनूरुहः ।
धन्वशीतिमितः पातु, श्रेयांसः खड्गिलाञ्छनः ॥ ११

वसुपूज्यजयासूनुर्महिषाङ्कोऽरुणप्रभः ।
चापसप्ततिदेहोऽव्याद्, वासुपूज्यजिनेश्वरः ॥ १२

श्रीश्यामाकृतवर्माङ्गजन्मा षष्टिधनुस्तनुः ।
शूकराङ्को हिरण्याभः, शिवाय विमलोऽस्तु मे ॥ १३

पञ्चाशद्धनुरुच्छ्रायः सुयशःसिंहसेनजः ।
श्येनाङ्कः स्वर्णवर्णः स्तादनन्तोऽनन्तसम्पदे ॥ १४

सुव्रताभानुभूः पञ्चचत्वारिंशद्धनुर्म्मितः ।
जातरूपरुचिर्वज्रचिह्नोऽव्याद् धर्मतीर्थकृत् ॥ १५

चत्वारिंशद्धनुर्देहो हेमधामा मृगध्वजः ।
विश्वसेनाचिरासूनुः, श्रीशान्तिः शान्तयेऽस्तु नः ॥ १६

छागाङ्कः स्वर्णरुक् पञ्चत्रिंशत्कार्मुकमूर्त्तिभृत् ।
श्रीकुन्थुः श्रेयसे सूरश्रीराज्ञीतनयोऽस्तु मे ॥ १७

नन्दावर्त्ताङ्कितं त्रिंशद्धन्वमानं वसुच्छविम् ।
अरनाथं स्तुवे देवीसुदर्शनसमुद्भवम् ॥ १८

नीलं कुम्भाङ्कितं कुम्भप्रभावत्यङ्गसम्भवम् ।
पञ्चविंशतिकोदण्डमूर्त्तिं मल्लिमुपास्महे ॥ १९

पद्मासुमित्रयोः पुत्रं, घनाभं कूर्म्मलक्षणम् ।
चापविंशतिमानाङ्गं, स्तवीमि मुनिसुव्रतम् ॥ २०

वप्राविजयसम्भूतं, नमिं नीलोत्पलाङ्कितम् ।
शातकौम्भप्रभं पञ्चदशधन्वतनुं श्रये ॥ २१

शङ्खाङ्को दशचापोच्चः, समुद्रविजयात्मजः ।
शिवायास्तु शिवासूनुर्नेमिर्नवघनत्विषिः ॥ २२

नवहस्तवपुर्बालतमालदलदीधितिः ।
वामाश्वसेनभूर्भूत्यै, श्रीपार्श्वोऽस्तु फणिध्वजः ॥ २३

सप्तहस्तमितं सिंहलाञ्छनं काञ्चनत्विषम् ।
सिद्धार्थत्रिशलसूनुं, श्रीवीरं प्रणिदध्महे ॥ २४

एवं स्तुताः स्ववर्णाङ्कमानाम्बापितृनामभिः ।
स्युः सदा धर्म्मकीर्त्तिश्रीनायका जिननायकाः ॥ २५

## ५५. ॥ श्रीचतुर्विंशतिजिनस्तवनम् ॥

(आर्या)

ऋषभजिनमजितनाथं सम्भवमभिनन्दनं जिनं सुमतिम् ।
पद्मप्रभं सुपार्श्वं, चन्द्रप्रभमशुभतिमिरघन(घ्न?)म् ॥ १

सुविधिं शीतलनाथं, श्रेयांसं वासपूज्यतीर्थकरम् ।
विमलजिनमनन्तजिनं, धर्मं धर्मोत्तमं शान्तिम् ॥ २

कुन्थुं जिनवरमीशं, मल्लिं मुनिसुव्रतं नमिजिनेन्द्रम् ।
जिनवरमरिष्टनेमिं, पार्श्वजिनं वर्द्धमानं च ॥ ३

इति नामानि जिनानां सुरदैत्यकपर्द(र्दि)यक्षविनुतानाम् ।
संस्मरति यस्त्रिकालं शिवपदमचिरादसौ लभते ॥ ४

## ५६. ॥ सर्वजिनस्तवः ॥

यत्र बहुकोटिसङ्ख्याः सिद्धिमगुः पुण्डरीकमुख्यजिनाः ।
तीर्थानामादिपदं स जयति शत्रुञ्जयगिरीशः ॥ १

(अनुष्टुप्)

अहो ! अमेघजा वृष्टि-रहो ! अकुसुमं फलम् ।
अहो ! पुराकृतं पुण्यं यद् दृष्टो नाथ ! लोचनैः ॥ २

धन्योऽहं कृतपुण्योऽहं निस्तीर्णोऽहं भवाऽर्णवात् ।
अनादौ भवसंसारे दृष्टो येन जिनो मया ॥ ३

सर्वाऽमरेन्द्रसम्पूज्य ! सर्वज्ञ ! ज्ञानभास्करः ।
सर्वसत्त्वहिताऽऽनन्द ! सर्वसौख्य ! नमोऽस्तु ते ॥ ४

मिथ्याऽम्बुलहरीधूतं निमज्जन्तं भवाऽर्णवे ।
कुग्राहग्रसितं नाथ ! मामुत्तारय तारय ॥ ५

जन्ममृत्युजरारोग–शोकसन्त्रासवैरिणः ।
पृष्ठितो धावतो देव ! मयि वारय वारय ॥ ६

अद्य जन्म महाभाग ! अद्य वृद्धिर्दयानिधे ! ।
अद्यैव मङ्गलाऽधीश ! तीर्णः सद्यो भवोदधिः ॥ ७

अद्यसद्यः सुराऽऽवासोऽप्यद्यसद्यः समाधयः ।
अद्यसद्यः श्रियः सर्वा मोक्षश्च जिनदर्शनात् ॥ ८

त्रैलोक्याऽद्भुतवृत्ताय त्रैलोक्याऽद्भुतकीर्त्तये ।
त्रैलोक्याऽद्भुतसौख्याय त्रैलोक्याद्भुतमूर्त्तये ॥ ९

विश्वत्रयत्रिनेत्राय विश्वत्रयहितैषिणे ।
विश्वत्रयाऽर्त्तिनाशाय नमो विश्वविभूतये ॥ १०

अन्तरङ्गं महासैन्यं समस्तजनतापकम् ।
दलितं लीलया येन केनचित् तं नमाम्यहम् ॥ ११

## ५७. ॥ श्रीचतुर्विंशतिजिनस्तोत्रम् ॥

(शार्दूलविक्रिडीत)

नन्द्यान्नाभिसुतः सुरेश्वरनतः संसारपारं गतः,
क्रोधाद्यैरजितं स्तुवेऽहमजितं त्रैलोक्यसम्पूजितम् ।
सेनाकुक्षिभवः पुनातु विभवः श्रीसम्भवः शम्भवः,
पायान्मामभिनन्दनः सुवदनः स्वामी जनानन्दनः ॥ १

लोकेशः सुमतिस्तनोतु नमति श्रेयःश्रियं सन्मति–
र्दम्भद्रोः कलभं मदेभशरभं प्रस्तौमि पद्मप्रभम् ।
श्रीपृथ्वीतनयं सुपार्श्वमभयं वन्दे विलीनामयं,
श्रेयस्तस्य न दुर्लभं शशिनिभं यः स्तौति चन्द्रप्रभम् ॥ २

बोधिं नः सुविधे ! विधेहि सुविधे कर्म्मद्रुमोघजे(मौघप्रघे),
जीयादम्बुजकोमलक्रमतलः श्रीमान् जिनः शीतलः ।
श्रीश्रेयांस ! जय स्फुरद्गुणचयः श्रेयःश्रियामाश्रयः,
सम्पूज्यो जगतां श्रियं वितनुतां श्रीवासुपूज्यः सताम् ॥ ३

मोक्षं वो विमलो ददातु विमलो मोहाम्बुवाहानिलोऽ-
नन्तोऽनन्तगुणः सदागतरणः कुर्यात् क्षयं कर्मणः ।
धर्म्मो मेऽविपदं जवाच्छिवपदं दद्यात् सुखैकास्पदं,
शान्तिस्तीर्थपतिः करोत्विभगतिः शान्तिं कृताघक्षतिः ॥ ४

कुन्थुर्मेघरवो भवादवतु वो मानेभकण्ठीरवो,
भक्त्या नम्रनरामरं जिनवरं प्रासस्मरं नौम्यरम् ।
श्रीमल्लेखनतक्रमोज्झिततमो मल्लेऽस्तु तुभ्यं नमो,
विश्वार्च्यो भवतः स पातु भवतः श्रीसुव्रतः सुव्रतः ॥ ५

लोभाम्भोजतमेश्वरोपम ! नमे धर्म्मे धियं धेहि मे,
वन्देऽहं वृषगामिनं प्रशमिनं श्रीनेमिनं स्वामिनम् ।
श्रीमत्पार्श्वजिनं स्तुवेऽस्तवृजिनं दन्ताक्षदुर्वाजिनं,
नौमि श्रीत्रिशलाङ्गजं गतरुजं मायालताया गजम् ॥ ६

दुरापास्तसमस्तकल्मष (कुत्सन) तमावीताखिलान्तारजा-
वामोल्लासविनाशसूतमहने (लासशोभनमहा) मृद्वग्रिमौकाबलम्।
स्फूर्जद्भावृषभाभिरामनयनिर्दग्धाशुभैधावरं,
गातां मुक्तिपदप्रदं जिनवृषा वृद्धं प्रसादं मम ॥ ७

इत्थं धर्म्यवचोवितानरचितं वर्ज्यं स्तवं मुद्युतः,
सद्धर्मद्गु(द्रु?)मसेकसंवरमुचां भक्त्यार्हता नित्यशः ।
श्रेयःकीर्त्तिकरं नरः स्मरति यः संसारमाकृत्यसो-
ऽतीतार्त्तिः परमे पदे चिरमितः प्राप्नोत्यनन्तं सुखम् ॥ ८

पञ्चषष्टियन्त्रगर्भितम्

## ५८. ॥ श्रीचतुर्विंशतिजिन स्तोत्रम् ॥

(शार्दूलविक्रीडित)

शान्तिं धर्मजिनं ततश्च सुविधिं श्रीसम्भवं नेमिकं,
श्रीचन्द्रप्रभनामधेयमजितं वंदे नमिं सुव्रतम् ।
आप्तानन्त-सुसङ्घ-मल्लि-विमलान्, भक्त्या सुपार्श्वं प्रभुं,
श्रीनाभ्यात्मज-वासुपूज्य-जिनकौ पद्मप्रभाख्यं प्रभुम् ॥ १

वन्देऽहं परमेश्वराप्तसुमतिं वीरप्रभुं श्रीअरं
सार्व्वं श्रीअभिनन्दनं च परमं, पार्श्वं च कुन्थुं प्रभुम् ।
श्रीश्रेयांसजिनं च शीतलजिनं तीर्थङ्कराख्यावलिं
बद्धं स्तोत्रमिदं सदा जयकरं श्रीपञ्चषष्टियकम् ॥ क्षत्रीय २

आदौ धर्मजिनं ततोऽष्टमजिनं नाभेय-वीरेश्वरौ,
कुन्थुं शान्तिमनन्त-सार्वममलं वन्दे सुपार्श्वं प्रभुम् ।
भक्त्या श्रीसुमतिं च पार्श्वजिनकं नेमीप्रभुं सुव्रत-
मर्हन्तं विमलं सदा सुखकरं पद्मप्रभाख्यं प्रभुम् ॥ ३

भक्त्या नौमि जिनाभिनन्दनजिनं श्रीसम्भवं श्रीनमिं,
श्रीमल्लिं जिनवासुपूज्यजिनकं श्रीशीतलाख्यप्रभुम् ।
अर्हन्तं सुविधिं ततोऽजितजिनं सङ्घं ततः श्रीअरं,
श्रीश्रेयांसमिदं जिनावलिगतं श्रीपञ्चषष्टिस्तवम् ॥ ब्राह्मण ४

आदौ सुव्रतकाभिनन्दनजिनौ सङ्घं जिनानन्तकं,
वन्दे श्रीअजितं ततोऽष्टमजिनं भक्त्या सुपार्श्वं नमिम् ।
श्रीश्रेयांसमरं च शीतलजिनं कुन्थुं च तीर्थेश्वरं,
सार्व-श्रीविमलेश्वरं च सुविधिं शान्तिं प्रभु-सम्भवम् ॥ ५

श्रीधर्मं सुमतिं च मल्लिजिनकं पार्श्वं च वीरप्रभुं
नेमिं नाभिज वासुपूज्यजिनकौ पद्मप्रभाख्यप्रभुम् ।
भक्त्या नौमि सदार्तिहारकमिदं श्रीपञ्चषष्टियकं,
स्तोत्रं सर्वजिनश्वरैरभिगतं प्रेतादिविध्वंसकम् ॥ वैश्य. ६

आदौ नेमिजिनं च सम्भवजिनं श्रीपुष्पदन्तप्रभुं,
धर्मं शान्तिमनन्तसुव्रतजिनौ वन्दे नमिं चाजितम् ।
श्रीचन्द्रप्रभनाभिनन्दनजिनौ भक्त्या सुपार्श्वं प्रभुं,
सर्वं श्रीविमलं च मल्लिममलं सङ्घं ततोऽरं प्रभुम् ॥ ७

श्रीवीरं सुमतिं च षष्ठमजिनं श्रीवासुपूज्यं प्रभुं,
वन्दे शीतलतीर्थपं जयकरं श्रेयांसकुन्थुप्रभुम् ।
श्रीमत्पार्श्वजिनाभिनन्दनजिनौ तीर्थङ्कराख्यावलि-
बद्धं स्तोत्रमिदं सदा जयकरं श्रीपञ्चषष्टियकम् ॥ शूद्रक. ८

क्षत्री - ब्राह्मण- वैश्य - शूद्रकचतुर्वर्णैश्चतुर्धार्यते,
यन्त्रोऽयं विधिना प्रतिष्ठितवरो यस्मिन् गृहे नित्यशः ।
तस्मिन्प्रेतपिशाचभूतरिपुरक्षोडाकिनीशाकिनी,
वेतालादिभयं भवेन्नहि पुनः सौभाग्यसौख्यावलिः ॥ ९

पूतात्मेन सुजातिलेखनिकरै-काङ्कादि-सङ्ख्याष्टकं,
गन्धाल्लेखितकांश्यभाजनगतं यन्त्रं स्ववर्णाश्रितम् ।
यद्वा पूजितयन्त्रकं च पयसा प्रक्षाल्य भक्त्या भवेत्,
शीघ्रं तस्य जलस्य पानकरणाद्भूतादिदोषक्षयम् ॥ १०

प्राग्रीत्या वरभूर्यपत्रलिखितं बध्नाति मन्त्रं यदा,
भक्त्या स्वीयभूजे तदा खलु भवेद्भूतादि-दोषक्षयम् ।
राज्यादौ च जपं प्रभातसमये स्तोत्रं पठेद्यः पुनः,
ध्येयं बुद्धिमतां च तस्य विलसत् सौभाग्यलक्ष्मी भवेत् ॥११

# ५९. ॥ श्रीवर्तमानचतुर्विंशतिका-शाश्वतजिनस्तवः ॥

(उपजाति)

श्रीआदिनाथा-ऽजितनाथदेवौ,
श्रीशंभ(सम्भ) वार्हन्नभिनन्दनौ च ।
स्तुवे जिनं श्रीसुमतिं च पद्म-प्रभं सुपार्श्वं च शशिप्रभं च ॥१

वन्दे जिनं श्रीसुविधिं च शीतलं
श्रेयांसनाथं च(व) सुपूज्यनन्दनम् ।
श्रीवासुपूज्य-विमलं गुणादिम (?)
नन्त-धर्मो(र्मौ) जिनशान्तिकुन्थू ॥ २

अरं च मल्लिं मुनिसुव्रतं च,
नमिं च नेमि(मिं) प्रभुपार्श्वनाथम् ।
श्रीवर्द्धमानं गुणवर्द्धमानं,
...पदं चतुर्विंशतिकां नमामि ॥ ३

मध्ये चतुर्ण (?) ऋषभं च चन्द्रा-ननं च पारङ्गतवारिषेणम् ।
श्रीवर्द्धमानं जिनशाश्वतानां, कायेन वाचा मनसा नमामि ॥४

इति स्तवः शाश्वत-वर्त्तमान-जिनेश्वराणां पठितः स्मृतश्च ।
प्रतिप्रभातं प्रतिवासरं च, ददाति कल्याणघनोप्सितानि ॥ ५

## ६०. ॥ चतुर्विंशतिजिनस्तुतिः ॥

श्रीआदिनाथमजितं प्रभुसंभवं च
वन्देऽभिनन्दनजिनं सुमतिं जिनेशम् ।
पद्मप्रभं प्रभुसुपार्श्वशशिप्रभौ च
श्रीपुष्पदन्तमथ शीतलनामधेयम् ॥ १

श्रेयांसमानततनुं प्रभुवासुपूज्यं
वन्दे जिनं विमलनाथमनन्तधर्मौ ।
श्रीशान्तिकुन्थू अरमल्लीजिनाधिनाथौ
श्रीसुव्रतं नमिजिनेन्द्रमरिष्टनेमिम् ॥ २

श्रीपार्श्वनाथजिननायकवर्द्धमानौ
तीर्थेश्वरानहमिमान् प्रणमामि नित्यम् ।
एते जिना ददतु मे स्मरणात् त्रिसन्ध्यम्
दुर्गोपसर्गहरणानि सुमङ्गलानि ॥ ३

## ६१. ॥ श्रीचतुर्विंशति-जिनस्तवः ॥

सुरकिन्नरनागनरेन्द्रनतं, प्रणमामि युगादिजिनमजितम् ।
सम्भवमभिनन्दनमथ सुमतिं, पद्मप्रभमुज्ज्वलधीरमतिम् ॥ १

वन्दे च सुपार्श्वजिनेन्द्रमहं, चन्द्रप्रभमष्टकुकर्मदहम् ।
सुविधिप्रभुशीतलजिनयुगलं, श्रेयांसमसंशयमतुलबलम् ॥ २

प्रभुमर्चय नृपवसुपूज्यसुतं, जिनविमलमनन्तमभिज्ञनतम् ।
नमो धर्ममधर्मनिवारिगुणं, श्रीशान्तिमनुत्तरकान्तिगुणम् ॥ ३

कुन्थुश्रीअरमल्लीजिनान्, मुनिसुव्रतनमिनेमीँस्तमसि दिनान् ।
श्रीपार्श्वजिनेन्द्रमिभेन्द्रनतं, वन्दे जिनवीरमभीरुतमम् ॥ ४

इति नागकिन्नरनरपुरन्दरवन्दितक्रमपङ्कजा,
निर्जितमहारिपुमोहमत्सरमानमदमकरध्वजाः ।
विलसन्ति सततं सकलमङ्गलकेलिकाननसन्निभाः,
सर्वे जिना मे हृदयकमले राजहंससमप्रभाः ॥ ५

## ६२. ॥ श्रीचतुर्विंशतिजिनभवोत्कीर्तनस्तवनम् ॥

यः प्राक् सार्थपतिर्धन (१) स्त्वमभवो, युग्मी (२) च सौधर्मगः,
स्वर्गी (३) भूपमहाबलो (४) द्युसदनः (५), श्रीवज्रजङ्घो नृपः
(६) ।
युग्मी (७) सत्रिदशो (८) भिषक् (९) सुरवरः, कल्पेऽच्युते
(१०) चक्रिराट् (११), सर्वार्थे सुमनाः (१२) त्रयोदश भवै-
र्नूतोऽव मां नाभिभूः (१३) ॥ (शा.वि.) १

प्रथममत्र विदेहमहीतले विमलवाहनभूपतिपुङ्गवः (१) ।
द्युसदनो विजयाह्वविमानगो (२)
जय यतीश ! तृतीयभवेऽजितः (३) ॥ (द्रु.वि.) २

आद्ये भवे विपुलवाहन एव धातकी-
खण्डान्तरैरवतवर्षवरे नरेश्वरः (१) ।
ग्रैवेयके सुरवरस्त्वमभूश्च सप्तमे (२)
श्रीशम्भवस्त्वमभवः प्रभुरीप्सितप्रदः (३) ॥ ३

जम्बूद्वीपमहाविदेहविजये प्रौढप्रतापान्वितो
यस्त्वं पूर्वभवे महाबलमहीजानि(१)र्जिनेन्द्राऽभवः ।
तप्त्वा तीव्रतपो विराजिविजयाह्वाने विमाने द्युसत् (२)
स श्रीमानभिनन्दनो (३) ऽस्तमदनो जीयास्तृतीये भवे ॥ ४
(शा.वि.)

पूर्वे भवे पुरुषसिंहनृपोऽत्र जम्बू-
द्वीपे विदेहविजयावनिमण्डले त्वम् (१) ।
लात्वा व्रतं विनयनन्दनसद्गुरोर्यः
श्रीवैजयन्तसुमनाः (२) सुमतिर्जिनोऽभूः (३) ॥ (व.ति.) ५

प्राग् धातकीखण्डविदेहमण्डने
वत्साऽभिधाने विजयेऽपराजितः (१) ।
ग्रैवेयके त्वं नवमे सुरोऽभव-(२)
स्ततश्च पद्मप्रभतीर्थनायकः (३) ॥ (इन्द्रवंशा) ६

त्वं धातकीखण्डगते विदेहे
श्रीक्षेमपुर्यां नृपनन्दिषेणः (१) ।
ग्रैवेयकेऽभूस्त्रिदशश्च षष्ठे (२)
पाया अपायाज्जिन ! मां सुपार्श्व ! (३) ॥ (इन्द्रवज्रा) ७

यस्त्वं पूर्वभवे विदेहविजये सद्धातकीखण्डजे
पद्मो नाम धराधवो (१) ऽथ विबुधः श्रीवैजयन्ते (२) ततः ।
च्युत्वा श्रीमहसेनवंशकुमुदप्रोज्जृम्भने चन्द्रमाः
श्रीचन्द्रप्रभ ! (३) देहि मे निजपदोपास्तिं समस्तां सदा ॥ ८
(शा.वि.)

पूर्वं पद्मनृपो हि पुष्करवरद्वीपार्धगे पुष्कला-
वत्याह्वे विजयेऽभवः (१) सुरवरः श्रीआनते ताविषे (२) ।
श्रीसुग्रीवनरेशवंशविशद श्रीमौक्तिकाभ ! प्रभो !
स्वामिंस्त्वं सुविधे ! (३) विधेहि
सुविधौ लीनं मदीयं मनः ॥ (शा.वि.) ९

यः पुष्करद्वीपविदेहभूषणे
वत्साभिधेऽभूर्विजये धराधवः ।
पद्मोत्तरो नाम (१) सुरोऽच्युते (२) ततो
भवे तृतीये जय शीतलः (३) प्रभो ! ॥ (उपजाति) १०

आदौ पूर्वभवे हि पुष्करवरद्वीपे विदेहोद्भवे
श्रीकच्छे विजये विभो ! नलिनगुल्माह्वोऽजनिष्ठा नृपः (१) ।
श्रीपुष्पोत्तरसद्विमानकवरे यो निर्जरो भासुरः (२)
श्रीश्रेयांस ! (३) भवे भवे मम भवत्सेवां प्रदेयाः प्रभो ! ॥११
(शा.वि.)

यः पुष्करद्वीपगते विदेहे
पद्मोत्तरः प्राक् नृपतिः प्रभोऽभूः (१) ।
लात्वा व्रतं सप्तमकल्पनाकी (२)
श्रीवासुपूज्यश्च (३) भवे तृतीये ॥ (इन्द्रवज्रा) १२

यो धातकीखण्डगते विदेहे
पूर्वं प्रजासेननृपोऽजनिष्ठाः (१) ।
स्वामिन् ! सहस्रारगतः सुपर्वा (२)
विभो ! भवे त्वं विमलस्तृतीये (३) ॥ (उपजाति) १३

यः प्राग्भवे पद्मरथो महीपति-
स्त्वं धातकीखण्डविदेहमण्डले (१) ।
पुष्पोत्तरे प्राणतकल्पगे द्युसत् (२)
स्वामिन्ननन्त (३) स्त्रिभवैः स्तुतोऽव माम् ॥(इन्द्रवंशा) १४

प्राग् यो भवे दृढरथो नृपतिश्च धातकी-
खण्डे विदेहविजये भरताभिधेऽभवः (१) ।
लात्वा व्रतं विमलवाहनसंयतान्तिके
सर्वार्थसिद्धिविबुधोऽव जिनेन्द्र ! धर्म ! माम् (३) ॥ १५

त्वं श्रीषेणनृपोऽभवः प्रथमतो (१) युग्मी (२) च सौधर्मगो(३)
यो नाम्नामिततेजसा खचरराट् (४) श्रीप्राणते निर्जरः (५) ।
सीरी श्रीअपराजितो (६) ऽच्युतपति (७) र्वज्रायुधश्चक्रभृत्(८)
सग्रैवेयकगो (९) ऽव मेघरथराट् (१०)
सर्वार्थगः (११) शान्तिराट् (१२) ॥ (शा.वि.) १६

जम्बूद्वीपमहाविदेहविजये यः खड्गिपुर्यामभूः
प्राक् सिंहावहभूपति (१) र्वरतरा-मुत्सृज्य राज्यश्रियम् ।
दीक्षां वत्सरसूरिराजसविधे लात्वा च सर्वार्थगो (२)
गीर्वाणो जिन ! कुन्थुनाथ ! (३)
भवभी-भीतं प्रभो ! पाहि माम् ॥ (शा.वि.) १७

जम्बूद्वीपे विपुलविजये वत्ससञ्ज्ञेऽजनिष्ठा
यस्त्वं पूर्वं धनपतिनृपः श्रीसुसीमानगर्याम् (१) ।
लात्वा दीक्षां यतिपतिवरात् संवरात् श्रीजयन्ते
देव (२) श्च्युत्वा त्वमर ! जिनपोऽभूः (३) प्रणम्रामरेन्द्रः ॥१८
(मन्दाक्रान्ता)

द्वीपेऽत्र वर्यविजये हि विदेहमण्डने
यः प्राग्भवे नृपमहाबलसञ्ज्ञकोऽभवः (१)।
तप्त्वा तपश्चतुरशीतिसमासहस्रकं
श्रीमान् जयन्तसुमना (२) अव मल्लिनाथ ! (३) माम् ॥ १९

पूर्वं त्वं शिवकेतुभूपतिरभूः (१) सौधर्मवृन्दारक- (२)
श्च्युत्वा नाम कुबेरदत्तनृपति (३) र्नाके तृतीये मरुत् (४)।
तस्मात् त्वं भुवि वज्रकुण्डलनृपः (५) श्रीब्रह्मलोके द्युसत् (६)
श्रीश्रीवर्मनृपो (७) ऽपराजितसुरः (८)
सोऽव्याः सतः सुव्रतः (९) ॥ (शा.वि) २०

जम्बूद्वीपे भरतविजये श्रीविदेहान्तरस्थे
कौशाम्ब्यां त्वं प्रथममभवः क्ष्मापसिद्धार्थनामा (१)।
प्राप्य प्रौढं चरणममरोऽनुत्तराह्वे विमाने (२)
वप्रापुत्र ! त्रिदिवशिवदो देहि मे शं नमीश ! (३) ॥ २१
(मन्दाक्रान्ता)

पूर्वं यस्त्वमभूर्भवे धननृपः (१) सौधर्मदेवस्तत- (२)
श्च्युत्वा चित्रगतिर्नभश्चरवरो (३) माहेन्द्रकल्पे सुरः (४)।
भूपालो ह्यपराजितो (५)
ऽथ सुमनाः श्रीआरणे (६) शङ्खराड् (७)
गीर्वाणस्त्वपराजिते (८)
नवभवैर्नूतः स नेमे (९) ऽव माम् ॥ (शा.वि.) २२

पूर्वं त्वं मरुभूतिरत्र (१) समभू-र्हस्ती (२) सहस्रारगो
लेखः (३) खेचरपुङ्गव किरणवे-
गाह्वो (४) ऽच्युते निर्जरः (५)।

यश्च्युत्वा भुवि वज्रनाभनृपति-(६) ग्रैवेयकान्तः सुरः (७)
चक्री नाम सुपर्णबाहु (८) रमरः
कल्पे (९) ऽव पार्श्वेश ! (१०) माम् ॥ (शा.वि.) २३

पूर्वं त्वं नयसारभूपति (१) रभूः सौधर्मवृन्दारक- (२)
श्च्युत्वा नाम मरीचि (३) रत्र सुमनाः
स्वःपञ्चमे (४) कौशिकः (५)।
देवः प्राग्दिवि (६) पुष्पमित्र (७)
इति यः सौधर्मकल्पे सुरो (८)-
ऽग्निद्योत (९) स्त्रिदशो द्वितीयतविषे
(१०) विप्रोऽग्निभूत्याह्वयः (११) ॥ (शा.वि.) २४

गीर्वाणस्तु सनत्कुमारतविषे (१२) विप्राग्रणीर्नामतो
भारद्वाजगृही (१३) चतुर्थतविषे लेखो
(१४) द्विजः स्थावरः (१५) ।
नाकी पञ्चमके सुरालयवरे (१६) श्रीविश्वभूतिर्नृपः (१७)
शुक्रे निर्जरकुञ्जरो (१८) ऽत्र भरते
विष्णुस्त्रिपृष्ठोऽभवः (१९) ॥ (शा.वि.) २५

सप्तम्यां भुवि नारको (२०) मृगपति-(२१) स्तुर्यावनौ नारकी
(२२)
चक्री च प्रियमित्रकः (२३) सुरवरः शुक्रे (२४) नृपो नन्दनः
(२५) ।
श्रीपुष्पोत्तरके विमानकवरे श्रीप्राणतस्वर्गगे
नाकी (२६) कीर्तितसप्तविंशतिभवो
भूयाः स वीर ! (२७) श्रिये (शा.वि.) (त्रिभि.) ॥ २६

# ६३. ॥ श्रीचतुर्विंशतिजिनस्तवनम् ॥

श्रीनाभिभूपालविशालवंश-मुक्ताफलनिर्मलमादिनाथम् ।
भूमीन्द्र-**वज्रा**युधवारवन्द्यं यो वन्दते स्याज्जन एष धन्यः ॥१

**उपेन्द्रवज्रा**युधचक्रिसम्पन्न दुर्लभा तेऽजित ! पूजकानाम् ।
न जातु मुञ्चन्ति जिनोपजाति भृङ्गा इवोपान्तमिहामराश्च ॥ २

शम्भवेश ! नरनाकिसमज्या-**स्वागता**सु तव बोधविदग्धा ।
द्वादशस्वपि बभूव विभो ! वाग् योजनप्रसरभाग्गुणवर्या ॥ ३

नन्द सद्गुणसुरद्रुनन्दन ! स्फारसुन्दरमतेऽभिनन्दन ! ।
पूर्णसज्जनमनो**रथोद्धता**नेकभावरिपुभूधराशने ! ॥ ४

सुमते ! भवता **प्रबोधिता**ऽसुमतां सन्नमतां विनिर्मिता ।
दिशता शिवमार्गमद्भुता न मुदे गीस्तव कं प्रति श्रुता ? ॥ ५

ज्योतिःसद्म छद्मपद्माऽमृतांशो ! पद्मागारं पद्मरागोपमाङ्गः ।
संसाराब्धेः पाहि पद्मप्रभ ! त्वं
मां गीर्नावा **शालिनी**लाब्जनेत्र ! ॥ ६

**दोधक**मुख्यमनोहरवृत्तैः स्वर्वनिताभिरलं कृतनृत्तैः ।
देवसुपार्श्व ! यशस्तव गीतं तत्पतिभिश्च रसेन निपीतम् ॥ ७

शरच्चन्द्रमःसान्द्र चन्द्रप्रभेश ! प्रजायासनिर्नाशिधर्मोपदेश ! ।
शमाऽतन्द्र चन्द्रप्रभापास्तनाशं
शिवश्री **भुजङ्गप्रयातं** त्वया शम् ॥ ८

सुविधिनायक ! सन्नयभूषित ! **द्रुतविलम्बित**तोज्झितभाषित!।
विमलबोधनिधे कुरु मे हितं
कमलकोमलपादतलाऽमितम् ॥ ९

भूरिभावारिनिर्भेदमेदस्वलं काममकारस्करोद्दामदन्तावलम् ।
**स्रग्विणी**सद्गुणापूर्णभूमितलं
सेवते देवताली जिनं शीतलम् ॥ १०

श्रेयांसमश्रान्तमनन्तसंविदं विश्वेन्द्रवज्राप्तजिनं जिनेश्वरम् ।
स्तवीति यस्तस्य यशो जगत्यलं
प्रलम्ब**वंशस्थ**नटीव नृत्यति ॥ ११

सिन्दूरारुणमहसङ्गिरा त्रिलोकी-सन्देहानपरिमितानपि क्षिपन्तम्।
सम्पूज्यं सुरविसरेण वासुपूज्यं वीक्ष्य
स्तामिह नयते **प्रहर्षिणी** मे ॥ १२

सकलकुशलभरकमलदिनकर !
त्वमखिल सुरपतिमहित ! जय विभो ! ।
विमलविमलतर **मणिगुणनिकर**, !
प्रसृमरभवदवदहननवघनः ॥ १३

जिनराजमनन्तमतिप्रवरैरिह **तोटक**मुख्यसुवृत्तभरैः ।
अभिनौत्यभियोगयुतः सततं
भुवि यो लभते शुभमेष मतम् ॥ १४

श्रीधर्म ! कर्मबलनिर्मथने समर्थ !
निर्वाणनव्यनगराध्वनि सार्थवाह ! ।
तुभ्यं नमोऽतुलविशालरमारसाल-
राजी**वसन्त** ! **तिलका**य विमुक्तिभाले ॥ १५

सुकनकतनुशान्तिं यः प्रभुं नौति शान्तिं,
विबुधशिखरिधीरं दावदा**मालिनी**रम् ।
कृतशिवपुरवासं भिन्नविश्वप्रयासं
मतवरतमतत्त्वः सोऽश्नुते ब्रह्म सत्त्वः ॥ १६

विलसद्गुण**मालभारिणी** वाग् नवकाष्ठा तव कुन्थुतीर्थनाथ!।
प्रमदं न सदा ददाति केषां भवभीमाम्बुधितारणात्तरीव ॥ १७

अरजिनवरसार्वभौम संयत्यजनसमुत्सुकमञ्जुसंयमेच्छ ! ।
अभिमतफलदायिनी भवद्गी-
र्भवति सुपर्वलतेव **पुष्पिताग्रा** ॥ १८

श्यामल्लेऽतिश्यास्त्वयि व्यराज**न्नौपच्छन्दसके** पदो र्नु मात्राः।
श्रीकुम्भकुलाम्बुजैकभानो !
भविकाभिमतसुखाप्तिकामकुम्भ ! ॥ १९

सुमित्रनृपनन्दनं नमदशेषसङ्क्रन्दनं,
शुभातिशयशोभितं त्रिदशयोषिदक्षोभितम् ।
तनुद्युतिजिताञ्जनं चरितपूत**पृथ्वी**जनं,
स्तवीमि मुनिसुव्रतं विशदभावतः सुव्रतम् ॥ २०

नमिजिनवरं भव्याम्भोज-प्रबोधदिवाकरं,
नतसुरमणिं धर्माराम-प्रसाधनसारणिम् ।
वपुरसदृशां क्षोभाऽवश्यं सदा **हरिणी**दृशां,
नमत नियतं सीमातीतप्रतीतगुणायतम् ॥ २१

श्रीशैवेयं मनसिजमहापन्नगे वैनतेयं
तं सेवेऽहं शिवसुखरतं निर्मलज्ञानगेहम् ।

विश्वभ्रान्ता विषयविमुखस्वान्तयोगेन येना-
ऽ**मन्दाक्रान्ता** त्रिभुवनमहाशत्रुसम्मोहसेना ॥ २२

प्रसादेनावश्यं व्रजति विलयं यस्य भविनां,
विपद्वृन्दं भानोः किरणनिकरेणेव तिमिरम् ।
सरोजश्रेणीवोल्लसति सततं मङ्गलतति-
र्नतिस्तस्मिन् पार्श्वे सुर**शिखरिणी**व स्थिरतरे ॥ २३

श्रीसिद्धार्थसमर्थपार्थिवकुलाऽऽकाशप्रकाशे रविं,
श्रीवीरं तरलीकृतामरगिरिं बाल्ये गुरुस्वौजसा ।
तं नौमि त्रिशलासुतं गुणयुतं भास्वत्तपोभाजनं,
येनाऽतन्यत मोहसिंहदलने **शार्दूलविक्रीडितम्** ॥ २४

एवं निःशेषविश्वत्रयविदितचतुर्विंशतिश्रीजिनानां,
नानाछन्दोनिबद्धं स्तवमनणुगुण**स्त्रग्धरा**णामवश्यम् ।
योऽकुण्ठोत्कण्ठमुच्चैः पठति शठतया मुक्तचित्तः स तीर्त्वा,
संसारोदारसिन्धुं शिवपदरमया सज्जयानन्दमेति ॥(शा.वि.)२५

## ६४. ॥ श्रीचतुर्विंशतिजिननमस्काराः ॥

प्रथमजिनवर प्रथमजिनवर ! निखिलनरनाथ-
संसेवितपदकमल ! कमलबन्धुबन्धुर ! महोदय ! ।
दययोद्धृतभीमभवरूपकूपगतलोकसमुदय ! ।
दयमानश्रियमसुमता-ममलचरित्रपवित्र !
वित्रस्ताखिलदुरितजय ! जय निष्कारणमित्र ! ॥ १

मित्रभासुर मित्रभासुर ! जय श्रीअजित !
विजया-जितशत्रुभव ! भुवनसूर ! दूरिततमोभर ! ।
भरताधिपनृपतिवरसगरपूज्य ! भवरजनिवासर ! ।
सरभसभासितभुवनतल-केवलविमलालोक !
लोकशिवङ्करसकलदिग्-वलयविलासिश्लोक ! ॥ २

श्लोकगद्य श्लोकगद्यप्रभृति-निरवद्य-
पदपद्धतिगेयगुण ! विगतवल्गादुपसर्गसङ्गम ! ।
गमदुर्गम ! विनयनयनिलय ! समयसरिदोघगिरिसम ! ।
समसंयमसमतादिगुण-गणमणिरोहण ! परम-
रमणीयागम ! जय सदा श्रीसम्भवजिन ! वितम ! ॥ ३

तमभिनन्दन तमभिनन्दन-देवमन्दरा-
मन्दारमालामिलितमौलिमौलिसुरराजसेवित ! ।
विततोज्ज्वलकीर्तिभरभरितभुवन ! मुनिभिः प्रशंसित ! ।
सितकरसुन्दरतरलतरचालितचामरराजि-
राजित ! रञ्जय येन जिन ! तव पदकमलमभाजि ॥ ४

भाजितोत्तम भाजितोत्तम कनक सुमतीश !
पाथोदपथपान्थपथिपव्य(च्य)मानपरमर्द्धिवैभव ! ।
भवमार्गगतदीनभव्यजनतासुधाप्लव ! ।
प्लवगचलाचलकरणजय ! योगीश्वर ! मुनिनाथ !
नाथवन्तमचिरेण मां कुरु कुरु रमासनाथ ! ॥ ५

नाथनिर्मल नाथनिर्मल-पद्मसमचरण !
पद्मानन ! पद्मदलविपुलनयन ! वरपद्मलाञ्छित ! ।
छितपद्माभोगरस ! पद्मरागपन्नखमहोर्जित ! ।

जित-पद्मासुत ! सुतनुरुचि-निचयनिराकृतपद्म ! ।
पद्मप्रभजिन ! समधिगत-शिवसम्पद्मयसद्म ! ॥ ६

सन्मनोरथ सन्मनोरथ-करणसुररत्न !
रत्नोज्ज्वलफणमुकुट ! मुकुटरोचिरञ्जितदिगन्तर ! ।
तरसाजितजगदजितमोहमल्लहेलाहतस्मर ! ।
स्मरणपरायणजनजनित-वाञ्छिततत(ति) ! नरदेव !
देव ! सुपार्श्व सुपार्श्व ! जय भुवनत्रयकृतसेव ! ॥ ७

सेवकोत्तम सेवकोत्तम-फलद ! निस्तन्द्र-
वरचन्द्रोज्ज्वलवर्ण ! वरचन्द्रसान्द्रनिःश्वाससौरभ ! ।
रभसाऽऽगतसकलशुभऋद्धिसिद्धिकुलभुवनसन्निभ ! ।
निभवन्ध्य ! प्रतिसन्ध्यमपि जगदञ्चित जिनचन्द्र !
चन्द्रप्रभ ! जय ! सातिशय-गुणगणरत्नसमुद्र ! ॥ ८

मुद्रसानत मुद्रसानत-निखिलनाकीन्द्र !
सुविधीश्वर ! सुविधिपथपान्थधौतकल्मषरजोमल ! ।
मलयोद्भवसुरभितमविमलशीलजनजनितपरिमल ! ।
मलविमुक्तमुक्ताविशद-तनुकान्तिभिरभिराम !
रामा-सुग्रीवप्रभव ! जय कमलाकुलधाम ! ॥ ९

धामधीरिम धामधीरिम रम्यभूपाल-
विपुलोज्ज्वलकुलकुमुदकौमुदीश ! जगदीश ! शीतल ! ।
तलपादस्पर्शवशसुपरिपूतभूतल ! महाबल ! ।
बलशासनशंसितविशद-गुणसन्ततिसंवीत !
वीतकषाय ! शमायतन ! तव विनमामि प्रीत ! ॥ १०

प्रीतये भव प्रीतये भव भुवनविख्यात-
महिमाऽहिम-हिमकिरण-हंसयान-हरि-हर-पुरन्दर-
दरदायकविषमसुमसायकस्य देव ! क्षयङ्कर ! ।
करतललुलितसरोजवर ! जगतीजनितश्रेय !
श्रेयःस्वामिन(न्) ! भवदमन ! तनुरुचिजितगाङ्गेय ! ॥ ११

गेयसद्गुण गेयसद्गुण ! मघवमणिमुकुट-
कोटीतटघृष्टपदनखक्रमभूषितवसुन्धर ! ।
धरणीधव-धव धीर जिनवासुपूज्य वसुपूज्यसुतवर ! ।
वरदीभूतपवित्रवपु-रपहस्तितसिन्दूर !
दूरनिवारितदुरित ! जय तीर्णभवाम्बुधिपूर ! ॥ १२

पूरयाश्रित पूरयाश्रित-जनमनोभीष्ट-
मसमोदय ! चलनतललुलितसकलभुवनैकवैभव ! ।
भवभूधरभिदुरवर ! विमल ! भीमभावारिभैरव ! ।
रवगम्भीररिममधुरिमा-ऽधःकृतजलदनिनाद ! ।
नादरतस्तव नमति कः स्फुटवाणीसंवाद ! ॥ १३

वादनिर्जित वादनिर्जित देवनरवादि-
सम्पादितभक्तिभरविदितवस्तुविस्तार ज(जि)नवर ! ।
वरलावरवरगमन ! जनहितार्थकरणैकतत्पर ! ।
परमपदप्रदपदकमल ! विस्तृतकीर्तिपराग !
रागरोषजिदनन्त ! जय भुवि विश्रुतपरभाग ! ॥ १४

भागधेय(युत) भागधेय(युत) ! प्रचुरसौभाग्य-
सम्भावितपदकमल ! वचनवीचिनीचैःकृतापर-
परमाहितकुमतमत ! धर्मनाथ ! निर्वृतिवधूवर ! ।

वरणीभूतभुजावलय-लीनजगत्त्रयकान्ति-
कान्तिधाम ! सुखमतनु मे वितनु विमुद्रितशान्ति ॥ १५

शान्तिजिन ! जय शान्तिजिन ! जय दोषभयभीत-
भुवनत्रयदुर्ग्गसमवसरणवरवप्रभासित ! ।
सितचामर-भेरिरव-भाःसमिद्ध-सिंहासनासित-
सितकर-धवलच्छत्र-वरनिःस्वन-विलसदशोक-
शोकहारिपुष्पप्रकरनन्दितविष्टपलोक ! ॥ १६

लोकलोचन लोकलोचनचतुर ! चतुरन्त-
वसुधाधव ! धवलतमपरमकीर्त्तिसम्भारसङ्गत ! ।
गतकल्मष ! विषमतमदावदाहजलवाह ! शाश्वत ! ।
स्वतनुसमुज्ज्वलकान्तिभर-भर्च्छि(र्त्सि)तसुरगिरिराज !
राजसहस्रनिषेव्य ! जय कुन्थुनाथजिनराज ! ॥ १७

राजराजित राजराजित ! हारनीहार-
हरहासभासुर ! परमपदविलास ! भुवनैकबान्धव ! ।
धवलोज्ज्वलकीर्तिभर ! भरतभूमिभूषण ! गताश्रव ! ।
श्रवन्मुदश्रुनतश्रमण-सिक्तक्रम ! सङ्कल्प-
कल्पद्रुम ! देवाऽर ! जय जन चिन्तामणिकल्प ! ॥ १८

कल्पनातिग कल्पनातिग कल्पितानल्पसम्पद्-
जय मल्लिजिन ! मोहमल्ल ! मानैकभञ्जन ! ।
जनमिथ्याभावगदविलसदान्ध्यनाशनसुधाञ्जन ! ।
जननजरामृतिवल्लिवन-मोटनघनपवमान !
मानवभवपावन ! मुनिप ! बोधितजनसन्तान ! ॥ १९

तानवानत तानवानत-कर्मसम्बन्ध !
वरकेवलमहिमभररभसनृत्यदमरेन्द्ररमणी- ।
रमणीयकहारगलदमलरत्नरोचिष्णुधरणी- ।
धरणीधर ! गुरुगरिमवर ! सुव्रत ! भव्यानसम-
समवसृतिस्तव भगवता(तः) पायादपायादमम ! ॥ २०

मम नमीश्वर ! मम नमीश्वर ! वितनु कुशलानि
कुशलावं लूनसमकर्मरूढ सुप्रौढकानन ! ।
जनतानामशिवकरमकरकेतुभयहेतुनाशन ! ।
सनरामरपशुपरमसम ! जनतोल्लसदुपदेश !
देशदूरसीमाशमितसडमरमरकक्लेश ! ॥ २१

क्लेशकारण क्लेशकारणनिखिलयदुराज्य-
राजीमतिसम्पदाभोगभोगमाभोग्य जिनवर ! ।
नवरसवशमनधिगत ! तं विहाय विधिधृततपोभर ! ।
भरतावनिपावनसुगिरिरैवतमौलिनिविष्ट !
विष्टपवन्दित ! नेमिजिन ! जय सौभाग्यविशिष्ट ! ॥ २२

शिष्टनन्दित शिष्टनन्दित कमठहठमुक्त-
जलवारणभुजगपतिधरणविहितविकटस्फु(स्फ)टाञ्चित-
चितरोचीरुचितरतरवपुरपास्तसतडिद्घनोर्जित ! ।
जितमायामद ! पार्श्वजिन ! विघ्नगणानध्याय !
